# शास्त्रसंदेशमाला

भावनाशास्त्रनिकरः

१



# શાસ્ત્રસંદેશમાલા – ૯

ભાવનાશાસ્ત્રનિકર:

ભાગ-૯


॥ સંકલન ॥

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.



॥ પ્રકાશક ॥

શાસ્ત્રસંદેશમાલા

૩, મણિભદ્ર એપાર્ટમેન્ટ, સુભાષચોક,

આરાધના ભવન માર્ગ - ગોપીપુરા, સુરત-૧

❖ શાસ્ત્રસંદેશમાલા - ૯
❖ ભાવનાશાસ્ત્રનિકર:
❖ પ્રથમ આવૃત્તિ
❖ વિજયા દશમી વિ.સ.૨૦૬૧
❖ કિંમત રૂ.૪૦/- (પડતર કિંમત)

**॥ પ્રમાર્જના - શુદ્ધિ ॥**

**પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા.**
**પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા.**
**પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ.**
**પંડિતવર્ય શ્રી રતીભાઈ ચીમનલાલ દોશી**

❖ **ટાઇપ સેટીંગ:** પાયલ પ્રિન્ટર્સ - રાધનપુર
શ્રીજી ગ્રાફીક્સ, પાલડી, અમદાવાદ.

❖ **મુદ્રક :** શિવકૃપા ઓફસેટ પ્રિન્ટર્સ, દૂધેશ્વર, અમદાવાદ-૪

---

**વિશેષ નોંધ : શાસ્ત્રસંદેશમાલાના ૧ થી ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યમાંથી કરવામાં આવેલ છે. તેની નોંધ લેવા વિનંતી.**

આભાર...!

અનુમોદનીય...!

અનુકરણીય...!

**શાસ્ત્રસંદેશમાલા ના એક થી દસ ભાગના પ્રકાશનનો સંપૂર્ણ લાભ**

# શ્રી સુરત તપગચ્છ રત્નત્રયી આરાધક સંઘ

**C/o વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન,**

આરાધના ભવન રોડ, સુભાષચોક,

ગોપીપુરા, સુરત-૨

**તરફથી શ્રી સંઘના જ્ઞાનદ્રવ્યની નિધિમાંથી લેવામાં આવેલ છે. તેની અમો ભૂરી...ભૂરી... અનુમોદના કરીએ છીએ...!**

**શ્રી સંઘ તથા ટ્રસ્ટીગણના અમો આભારી છીએ ..!**

-શાસ્ત્રસંદેશમાલા

શાસ્ત્રસંદેશમાલાનાં ૧ થી ૨૦ ભાગમાં લેવાયેલ ૪૦૦ થી વધારે ગ્રંથોના મૂળ પુસ્તકો-પ્રતો મેળવવા માટે અમોએ નીચે લખેલ સંસ્થાઓ હસ્તકના જ્ઞાનભંડારનો વિશેષ ઉપયોગ કરેલ છે. આ સંસ્થાઓ અને તેના ટ્રસ્ટીઓ તથા કાર્યકરોના અમો આભારી છીએ.

૧. શ્રી વિજયગચ્છ જૈન ઉપાશ્રય - રાધનપુર
૨. શ્રી નગીનભાઈ જૈન પૌષધશાળા - પાટણ
૩. વિજય રામચન્દ્રસૂરીશ્વરજી આરાધના ભવન - સુરત
૪. શ્રી જૈનાનન્દ પુસ્તકાલય - સુરત
૫. શ્રી મોહનલાલજી જૈન ઉપાશ્રય - સુરત
૬. શ્રી દાનસૂરિ જ્ઞાનમંદિર - અમદાવાદ
૭. જૈન આરાધના ભવન ટ્રસ્ટ - અમદાવાદ
૮. શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા
૯. શ્રી નેમિનંદન શતાબ્દિ ટ્રસ્ટ - અમદાવાદ

- શાસ્ત્રસંદેશમાલા

## ધર્મશાસ્ત્રકાર કેવા... !

ધર્મશાસ્ત્રકાર, એટલે બીજાએ પોતાના ઉપર ઉપકાર કર્યો છે કે નહિ-તેની અપેક્ષા વિનાના, નિઃસ્પૃહ, મોક્ષમાર્ગને જાણનારા અને એ માર્ગે જીવનારા, પૌદ્‌ગલિક પદાર્થો પ્રત્યે સમવૃત્તિવાળા બનેલા, મોક્ષમાર્ગના મુસાફર અને શિવસુખમાં જ બદ્ધરાગ બનેલા ! એવો રાગ ન હોય તો સંસારસુખમાં લોભાયા વિના રહે ? અને, એવા રાગ વિના, એ બીજા આત્માઓના સંસારરાગને છોડાવી શકે ? કહેવું જ પડે કે-નહિ. આથી સ્પષ્ટ છે કે-ધર્મશાસ્ત્રકાર સંસારરાગના વૈરી ! વૈદ્યની દવા જેમ રોગને નાબૂદ કરે તેમ ધર્મશાસ્ત્રકારનું વચન પુણ્યાત્માઓના સંસારરાગ રૂપ રોગને નાબૂદ કરે અને શિવસુખના રાગ રૂપ ઔષધની બક્ષીસ કરે.

**-પૂ.આ.દેવ.શ્રીમદ્ વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજા**

# પ્રકાશકીય ........ !

પૂર્વના પૂર્વાચાર્ય - પુણ્યાત્માઓએ પદ્યમાં પ્રરૂપેલા ૪૦૦ થી વધારે પ્રકરણોના ૭૦,૦૦૦ હજાર શ્લોક પ્રમાણ સાહિત્ય આજે એક નવા સ્વરૂપે આવી રહ્યું છે.

ઉપલબ્ધ ગ્રંથોનું ઉપકારક-ઉપયોગી બનનાર આ એક-અપૂર્વ-અનોખું-અનેરું-અદ્‌ભૂત પ્રકાશનમાં અમો નિમિત્ત બનેલ છીએ તેનો અમોને હર્ષ છે.

છેલ્લા ત્રણ વર્ષથી પૂ.પંન્યાસશ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્ય રત્ન પૂ.પંન્યાસશ્રી તપોરત્નવિજયજી મ.સા.ના સંપૂર્ણ માર્ગદર્શન મુજબ પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સાહેબે આ સંકલના તૈયાર કરી આપેલ છે.

શાસ્ત્રસંદેશમાલા દ્વારા પ્રકાશિત થયેલ આ ૨૦ પુસ્તકોમાં પૂ.આ.શ્રી હરિભદ્રસૂરીશ્વરજી મ.સા. તથા પૂ.ઉપા.શ્રી યશોવિજયજી મ.સા. દ્વારા રચાયેલ પદ્ય સાહિત્યના સાત પુસ્તકો છે બાકીના તેર પુસ્તકોમાં અલગ-અલગ કર્તાઓની કૃત્તિઓનો વિષયવાર સમાવેશ કરવામાં આવેલ છે.

શાસ્ત્રસંદેશમાલાના આ પ્રકાશનમાં શુદ્ધિનો વિશેષ ખ્યાલ રાખવામાં આવેલ છે. દરેક પુસ્તકમાં આગળ જણાવેલ પૂજ્યશ્રીઓએ તે પુસ્તકનું પ્રમાર્જન કરી આપેલ છે. તેમાં પૂ.પં.શ્રી બોધિરત્નવિજયજી મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા., પૂ.આ.શ્રી યોગતિલકસૂરીશ્વરજી

મ.સા.ના શિષ્યરત્ન પૂ.મુ.શ્રી શ્રુતતિલકવિજયજી મ.સા. (સંસ્કૃત ગ્રન્થો) તથા પૂ.સા.શ્રી દક્ષાશ્રીજી મ.ના. શિષ્યા પૂ.સા.શ્રી ભદ્રજ્ઞાશ્રીજી મ. આદિએ વિશેષ કાળજી રાખી શુદ્ધિ કરી આપેલ છે.

જૈન પંડિતોમાં જેમનું આગવું સ્થાન-નામ છે એવા પંડિતવર્યશ્રી રતીભાઇ ચીમનલાલ દોશીએ શાસ્ત્રસંદેશમાલાના આ ૨૦ ભાગનું સમગ્ર મેટર ચેક કરી આપેલ છે. દરરોજ પાંચ-છ કલાક અધ્યયનનું કાર્ય ચાલુ રાખી, અથાગ મહેનત કરી સમયનો જે ભોગ તેઓશ્રીએ આપેલ છે તે પ્રશંસનીય છે.

શ્રી સુરત તપગચ્છ રત્નત્રયી આરાધક સંઘે તથા બીજા અલગ અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યની નિધિમાંથી ઉદારતાપૂર્વક લાભ લઇ આ કાર્યને વેગવંતુ બનાવેલ છે તે માટે અમો તેઓશ્રીના આભારી છીએ.

ટાઇપ સેટીંગ માટે પાયલ પ્રિન્ટર્સ - રાધનપુરના માલિક શ્રી ઇકબાલભાઇ તથા શ્રીજી ગ્રાફીક્સ - અમદાવાદના શ્રી નિકુંજભાઇ પટેલે ઘણી જ ધીરજ અને ખંતથી શ્રી રીઝવાન શેખના સહકારથી આ કાર્યને પૂર્ણતાએ પહોંચાડ્યું છે.

પ્રીન્ટીંગ, ટાઇટલ પ્રીન્ટીંગ તથા બાઇન્ડીંગનું કામ શિવકૃપા ઓફસેટ પ્રીન્ટર્સ-અમદાવાદના ભાવિનભાઇએ વિશેષ કાળજીપૂર્વક કરી આપેલ છે.

**શાસ્ત્રસંદેશમાલા**

# ॥ अनुक्रमणिका ॥


| | | | |
|---|---|---|---|
| १. | प्रशमरतिः | ३१३ | १-२७ |
| २. | हृदयप्रदीप षट्त्रिंशिका | ३६ | २७-३० |
| ३. | अध्यात्म-कल्पद्रुमः | २७८ | ३१-५८ |
| ४. | मनुष्यभवदुर्लभंता | ११ | ५८-६० |
| ५. | परमानन्दपञ्चविंशतिः | २५ | ६०-६२ |
| ६. | प्रातःकालिकजिनस्तुतिः | ९ | ६२-६३ |
| ७. | नूतनाचार्याय हितशिक्षा | १५ | ६३-६४ |
| ८. | सज्जनचित्तवल्लभः | २५ | ६४-६८ |
| ९. | मोक्षोपदेशपञ्चाशकम् | ५१ | ६९-७३ |
| १०. | दानषट्त्रिंशिका | ३६ | ७३-७९ |
| ११. | धर्मोपदेश : | ११० | ७९-९४ |
| १२. | संवेगद्रुमकन्दली | ५२ | ९५-१०३ |
| १३. | धर्मशिक्षा | ४० | १०४-११० |
| १४. | तत्त्वामृतम् | ३४६ | १११-१३९ |
| १५. | आत्मतत्त्वचिन्ताभावनाचूलिका | २४ | १४०-१४२ |
| १६. | प्रबोधचिन्तामणिः | १९९१ | १४२-३१२ |
| १७. | परिशिष्ट-१ | | १-८ |


संपूर्ण श्लोक संख्या - ३३६२

संपूर्ण पृष्ठ संख्या - ८ +३१२ + ८

श्रीमदुमास्वातिवाचकविरचित:

# ॥ प्रशमरति: ॥

नाभेयाद्या: सिद्धार्थराजसूनुचरमाश्चरमदेहा: ।
पञ्च नव दश च दशविध-धर्मविधिविदो जयन्ति जिना: ॥ १ ॥

जिनसिद्धाचार्योपाध्यायान् प्रणिपत्य सर्वसाधूँश्च ।
प्रशमरतिस्थैर्यार्थं, वक्ष्ये जिनशासनात्किञ्चित् ॥ २ ॥

यद्यप्यनन्तगमप-र्ययार्थहेतुनयशब्दरत्नाढ्यम् ।
सर्वज्ञशासनपुरं, प्रवेष्टुमबहुश्रुतैर्दु:खम् ॥ ३ ॥

श्रुतबुद्धिविभवपरिहीणक स्तथाप्यहमशक्तिमविचिन्त्य ।
द्रमक इवावयवोञ्छक - मन्वेष्टुं तत्प्रवेशेप्सु: ॥ ४ ॥

बहुभिर्जिनवचनार्णवपारगतै: कविवृषैर्महामतिभि: ।
पूर्वमनेका: प्रथिता: प्रशमजननशास्त्रपद्धतय: ॥ ५ ॥

ताभ्यो विसृता: श्रुतवाक्-पुलाकिका: प्रवचनाश्रिता: काश्चित् ।
पारम्पर्यादुच्छेषिका: कृपणकेन संहृत्य ॥ ६ ॥

तद्भक्तिबलार्पितया, मयाप्यविमलाल्पया स्वमतिशक्त्या ।
प्रशमेष्टतयानुसृता, विरागमार्गैकपदिके यम् ॥ ७ ॥

यद्यप्यवगीतार्था, न वा कठोरप्रकृष्टभावार्था ।
सद्भिस्तथापि मय्यनु-कम्पैकरसैरनुग्राह्या ॥ ८ ॥

कोऽत्र निमित्तं वक्ष्यति, निसर्गमतिसुनिपुणोऽपि वाद्यन्यत् ।
दोषमलिनेऽपि सन्तो, यद् गुणसारग्रहणदक्षा: ॥ ९ ॥

सद्भि: सुपरिगृहीतं, यत्किञ्चिदपि प्रकाशतां याति ।
मलिनोऽपि यथा हरिण:, प्रकाशते पूर्णचन्द्रस्थ: ॥ १०॥

बालस्य यथा वचनं काहलमपि शोभते पितृसकाशे ।
तद्वत्सज्जनमध्ये, प्रलपितमपि सिद्धिमुपयाति ॥ ११ ॥

ये तीर्थकृत्प्रणीता, भावास्तदनन्तरैश्च परिकथिताः ।
तेषां बहुशोऽप्यनुकी-र्तनं भवति पुष्टिकरमेव ॥ १२ ॥

यद्वद्विषघातार्थं, मन्त्रपदे न पुनरुक्तदोषोऽस्ति ।
तद्वद्रागविषघ्नं, पुनरुक्तमदुष्टमर्थपदम् ॥ १३ ॥

यद्वदुपयुक्तपूर्व-मपि भैषजं सेव्यतेऽर्त्तिनाशाय ।
तद्वद्रागार्त्तिहरं, बहुशोऽप्यनुयोज्यमर्थपदम् ॥ १४ ॥

वृत्त्यर्थं कर्म यथा, तदेव लोकः पुनः पुनः कुरुते ।
एवं विरागवार्ता-हेतुरपि पुनः पुनश्चिन्त्यः ॥ १५ ॥

दृढतामुपैति वैराग्य-भावना येन येन भावेन ।
तस्मिँस्तस्मिन् कार्यः कायमनोवाग्भिरभ्यासः ॥ १६ ॥

माध्यस्थ्यं वैराग्यं, विरागता शान्तिरुपशमः प्रशमः।
दोषक्षयः कषाय-विजयश्च वैराग्यपर्यायाः ॥ १७ ॥

इच्छा मूर्च्छा कामः स्नेहो गार्ध्यं ममत्वमभिनन्दः ।
अभिलाष इत्यनेकानि रागपर्यायवचनानि ॥ १८ ॥

ईर्ष्या रोषो दोषो, द्वेषः परिवादमत्सरासूयाः ।
वैरप्रचण्डनाद्या नैके द्वेषस्य पर्यायाः ॥ १९ ॥

रागद्वेषपरिगतो, मिथ्यात्वोपहतकलुषया दृष्ट्या ।
पञ्चास्रवमलबहुला-र्त्तरौद्रतीव्राभिसन्धानः ॥ २० ॥

कार्याकार्यविनिश्चयसंक्लेशविशुद्धिलक्षणैर्मूढः ।
आहारभयपरिग्रह-मैथुनसंज्ञाकलिग्रस्तः ॥ २१ ॥

क्लिष्टाष्टकर्मबन्धन-बद्धनिकाचितगुरुर्गतिशतेषु ।
जन्ममरणैरजस्रं, बहुविधपरिवर्तनाभ्रान्तः ॥ २२ ॥

दुःखसहस्रनिरन्तर-गुरुभाराक्रान्तकर्षितः करुणः ।
विषयसुखानुगततृषः, कषायवक्तव्यतामेति ॥ २३ ॥

स क्रोधमानमाया-लोभैरतिदुर्जयैः परामृष्टः ।
प्राप्नोति याननर्थान्, कस्तानुद्देष्टुमपि शक्तः ॥ २४ ॥

क्रोधात्प्रीतिविनाशं, मानाद्विनयोपघातमाप्नोति ।
शाठ्यात्प्रत्ययहानिः, सर्वगुणविनाशनं लोभात् ॥ २५ ॥

क्रोधः परितापकरः, सर्वस्योद्वेगकारकः क्रोधः ।
वैरानुषङ्गजनकः, क्रोधः क्रोधः सुगतिहन्ता ॥ २६ ॥

श्रुतशीलविनयसन्दूषणस्य धर्मार्थकामविघ्नस्य ।
मानस्य कोऽवकाशं, मुहूर्तमपि पण्डितो दद्यात् ॥ २७ ॥

मायाशीलः पुरुषो, यद्यपि न करोति किञ्चिदपराधम् ।
सर्प इवाविश्वास्यो, भवति तथाप्यात्मदोषहतः ॥ २८ ॥

सर्वविनाशाश्रयिणः, सर्वव्यसनैकराजमार्गस्य ।
लोभस्य को मुखगतः क्षणमपि दुःखान्तरमुपेयात् ॥ २९ ॥

एवं क्रोधो मानो, माया लोभश्च दुःखहेतुत्वात् ।
सत्त्वानां भवसंसारदुर्गमार्गप्रणेतारः ॥ ३० ॥

ममकाराहङ्कारावेषां, मूलं पदद्वयं भवति ।
रागद्वेषावित्यपि, तस्यैवान्यस्तु पर्यायः ॥ ३१ ॥

मायालोभकषाय-श्चेत्येतद्रागसंज्ञितं द्वन्द्वम् ।
क्रोधो मानश्च पुन-र्द्वेष इति समासनिर्दिष्टः ॥ ३२ ॥

मिथ्यादृष्ट्यविरमण-प्रमादयोगास्तयोर्बलं दृष्टम् ।
तदुपगृहीतावष्टविध-कर्मबन्धस्य हेतू तौ ॥ ३३ ॥

स ज्ञानदर्शनावरणवेद्यमोहायुषां तथा नाम्नः ।
गोत्रान्तराययोश्चे-ति कर्मबन्धोऽष्टधा मौलः ॥ ३४ ॥

पञ्चनवद्व्यष्टाविंशतिकश्चतुःषट्कसप्तगुणभेदः ।
द्विपञ्चभेद इति सप्तनवतिभेदास्तथोत्तरतः ॥ ३५ ॥

प्रकृतिरियमनेकविधा, स्थित्यनुभावप्रदेशतस्तस्याः ।
तीव्रो मन्दो मध्य इति भवति बन्धोदयविशेषः ॥ ३६ ॥

तत्र प्रदेशबन्धो योगात्तदनुभवनं कषायवशात् ।
स्थितिपाकविशेषस्तस्य भवति लेश्याविशेषेण ॥ ३७ ॥

ताः कृष्णनीलकापोततैजसीपद्मशुक्लनामानः ।
श्लेष इव वर्णबन्धस्य कर्मबन्धस्थितिविधात्र्यः ॥ ३८ ॥

कर्मोदयाद्भवगतिर्भवगतिमूला शरीरनिर्वृत्तिः ।
देहादिन्द्रियविषया विषयनिमित्ते च सुखदुःखे ॥ ३९ ॥

दुःखद्विट् सुखलिप्सुर्मोहान्धत्वाददृष्टगुणदोषः ।
यां यां करोति चेष्टां, तया तया दुःखमादत्ते ॥ ४० ॥

कलरिभितमधुरगान्धर्वतूर्ययोषिद्विभूषणरवाद्यैः ।
श्रोतावबद्धहृदयो, हरिण इव विनाशमुपयाति ॥ ४१ ॥

गतिविभ्रमेङ्गिताकारहास्यलीलाकटाक्षविक्षिप्तः ।
रूपावेशितचक्षुः शलभ इव विपद्यते विवशः ॥ ४२ ॥

स्नानाङ्गरागवर्तिक-वर्णकधूपाधिवासपटवासैः ।
गन्धभ्रमितमनस्को, मधुकर इव नाशमुपयाति ॥ ४३ ॥

मिष्टान्नपानमांसौ-दनादिमधुररसविषयगृद्धात्मा ।
गलयन्त्रपाशबद्धो, मीन इव विनाशमुपयाति ॥ ४४ ॥

शयनासनसम्बाधन-सुरतस्नानानुलेपनासक्तः ।
स्पर्शव्याकुलितमति-र्गजेन्द्र इव बध्यते मूढः ॥ ४५ ॥

एवमनेके दोषाः, प्रणष्टशिष्टेष्टदृष्टिचेष्टानाम् ।
दुर्नियमितेन्द्रियाणां, भवन्ति बाधाकरा बहुशः ॥ ४६ ॥

एकैकविषयसङ्गाद् रागद्वेषातुरा विनष्टास्ते ।
किं पुनरनियमितात्मा, जीवः पञ्चेन्द्रियवशार्त्तः ॥ ४७ ॥

न हि सोऽस्तीन्द्रियविषयो, येनाभ्यस्तेन नित्यतृषितानि ।
तृप्तिं प्राप्नुयुरक्षाण्यनेकमार्गप्रलीनानि ॥ ४८ ॥

कश्चिच्छुभोऽपि विषयः, परिणामवशात्पुनर्भवत्यशुभः ।
कश्चिदशुभोऽपि भूत्वा, कालेन पुनः शुभीभवति ॥ ४९ ॥

कारणवशेन यद्यत्, प्रयोजनं जायते यथा यत्र ।
तेन तथा तं विषयं, शुभमशुभं वा प्रकल्पयति ॥ ५० ॥

अन्येषां यो विषयः, स्वाभिप्रायेण भवति तुष्टिकरः ।
स्वमतिविकल्पाभिरतास्तमेव भूयो द्विषन्त्यन्ये ॥ ५१ ॥

तानेवार्थान्द्विषतस्तानेवार्थान्प्रलीयमानस्य ।
निश्चयतोऽस्यानिष्टं, न विद्यते किंचिदिष्टं वा ॥ ५२ ॥

रागद्वेषोपहतस्य केवलं कर्मबन्ध एवास्य ।
नान्यः स्वल्पोपि गुणोऽस्ति यः परत्रेह च श्रेयान् ॥ ५३ ॥

यस्मिन्निन्द्रियविषये, शुभमशुभं वा निवेशयति भावम् ।
रक्तो वा द्विष्टो वा, स बन्धहेतुर्भवति तस्य ॥ ५४ ॥

स्नेहाभ्यक्तशरीरस्य, रेणुना श्लिष्यते यथा गात्रम् ।
रागद्वेषाक्लिन्नस्य कर्मबन्धो भवत्येवम् ॥ ५५ ॥

एवं रागद्वेषौ, मोहो मिथ्यात्वमविरतिश्चैव ।
एभिः प्रमादयोगा-नुगैः समादीयते कर्म ॥ ५६ ॥

कर्ममयः संसारः, संसारनिमित्तकं पुनर्दुःखम् ।
तस्माद्रागद्वेषा-दयस्तु भवसन्ततेर्मूलम् ॥ ५७ ॥

एतद्दोषमहास-ञ्चयजालं शक्यमप्रमत्तेन ।
प्रशमस्थितेन घन-मप्युद्वेष्टयितुं निरवशेषम् ॥ ५८ ॥

अस्य तु मूलनिबन्धं, ज्ञात्वा तच्छेदनोद्यमपरस्य ।
दर्शनचारित्रतपः-स्वाध्यायध्यानयुक्तस्य ॥ ५९ ॥

प्राणवधानृतभाषण-परधनमैथुनममत्वविरतस्य ।
नवकोट्युद्गमशुद्धो-ञ्छमात्रयात्राधिकारस्य ॥ ६० ॥

जिनभाषितार्थसद्भावभाविनो विदितलोकतत्त्वस्य ।
अष्टादशशीलाङ्ग-सहस्रधारणकृतप्रतिज्ञस्य ॥ ६१ ॥

परिणाममपूर्वमुपागतस्य शुभभावनाऽध्यवसितस्य ।
अन्योऽन्यमुत्तरोत्तर-विशेषमभिपश्यतः समये ॥ ६२ ॥

वैराग्यमार्गसंप्रस्थितस्य संसारवासचकितस्य ।
स्वहितार्थाभिरतमतेः शुभेयमुत्पद्यते चिन्ता ॥ ६३ ॥

भवकोटीभिरसुलभं, मानुष्यं प्राप्य कः प्रमादो मे ।
न च गतमायुर्भूयः, प्रत्येत्यपि देवराजस्य ॥ ६४ ॥

आरोग्यायुर्बलसमु-दयाश्चला वीर्यमनियतं धर्मे ।
तल्लब्ध्वा हितकार्ये, मयोद्यमः सर्वथा कार्यः ॥ ६५ ॥

शास्त्रागमादृते न हितमस्ति न च शास्त्रमस्ति विनयमृते ।
तस्माच्छास्त्रागमलिप्सुना विनीतेन भवितव्यम् ॥ ६६ ॥

कुलरूपवचनयौवन-धनमित्रैश्वर्यसंपदपि पुंसाम् ।
विनयप्रशमविहीना, न शोभते निर्जलेव नदी ॥ ६७ ॥

न तथा सुमहार्घ्यैरपि, वस्त्राभरणैरलङ्कृतो भाति ।
श्रुतशीलमूलनिकषो, विनीतविनयो यथा भाति ॥ ६८ ॥

गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि ।
तस्माद्गुर्वाराधन-परेण हितकाङ्क्षिणा भाव्यम् ॥ ६९ ॥

धन्यस्योपरि निपतत्यहितसमाचरणघर्मनिर्वापी ।
गुरुवदनमलयनिःसृतो, वचनसरसचन्दनस्पर्शः ॥ ७० ॥

दुष्प्रतिकारौ माता-पितरौ स्वामी गुरुश्च लोकेऽस्मिन् ।
तत्र गुरुरिहामुत्र च, सुदुष्करतरप्रतीकारः ॥ ७१ ॥

विनयफलं शुश्रूषा, गुरुशुश्रूषाफलं श्रुतज्ञानम् ।
ज्ञानस्य फलं विरति-र्विरतिफलं चाश्रवनिरोधः ॥ ७२ ॥

संवरफलं तपोबलं-मथ तपसो निर्जरा फलं दृष्टम् ।
तस्मात्क्रियानिवृत्तिः, क्रियानिवृत्तेरयोगित्वम् ॥ ७३ ॥

योगनिरोधाद्भवसं-ततिक्षयः संततिक्षयान्मोक्षः ।
तस्मात्कल्याणानां, सर्वेषां भाजनं विनयः ॥ ७४ ॥

विनयव्यपेतमनसो, गुरुविद्वत्साधुपरिभवनशीलाः ।
त्रुटिमात्रविषयसङ्गा-दजरामरवन्निरुद्विग्नाः ॥ ७५ ॥

केचित्सातर्द्धिरसा-तिगौरवात्सांप्रतेक्षिणः पुरुषाः ।
मोहात्समुद्रवायस-वदामिषपरा विनश्यन्ति ॥ ७६ ॥

ते जात्यहेतुदृष्टान्तसिद्धमविरुद्धमजरमभयकरम् ।
सर्वज्ञवाग्रसायनमुपनीतं नाभिनन्दन्ति ॥ ७७ ॥

यद्वत्कश्चित् क्षीरं, मधुशर्करया सुसंस्कृतं हृद्यम् ।
पित्तार्दितेन्द्रियत्वाद् वितथमतिर्मन्यते कटुकम् ॥ ७८ ॥

तद्वन्निश्चयमधुरम-नुकम्पया सद्भिरभिहितं पथ्यम् ।
तथ्यमवमन्यमाना, रागद्वेषोदयोद्वृत्ताः ॥ ७९ ॥

जातिकुलरूपबललाभबुद्धिवाल्लभ्यकश्रुतमदान्धाः ।
क्लीबाः परत्र चेह हितमप्यर्थं न पश्यन्ति ॥ ८० ॥

ज्ञात्वा भवपरिवर्ते, जातीनां कोटीशतसहस्रेषु ।
हीनोत्तममध्यत्वं, को जातिमदं बुधः कुर्यात् ॥ ८१ ॥

नैकाञ्जातविशेषा-निन्द्रियनिर्वृत्तिपूर्वकान्सत्त्वाः ।
कर्मवशाद्गच्छन्त्यत्र कस्य का शाश्वता जातिः ॥ ८२ ॥

रूपबलश्रुतमतिशीलविभवपरिवर्जितांस्तथा दृष्ट्वा ।
विपुलकुलोत्पन्नानपि, ननु कुलमानः परित्याज्यः ॥ ८३ ॥

यस्याशुद्धं शीलं, प्रयोजनं तस्य किं कुलमदेन ।
स्वगुणाभ्यलङ्कृतस्य हि, किं शीलवतः कुलमदेन ॥ ८४ ॥

कः शुक्रशोणितसमुद्-भवस्य सततं चयापचयिकस्य ।
रोगजरापाश्रयिणो, मदावकाशोऽस्ति रूपस्य ॥ ८५ ॥

नित्यं परिशीलनीये, त्वङ् मांसाच्छादिते कलुषपूर्णे ।
निश्चयविनाशधर्मिणि, रूपे मदकारणं किं स्यात् ॥ ८६ ॥

बलसमुदितोऽपि यस्मान्नरः क्षणेन विबलत्वमुपयाति ।
बलहीनोऽपि च बलवान्, संस्कारवशात्पुनर्भवति ॥ ८७ ॥

तस्मादनियतभावं, बलस्य सम्यग्विभाव्य बुद्धिबलात् ।
मृत्युबले चाबलतां, न मदं कुर्याद् बलेनापि ॥ ८८ ॥

उदयोपशमनिमित्तौ, लाभालाभावनित्यकौ मत्वा ।
नालाभे वैक्लव्यं, न च लाभे विस्मयः कार्यः ॥ ८९ ॥

परशक्त्यभिप्रासादा-त्मकेन किंचिदुपभोगयोग्येन ।
विपुलेनापि यतिवृषा, लाभेन मदं न गच्छन्ति ॥ ९० ॥

ग्रहणोद्ग्राहणनवकृति-विचारणार्थावधारणाद्येषु ।
बुद्ध्यङ्गविधिकल्पे-ष्वनन्तपर्यायवृद्धेषु ॥ ९१ ॥

पूर्वपुरुषसिंहानां, विज्ञानातिशयसागरानन्त्यम् ।
श्रुत्वा सांप्रतपुरुषाः, कथं स्वबुद्ध्या मदं यान्ति ॥ ९२ ॥

द्रमकैरिव चाटुकर्मक-मुपकारनिमित्तकं परजनस्य ।
कृत्वा यद्वाल्लभ्यक-मवाप्यते को मदस्तेन ॥ ९३ ॥

गर्वं परप्रसादा-त्मकेन वाल्लभ्यकेन यः कुर्यात् ।
तं वाल्लभ्यकविगमे, शोकसमुदयः परामृशति ॥ ९४ ॥

माषतुषोपाख्यानं, श्रुतपर्यायप्ररूपणां चैव ।
श्रुत्वातिविस्मयकरं, च विकरणं स्थूलभद्रमुनेः ॥ ९५ ॥

संपर्कोद्यमसुलभं, चरणकरणसाधकं श्रुतज्ञानम् ।
लब्ध्वा सर्वं मदहरं, तेनैव मदः कथं कार्यः ॥ ९६ ॥

एतेषु मदस्थानेषु निश्चये न च गुणोऽस्ति कश्चिदपि ।
केवलमुन्मादः स्वहृदयस्य संसारवृद्धिश्च ॥ ९७ ॥

जात्यादिमदोन्मत्तः, पिशाचवद् भवति दुःखितश्चेह ।
जात्यादिहीनतां पर-भवे च निःसंशयं लभते ॥ ९८ ॥

सर्वमदस्थानानां, मूलोद्घातार्थिना सदा यतिना ।
आत्मगुणैरुत्कर्षः परपरिवादश्च संत्याज्यः ॥ ९९ ॥

परपरिभवपरिवादा-दात्मोत्कर्षाच्च बध्यते कर्म ।
नीचैर्गोत्रं प्रतिभव-मनेकभवकोटिदुर्मोचम् ॥ १०० ॥

कर्मोदयनिर्वृत्तं, हीनोत्तममध्यमं मनुष्याणाम् ।
तद्विधमेव तिरश्चां, योनिविशेषान्तरविभक्तम् ॥ १०१ ॥

देशकुलदेहविज्ञा-नायुर्बलभोगभूतिवैषम्यम् ।
दृष्ट्वा कथमिह विदुषां, भवसंसारे रतिर्भवति ॥ १०२ ॥

अपरिगणितगुणदोषः, स्वपरोभयबाधको भवति यस्मात् ।
पञ्चेन्द्रियबलविबलो, रागद्वेषोदयनिबद्धः ॥ १०३ ॥

तस्माद्रागद्वेषत्यागे, पञ्चेन्द्रियप्रशमने च ।
शुभपरिणामावस्थिति-हेतोर्यत्नेन घटितव्यम् ॥ १०४ ॥

तत्कथमनिष्टविषया-भिकाङ्क्षिणा भोगिना वियोगो वै ।
सुव्याकुलहृदयेनापि निश्चयेनागमः कार्यः ॥ १०५ ॥

आदावत्यभ्युदया, मध्ये शृङ्गारहास्यदीप्तरसाः ।
निकषे विषया बीभत्सकरुणलज्जाभयप्रायाः ॥ १०६ ॥

यद्यपि निषेव्यमाणा, मनसःपरितुष्टिकारका विषयाः ।
किम्पाकफलादनवद् भवन्ति पश्चाददतिदुरन्ताः ॥ १०७ ॥

यद्वच्छाकाष्टादश–मन्नं बहुभक्ष्यपेयवत्स्वादु ।
विषसंयुक्तं भुक्तं, विपाककाले विनाशयति ॥ १०८

तद्वदुपचारसंभृत–रम्यकरागरससेविता विषयाः ।
भवशतपरम्परास्वपि, दुःखविपाकानुबन्धकराः ॥ १०९

अपि पश्यतां समक्षं, नियतमनियतं पदे पदे मरणम् ।
येषां विषयेषु रति–र्भवति न तान्मानुषान्गणयेत् ॥ ११०

विषयपरिणामनियमो, मनोऽनुकूलविषयेष्वनुप्रेक्ष्यः ।
द्विगुणोऽपि च नित्यमनु–ग्रहोऽनवद्यश्च सञ्चिन्त्यः ॥ १११

इति गुणदोषविपर्यास–दर्शनाद्विषयमूर्छितो ह्यात्मा ।
भवपरिवर्तनभीरुभि–राचारमवेक्ष्य परिरक्ष्यः ॥ ११२

सम्यक्त्वज्ञानचारित्रतपोवीर्यात्मको जिनैः प्रोक्तः ।
पञ्चविधोऽयं विधिवत् , साध्वाचारः समनुगम्यः ॥ ११३

षड्जीवकाययतना, लौकिकसन्तानगौरवत्यागः ।
शीतोष्णादिपरीषह–विजयःसम्यक्त्वमविकम्प्यम् ॥ ११४

संसारादुद्वेगः, क्षपणोपायश्च कर्मणां निपुणः ।
वैयावृत्त्योद्योगस्तपोविधिर्योषितां त्यागः ॥ ११५

विधिना भैक्ष्यग्रहणं, स्त्रीपशुपण्डकविवर्जिता शय्या ।
ईर्याभाषाम्बरभाजनैषणावग्रहाः शुद्धाः ॥ ११६

स्थाननिषद्याव्युत्सर्गशब्दरूपक्रियाःपरान्योऽन्याः ।
पञ्चमहाव्रतदार्ढ्यं, विमुक्तता सर्वसङ्गेभ्यः ॥ ११७ ॥

*साध्वाचारः खल्वय–मष्टादशपदसहस्रपरिपठितः ।*
सम्यगनुपाल्यमानो, रागादीन्मूलतो हन्ति ॥ ११८ ॥

आचाराध्ययनोक्ता–र्थभावनाचरणगुप्तहृदयस्य ।
न तदस्ति कालविवरं, यत्र क्वचनाभिभवनं स्यात् ॥ ११९ ॥

पैशाचिकमाख्यानं, श्रुत्वा गोपायनं च कुलवध्वाः ।
संयमयोगैरात्मा, निरन्तरं व्यापृतः कार्यः ॥ १२० ॥

क्षणविपरिणामधर्मा, मर्त्यानामृद्धिसमुदयाः सर्वे ।
सर्वे च शोकजनकाः, संयोगा विप्रयोगान्ताः ॥ १२१ ॥

भोगसुखैः किमनित्यै-र्भयबहुलैः काङ्क्षितैः परायत्तैः ।
नित्यमभयमात्मस्थं, प्रशमसुखं तत्र यतितव्यम् ॥ १२२ ॥

यावत्स्वविषयलिप्सो-रक्षसमूहस्य चेष्ट्यते तुष्टौ ।
तावत्तस्यैव जये, वरतरमशठं कृतो यत्नः ॥ १२३ ॥

यत्सर्वविषयकाङ्क्षो-द्भवं सुखं प्राप्यते सरागेण ।
तदनन्तकोटिगुणितं, मुधैव लभते विगतरागः ॥ १२४ ॥

इष्टवियोगाप्रियसं-प्रयोगकाङ्क्षासमुद्भवं दुःखम् ।
प्राप्नोति यत्सरागो, न संस्पृशति तद्विगतरागः ॥ १२५ ॥

प्रशमितवेदकषायस्य, हास्यरत्यरतिशोकनिभृतस्य ।
भयकुत्सानिरभिभवस्य, यत्सुखं तत्कुतोऽन्येषाम् ॥ १२६ ॥

सम्यग्दृष्टिर्ज्ञानी, ध्यानतपोबलयुतोऽप्यनुपशान्तः ।
तं लभते न गुणं यं, प्रशमगुणमुपाश्रितो लभते ॥ १२७ ॥

नैवास्ति राजराजस्य, तत्सुखं नैव देवराजस्य ।
यत्सुखमिहैव साधो-र्लोकव्यापाररहितस्य ॥ १२८ ॥

संत्यज्य लोकचिन्ता-मात्मपरिज्ञानचिन्तनेऽभिरतः ।
जितलोभरोषमदनः,सुखमास्ते निर्ज्वरः साधुः ॥ १२९ ॥

या चेह लोकवार्ता, शरीरवार्ता तपस्विनां या च ।
सद्धर्मचरणवार्ता-निमित्तकं तद्द्वयमपीष्टम् ॥ १३० ॥

लोकः खल्वाधारः, सर्वेषां ब्रह्मचारिणां यस्मात् ।
तस्माल्लोकविरुद्धं, धर्मविरुद्धं च संत्याज्यम् ॥ १३१ ॥

देहो नासाधनको, लोकाधीनानि साधनान्यस्य ।
सद्धर्मानुपरोधात् तस्माल्लोकोऽभिगमनीयः ॥ १३२ ॥

दोषेणानुपकारी, भवति परो येन येन विद्विष्टः ।
स्वयमपि तद्दोषपदं, सदा प्रयत्नेन परिहार्यम् ॥ १३३ ॥

पिण्डैषणानिरुक्तः, कल्प्यकल्प्यस्य यो विधिः सूत्रे ।
ग्रहणोपभोगनियतस्य, तेन नैवामयंभयं स्यात् ॥ १३४ ॥

व्रणलेपाक्षोपाङ्गवदसङ्गयोगभरमात्रयात्रार्थम् ।
पन्नग इवाभ्यवहरे-दाहारं पुत्रपलवच्च ॥ १३५ ॥

गुणवदमूर्च्छितमनसा, तद्विपरीतमपि चाप्रदुष्टेन ।
दारूपमधृतिना भवति, कल्पमास्वाद्यमास्वाद्यम् ॥ १३६ ॥

कालं क्षेत्रं मात्रां, सात्म्यं द्रव्यगुरुलाघवं स्वबलम् ।
ज्ञात्वा योऽभ्यवहार्यं, भुङ्क्ते किं भेषजैस्तस्य ॥ १३७ ॥

पिण्डः शय्या वस्त्रै-षणादि पात्रैषणादि यच्चान्यत् ।
कल्प्याकल्प्यं सद्धर्म-देहरक्षानिमित्तोक्तम् ॥ १३८ ॥

कल्प्याकल्प्यविधिज्ञः, संविग्नसहायको विनीतात्मा ।
दोषमलिनेऽपि लोके, प्रविहरति मुनिर्निरुपलेपः ॥ १३९ ॥

यद्वत्पङ्काधारमपि, पङ्कजं नोपलिप्यते तेन ।
धर्मोपकरणधृतवपु-रपि साधुरलेपकस्तद्वत् ॥ १४० ॥

यद्वत्तुरगः सत्स्व-प्याभरणविभूषणेष्वनभिषक्तः ।
तद्वदुपग्रहवानपि, न सङ्गमुपयाति निर्ग्रन्थः ॥ १४१ ॥

ग्रन्थः कर्माष्टविधं, मिथ्यात्वाविरतिदुष्टयोगाश्च ।
तज्जयहेतोरशठं, संयतते यः स निर्ग्रन्थः ॥ १४२ ॥

यज्ज्ञानशीलतपसा-मुपग्रहं निग्रहं च दोषाणाम् ।
कल्पयति निश्चये यत्, तत्कल्प्यमकल्प्यमवशेषम् ॥ १४३ ॥

यत्पुनरुपघातकरं, सम्यक्त्वज्ञानशीलयोगानाम् ।
तत्कल्प्यमप्यकल्प्यं, प्रवचनकुत्साकरं यच्च ॥ १४४ ॥

किञ्चिच्छुद्धं कल्प्यम-कल्प्यं स्यात्स्यादकल्प्यमपि कल्प्यम् ।
पिण्डः शय्या वस्त्रं, पात्रं वा भेषजाद्यं वा ॥ १४५ ॥

देशं कालं पुरुषम-वस्थामुपयोगशुद्धिपरिणामान् ।
प्रसमीक्ष्य भवति कल्प्यं, नैकान्तात्कल्पते कल्प्यम् ॥ १४६ ॥

तच्चिन्त्यं तद्भाष्यं, तत्कार्यं भवति सर्वथा यतिना ।
नात्मपरोभयबाधक-मिह यत्परतश्च सर्वाद्धम् ॥ १४७ ॥

सर्वार्थेष्विन्द्रियसं-गतेषु वैराग्यमार्गविघ्नेषु ।
परिसङ्ख्यानं कार्यं, कार्यं परमिच्छता नियतम् ॥ १४८ ॥

भावयितव्यमनित्य-त्वमशरणत्वं तथैकतान्यत्वे ।
अशुचित्वं संसारः, कर्मास्रवसंवरविधिश्च ॥ १४९ ॥

निर्जरणलोकविस्तर-धर्मस्वाख्याततत्त्वचिन्ताश्च ।
बोधेः सुदुर्लभत्वं, च भावना द्वादश विशुद्धाः ॥ १५० ॥

इष्टजनसंप्रयोगर्द्धि-विषयसुखसंपदस्तथारोग्यम् ।
देहश्च यौवनं जीवितं च सर्वाण्यनित्यानि ॥ १५१ ॥

जन्मजरामरणभयै-रभिद्रुते व्याधिवेदनाग्रस्ते ।
जिनवरवचनादन्यत्र, नास्ति शरणं क्वचिल्लोके ॥ १५२ ॥

एकस्य जन्ममरणे, गतयश्च शुभाशुभा भवावर्ते ।
तस्मादाकालिकहित-मेकेनैवात्मनः कार्यम् ॥ १५३ ॥

अन्योऽहं स्वजनात्परि-जनाच्च विभवाच्छरीरकाच्चेति ।
यस्य नियता मतिरियं, न बाधते तं हि शोककलिः ॥ १५४ ॥

अशुचिकरणसामर्थ्या-दाद्युत्तरकारणाशुचित्वाच्च ।
देहस्याशुचिभावः, स्थाने स्थाने भवति चिन्त्यः ॥ १५५ ॥

माता भूत्वा दुहिता, भगिनी भार्या च भवति संसारे ।
व्रजति सुतः पितृतां, भ्रातृतां पुनः शत्रुतां चैव ॥ १५६ ॥

मिथ्यादृष्टिरविरतः, प्रमादवान् यः कषायदण्डरुचिः ।
तस्य तथास्रवकर्माणि, यतेत तन्निग्रहे तस्मात् ॥ १५७ ॥

या पुण्यपापयोरग्रहणे वाक्कायमानसी वृत्तिः ।
सुसमाहितो हितः, संवरो वरददेशितश्चिन्त्यः ॥ १५८ ॥

यद्वद्विशोषणादुप-चितोऽपि यत्नेन जीर्यते दोषः ।
तद्वत्कर्मोपचितं, निर्जरयति संवृतस्तपसा ॥ १५९ ॥

लोकस्याधस्तिर्य-ग्विचिन्तयेदूर्ध्वमपि च बाहल्यम् ।
सर्वत्र जन्ममरणे, रूपिद्रव्योपयोगांश्च ॥ १६० ॥

धर्मोऽयं स्वाख्यातो, जगद्धितार्थं जिनैर्जितारिगणैः ।
येऽत्र रतास्ते संसारसागरं लीलयोत्तीर्णाः ॥ १६१ ॥

मानुष्यकर्मभूम्यार्य-देशकुलकल्यतायुरुपलब्धौ ।
श्रद्धाकथकश्रवणेषु, सत्स्वपि सुदुर्लभा बोधिः ॥ १६२ ॥

तां दुर्लभां भवशतै-र्लब्ध्वाप्यतिदुर्लभा पुनर्विरतिः ।
मोहाद्रागात्कापथ-विलोकनाद्गौरववशाच्च ॥ १६३ ॥

तत्प्राप्य विरतिरत्नं, विरागमार्गविजयो दुरधिगम्यः ।
इन्द्रियकषायगौरव-परीषहसपत्नविधुरेण ॥ १६४ ॥

तस्मात्परीषहेन्द्रिय-गौरवगणनायकान्कषायरिपून् ।
क्षान्तिबलमार्दवार्जव-सन्तोषैः साधयेद्धीरः ॥ १६५ ॥

सञ्चिन्त्य कषायाणा-मुदयनिमित्तमुपशान्तिहेतुं च ।
त्रिकरणशुद्धमपि तयोः, परिहारासेवने कार्ये ॥ १६६ ॥

सेव्यः क्षान्तिर्मार्दव-मार्जवशौचे च संयमत्यागौ ।
सत्यतपोब्रह्माकि-ञ्चन्यानीत्येष धर्मविधिः ॥ १६७ ॥

धर्मस्य दया मूलं, न चाक्षमावान्दयां समादत्ते ।
तस्माद्यः क्षान्तिपरः, स साधयत्युत्तमं धर्मम् ॥ १६८ ॥

विनयायत्ताश्च गुणाः, सर्वे विनयश्च मार्दवायत्तः ।
यस्मिन्मार्दवमखिलं, स सर्वगुणभाक्त्वमाप्नोति ॥ १६९ ॥

नाऽनार्जवो विशुध्यति, न धर्ममाराधयत्यशुद्धात्मा ।
धर्मादृते न मोक्षो, मोक्षात्परमं सुखं नान्यत् ॥ १७० ॥

यद् द्रव्योपकरणभक्तपानदेहाधिकारकं शौचम् ।
तद्भवति भावशौचा-नुपरोधाद्यत्नतः कार्यम् ॥ १७१ ॥

पञ्चास्त्रवाद्विरमणं, पञ्चेन्द्रियनिग्रहः कषायजयः ।
दण्डत्रयविरतिश्चेति, संयमः सप्तदशभेदः ॥ १७२ ॥

बान्धवधनेन्द्रियसुख-त्यागात्त्यक्तभयविग्रहः साधुः ।
त्यक्तात्मा निर्ग्रन्थ-स्त्यक्ताहङ्कारममकारः ॥ १७३ ॥

अविसंवादनयोगः, कायमनोवागजिह्मता चैव ।
सत्यं चतुर्विधं त-च्च 'जिनवरमतेऽस्ति नान्यत्र ॥ १७४ ॥

अनशनमूनोदरता, वृत्तेः संक्षेपणं रसत्यागः ।
कायक्लेशःसंली-नतेति बाह्यं तपः प्रोक्तम् ॥ १७५ ॥

प्रायश्चित्तध्याने, वैयावृत्त्यविनयावथोत्सर्गः ।
स्वाध्याय इति तपः षट्-प्रकारमभ्यन्तरं भवति ॥ १७६ ॥

दिव्यात्कामरतिसुखात्, त्रिविधं त्रिविधेन विरतिरिति नवकम् ।
औदारिकादपि तथा, तद् ब्रह्माष्टादशविकल्पम् ॥ १७७ ॥

अध्यात्मविदो मूर्च्छां, परिग्रहं वर्णयन्ति निश्चयतः ।
तस्माद्वैराग्येप्सो-राकिञ्चन्यं परो धर्मः ॥ १७८ ॥

दशविधधर्मानुष्ठा-यिनः सदा रागद्वेषमोहानाम् ।
दृढरूढघनानामपि, भवत्युपशमोऽल्पकालेन ॥ १७९ ॥

ममकाराहङ्कार-त्यागादतिदुर्जयोद्धतप्रबलान् ।
हन्ति परीषहगौरव-कषायदण्डेन्द्रियव्यूहान् ॥ १८० ॥

प्रवचनभक्तिः श्रुतस-म्पदुद्यमो व्यतिकरश्च संविग्नैः ।
वैराग्यमार्गसद्भा-वभावधीस्थैर्यजनकानि ॥ १८१ ॥

आक्षेपणीं विक्षेपणीं, विमार्गबाधनसमर्थविन्यासाम् ।
श्रोतृजनश्रोत्रमनः-प्रसादजननीं यथा जननीम् ॥ १८२ ॥

संवेदनीं च निर्वे-दनीं च धर्म्यां कथां सदा कुर्यात् ।
स्त्रीभक्तचौरजनपद-कथाश्च दूरात्परित्याज्याः ॥ १८३ ॥

यावत्परगुणदोष-परिकीर्तने व्यापृतं मनो भवति ।
तावद्वरं विशुद्धे, ध्याने व्यग्रं मनः कर्तुम् ॥ १८४ ॥

शास्त्राध्ययने चाध्या-पने च सञ्चिन्तने तथात्मनि च ।
धर्मकथने च सततं, यत्नः सर्वात्मना कार्यः ॥ १८५ ॥

शास्विति वाग्विधिविद्भि-र्धातुः पापठ्यतेऽनुशिष्ट्यर्थः ।
त्रैङिति च पालनार्थे, विनिश्चितः सर्वशब्दविदाम् ॥ १८६ ॥

यस्माद्रागद्वेषो-द्धतचित्तान्समनुशास्ति सद्धर्मे ।
सन्त्रायते च दुःखा-च्छास्त्रमिति निरुच्यते सद्भिः ॥ १८७ ॥

शासनसामर्थ्येन तु, सन्त्राणबलेन चानवद्येन ।
युक्तं यत्तच्छास्त्रं, तच्चैतत्सर्वविद्वचनम् ॥ १८८ ॥

जीवाऽजीवाः पुण्यं, पापास्रवसंवराः सनिर्जरणाः ।
बन्धो मोक्षश्चैते, सम्यक् चिन्त्या नव पदार्थाः ॥ १८९ ॥

जीवा मुक्ता संसा-रिणश्च संसारिणस्त्वनेकविधाः ।
लक्षणतो विज्ञेया, द्वित्रिचतुःपञ्चषड्भेदाः ॥ १९० ॥

द्विविधाश्चराचराख्या-स्त्रिविधा स्त्रीपुंनपुंसका ज्ञेयाः ।
नारकतिर्यग्मानुष-देवाश्चतुर्विधाः प्रोक्ताः ॥ १९१ ॥

पञ्चविधास्त्वेकद्वि-त्रिचतुःपञ्चेन्द्रियास्तु निर्दिष्टाः ।
क्षित्यम्बुवह्निपवन-तरवस्त्रसाश्चेति षड्भेदाः ॥ १९२ ॥

एवमनेकविधाना-मेकैको विधिरनन्तपर्यायः ।
प्रोक्तः स्थित्यवगाह-ज्ञानदर्शनादिपर्यायैः ॥ १९३ ॥

सामान्यं खलु लक्षण-मुपयोगो भवति सर्वजीवानाम् ।
साकारोऽनाकारश्च, सोऽष्टभेदश्चतुर्धा च ॥ १९४ ॥

ज्ञानाज्ञाने पञ्च-त्रिविकल्पे सोऽष्टधा तु साकारः ।
चक्षुरचक्षुरवधिकेवलदृग्विषयस्त्वनाकारः ॥ १९५ ॥

भावा भवन्ति जीवस्यौदयिकः पारिणामिकश्चैव ।
औपशमिकः क्षयोत्थः, क्षयोपशमजश्च पञ्चैते ॥ १९६ ॥

ते चैकविंशतित्रि-द्विनवाष्टादशविधाश्च विज्ञेयाः ।
षष्ठश्च सान्निपातिक, इत्यन्यः पञ्चदशभेदः ॥ १९७ ॥

एभिर्भावैः स्थानं, गतिमिन्द्रियसम्पदः सुखं दुःखम् ।
सम्प्राप्नोतीत्यात्मा, सोऽष्टविकल्पः समासेन ॥ १९८ ॥

द्रव्यं कषाययोगा-वुपयोगो ज्ञानदर्शने चेति ।
चारित्रं वीर्यं चे-त्यष्टविधा मार्गणा तस्य ॥ १९९ ॥

जीवाजीवानां द्रव्यात्मा सकषायिणां कषायात्मा ।
योगः सयोगिनां पुन-रुपयोगः सर्वजीवानाम् ॥ २०० ॥

ज्ञानं सम्यग्दृष्टे-र्दर्शनमथ भवति सर्वजीवानाम् ।
चारित्रं विरतानां, तु सर्वसंसारिणां वीर्यम् ॥ २०१ ॥

द्रव्यात्मेत्युपचारः, सर्वद्रव्येषु नयविशेषेण ।
आत्मादेशादात्मा, भवत्यनात्मा परादेशात् ॥ २०२ ॥

एवं संयोगाल्पब-हुत्वाद्यैर्नैकशः स परिमृग्यः ।
जीवस्यैतत्सर्वं, स्वतत्त्वमिह लक्षणैर्दृष्टम् ॥ २०३ ॥

उत्पादविगमनित्य-त्वलक्षणं यत्तदस्ति सर्वमपि ।
सदसद्वा भवतीत्यन्यथार्पितानर्पितविशेषात् ॥ २०४ ॥

योऽर्थो यस्मिन्नाभूत्, साम्प्रतकाले च दृश्यते तत्र ।
तेनोत्पादस्तस्य, विगमस्तु तस्माद्विपर्यासः ॥ २०५ ॥

साम्प्रतकाले चानागते च यो यस्य भवति सम्बन्धी ।
तेनाविगमस्तस्येति स नित्यस्तेन भावेन ॥ २०६ ॥

धर्माधर्माकाशानि पुद्गलाः काल एव चाजीवाः ।
पुद्गलवर्जमरूपं, तु रूपिणः पुद्गलाः प्रोक्ताः ॥ २०७ ॥

द्व्यादिप्रदेशवन्तो, यावदनन्तप्रदेशकाः स्कन्धाः ।
परमाणुरप्रदेशो, वर्णादिगुणेषु भजनीयः ॥ २०८ ॥

भावे धर्माधर्मा-म्बरकालाः पारिणामिके ज्ञेयाः ।
उदयपरिणामि रूपं, तु सर्वभावानुगा जीवाः ॥ २०९ ॥

जीवाजीवा द्रव्य-मिति षड्विधं भवति लोकपुरुषोऽयम् ।
वैशाखस्थानस्थः, पुरुष इव कटिस्थकरयुग्मः ॥ २१० ॥

तत्राधोमुखमल्लक-संस्थानं वर्णयन्त्यधोलोकम् ।
स्थालमिव च तिर्यग्-लोकमूर्ध्वमथ मल्लकसमुद्गम् ॥ २११ ॥

सप्तविधोऽधोलोक-स्तिर्यग्लोको भवत्यनेकविधः ।
पञ्चदशविधानः पुन-रूर्ध्वलोकः समासेन ॥ २१२ ॥

लोकालोकव्यापक-माकाशं मर्त्यलौकिकः कालः ।
लोकव्यापि चतुष्टय-मवशेषं त्वेकजीवो वा ॥ २१३ ॥

धर्माधर्माकाशा-न्येकैकमतः परं त्रिकमनन्तम् ।
कालं विनास्तिकाया, जीवमृते चाप्यकर्तॄणि ॥ २१४ ॥

धर्मो गतिस्थितिमतां, द्रव्याणां गत्युपग्रहविधाता ।
स्थित्युपकृच्चाऽधर्मो-ऽवकाशदानोपकृद् गगनम् ॥ २१५ ॥

स्पर्शरसगन्धवर्णाः, शब्दो बन्धश्च सूक्ष्मता स्थौल्यम् ।
संस्थानं भेदतम-श्छायोद्योतातप (पा) श्चेति ॥ २१६ ॥

कर्मशरीरमनोवाग्-विचेष्टितोच्छ्वासदुःखसुखदाःस्युः ।
जीवितमरणोपग्रह-कराश्च संसारिणः स्कन्धाः ॥ २१७ ॥

परिणामवर्तनाविधि-परापरत्वगुणलक्षणः कालः ।
सम्यक्त्वज्ञानचारित्रवीर्यशिक्षागुणा जीवाः ॥ २१८ ॥

पुद्गलकर्म शुभं यत् , तत्पुण्यमिति जिनशासने दृष्टम् ।
यदशुभमथ तत्पापमि-ति भवति सर्वज्ञनिर्दिष्टम् ॥ २१९ ॥

योगः शुद्धः पुण्या-स्रवस्तु पापस्य तद्विपर्यासः ।
वाक्कायमनोगुप्ति-निरास्रवः संवरस्तूक्तः ॥ २२० ॥

संवृततप उपधानन्तु (नात्तु) निर्जरा कर्मसन्ततिर्बन्धः ।
बन्धवियोगो मोक्षस्त्विति संक्षेपान्नव पदार्थाः ॥ २२१ ॥

एतेष्वध्यवसायो, योऽर्थेषु विनिश्चयेन तत्त्वमिति ।
सम्यग्दर्शनमेतत् तु तन्निसर्गादधिगमाद्वा ॥ २२२ ॥

शिक्षागमोपदेश-श्रवणान्येकार्थिकान्यधिगमस्य ।
एकार्थः परिणामो, भवति निसर्गः स्वभावश्च ॥ २२३ ॥

एतत्सम्यग्दर्शन-मनधिगमविपर्ययौ तु मिथ्यात्वम् ।
ज्ञानमथ पञ्चभेदं, तत्प्रत्यक्षं परोक्षं च ॥ २२४ ॥

तत्र परोक्षं द्विविधं, श्रुतमाभिनिबोधिकं च विज्ञेयम् ।
प्रत्यक्षं त्ववधिमनः-पर्यायौ केवलं चेति ॥ २२५ ॥

एषामुत्तरभेदविषयादिभिर्भवति विस्तराधिगमः ।
एकादीन्येकस्मिन्, भाज्यानि त्वाचतुर्भ्य इति ॥ २२६ ॥

सम्यग्दृष्टेर्ज्ञानं, सम्यग्ज्ञानमिति नियमतः सिद्धम् ।
आद्यत्रयमज्ञान-मपि भवति मिथ्यात्वसंयुक्तम् ॥ २२७ ॥

सामायिकमित्याद्यं, छेदोपस्थापनं द्वितीयं तु ।
परिहारविशुद्धिः सूक्ष्मसम्परायं यथाख्यातम् ॥ २२८ ॥

इत्येतत्पञ्चविधं, चारित्रं मोक्षसाधनं प्रवरम् ।
नैकैरनुयोगनय-प्रमाणमार्गैः समनुगम्यम् ॥ २२९ ॥

सम्यक्त्वज्ञानचारित्र-सम्पदः साधनानि मोक्षस्य ।
तास्वेकतराभावेऽपि, मोक्षमार्गोऽप्यसिद्धिकरः ॥ २३० ॥

पूर्वद्वयसम्पद्यपि, तेषां भजनीयमुत्तरं भवति ।
पूर्वद्वयलाभः पुन-रुत्तरलाभे भवति सिद्धः ॥ २३१ ॥

धर्मावश्यकयोगेषु, भावितात्मा प्रमादपरिवर्जी ।
सम्यक्त्वज्ञानचारित्राणा-माराधको भवति ॥ २३२ ॥

आराधनास्तु तेषां, तिस्रस्तु जघन्यमध्यमोत्कृष्टाः।
जन्मभिरष्टत्र्येकैः, सिध्यन्त्याराधकास्तासाम् ॥ २३३ ॥

तासामाराधनतत्परेण तेष्वेव भवति यतितव्यम् ।
यतिना तत्परजिनभक्त्युपग्रहसमाधिकरणेन ॥ २३४ ॥

स्वगुणाभ्यासरतमतेः, परवृत्तान्तान्धमूकबधिरस्य ।
मदमदनमोहमत्सर-रोषविषादैरधृष्यस्य ॥ २३५ ॥

प्रशमाव्याबाधसुखा-भिकाङ्क्षिणः सुस्थितस्य सद्धर्मे ।
तस्य किमौपम्यं स्यात्, सदेवमनुजेऽपि लोकेऽस्मिन् ॥ २३६ ॥

स्वर्गसुखानि परोक्षा-ण्यत्यन्तपरोक्षमेव मोक्षसुखम् ।
प्रत्यक्षं प्रशमसुखं, न परवशं न व्ययप्राप्तम् ॥ २३७ ॥

निर्जितमदमदनानां, वाक्कायमनोविकाररहितानाम् ।
विनिवृत्तपराशाना-मिहैव मोक्षः सुविहितानाम् ॥ २३८ ॥

शब्दादिविषयपरिणाम-मनित्यं दुःखमेव च ज्ञात्वा ।
ज्ञात्वा च रागदोषा-त्मकानि दुःखानि संसारे ॥ २३९ ॥

स्वशरीरेऽपि न रज्यति, शत्रावपि न प्रदोषमुपयाति ।
रोगजरामरणभयै-रव्यथितो यः स नित्यसुखी ॥ २४० ॥

धर्मध्यानाभिरत- स्त्रिदण्डविरतस्त्रिगुप्तिगुप्तात्मा ।
सुखमास्ते निर्द्वन्द्वो, जितेन्द्रियपरीषहकषायः ॥ २४१ ॥

विषयसुखनिरभिलाषः, प्रशमगुणगणाभ्यलङ्कृतः साधुः।
द्योतयति यथा न तथा, सर्वाण्यादित्यतेजांसि ॥ २४२ ॥

[सम्यग्दृष्टिर्ज्ञानी विरतितपोबलयुतोऽप्यनुपशान्तः ।
तं न लभते गुणं यं प्रशमगुणमुपाश्रित्तो लभते ॥]

सम्यगदृष्टिर्ज्ञानी, विरतितपोध्यानभावनायोगैः ।
शीलाङ्गसहस्राष्टा-दशकमयत्नेन साधयति ॥ २४३ ॥

धर्माद् भूम्यादीन्द्रिय-संज्ञाभ्यः करणतश्च योगाच्च ।
शीलाङ्गसहस्राणा-मष्टादशकस्यास्ति निष्पत्तिः ॥ २४४ ॥

शीलार्णवस्य पारं, गत्वा संविग्नसुगममार्गस्य ।
धर्मध्यानमुपगतो, वैराग्यं प्राप्नुयाद्योग्यम् ॥ २४५ ॥

आज्ञाविचयमपाय-विचयं स ध्यानयोगमुपसृत्य ।
तस्माद्विपाकविचय-मुपयाति संस्थानविचयं च ॥ २४६ ॥

आप्तवचनं प्रवचनं, चाज्ञाविचयस्तदर्थनिर्णयनम् ।
आस्रवविकथागौरव-परीषहाद्यैरपायस्तु ॥ २४७ ॥

अशुभशुभकर्मपाका-नुचिन्तनार्थो विपाकविचयः स्यात् ।
द्रव्यक्षेत्राकृत्यनु-गमनं संस्थानविचयस्तु ॥ २४८ ॥

जिनवरवचनगुणगणं, संचिन्तयतो वधाद्यपायांश्च ।
कर्मविपाकान् विविधान्, संस्थानविधीननेकांश्च ॥ २४९ ॥

नित्योद्विग्नस्यैवं, क्षमाप्रधानस्य निरभिमानस्य ।
धुतमायाकलिमल-निर्मलस्य जितसर्वतृष्णस्य ॥ २५० ॥

तुल्यारण्यकुलाकुल-विविक्तबन्धुजनशत्रुवर्गस्य ।
समवासीचन्दन-कल्पनप्रदेहादिदेहस्य ॥ २५१ ॥

आत्मारामस्य सतः, समतृणमणिमुक्तलोष्ठकनकस्य ।
स्वाध्यायध्यानपरा-यणस्य दृढमप्रमत्तस्य ॥ २५२ ॥

अध्यवसायविशुद्धेः, प्रशस्तयोगैर्विशुद्ध्यमानस्य ।
चारित्रशुद्धिमग्र्या-मवाप्य लेश्याविशुद्धिं च ॥ २५३ ॥

तस्यापूर्वकरणमथ, घातिकर्मक्षयैकदेशोत्थम् ।
ऋद्धिप्रवेकविभवव-दुपजातं जातभद्रस्य ॥ २५४ ॥

सातर्द्धिरसेष्वगुरुः, प्राप्यर्द्धिविभूतिमसुलभामन्यैः ।
सक्तः प्रशमरतिसुखे, न भजति तस्यां मुनिः सङ्गम् ॥ २५५ ॥

या सर्वसुरवरर्द्धि-विस्मयनीयापि साऽनगारर्द्धेः ।
नार्घति सहस्रभागं, कोटिशतसहस्रगुणितापि ॥ २५६ ॥

तज्जयमवाप्य जितविघ्नरिपुर्भवशतसहस्रदुष्प्रापम् ।
चारित्रमथाख्यातं, सम्प्राप्तस्तीर्थकृत्तुल्यम् ॥ २५७ ॥

शुक्लध्यानाद्यद्वय, मवाप्य कर्माष्टकप्रणेतारम् ।
संसारमूलबीजं, मूलादुन्मूलयति मोहम् ॥ २५८ ॥

पूर्वं करोत्यनन्ता-नुबन्धिनाम्नां क्षयं कषायाणाम् ।
मिथ्यात्वमोहगहनं, क्षपयति सम्यक्त्वमिथ्यात्वम् ॥ २५९ ॥

सम्यक्त्वमोहनीयं, क्षपयत्यष्टावतः कषायांश्च ।
क्षपयति ततो नपुंसक-वेदं स्त्रीवेदमथ तस्मात् ॥ २६० ॥

हास्यादि ततः षट्कं, क्षपयति तस्माच्च पुरुषवेदमपि ।
संज्वलनानपि हत्वा, प्राप्नोत्यथ वीतरागत्वम् ॥ २६१ ॥

सर्वोद्घातितमोहो, निहतक्लेशो यथा हि सर्वज्ञः ।
भात्यनुपलक्ष्यराह्वं-शोन्मुक्तः पूर्णचन्द्र इव ॥ २६२ ॥

सर्वेन्धनैकराशी-कृतसन्दीप्तो ह्यनन्तगुणतेजाः ।
ध्यानानलस्तपः प्रशम-संवरहविर्विवृद्धबलः ॥ २६३ ॥

क्षपकश्रेणिमुप[परि]गतः, स समर्थः सर्वकर्मिणां कर्म ।
क्षपयितुमेको यदि कर्म-संक्रमः स्यात्परकृतस्य ॥ २६४ ॥

परकृतकर्मणि यस्मा-न्नाक्रामति संक्रमो विभागो वा ।
तस्मात्सत्त्वानां कर्म यस्य यत्तेन तद्वेद्यम् ॥ २६५ ॥

मस्तकसूचिविनाशा-त्तालस्य यथा ध्रुवो भवति नाशः ।
तद्वत्कर्मविनाशो, हि मोहनीयक्षये नित्यम् ॥ २६६ ॥

छद्मस्थवीतरागः, कालं सोऽन्तर्मुहूर्तमथ भूत्वा ।
युगपद्विविधावरणा-न्तरायकर्मक्षयमवाप्य ॥ २६७ ॥

शाश्वतमनन्तमनतिश- यमनुपममनुत्तरं निरवशेषम् ।
संपूर्णमप्रतिहतं, सम्प्राप्तः केवलं ज्ञानम् ॥ २६८ ॥

कृत्स्ने लोकालोके, व्यतीतसाम्प्रतभविष्यतः कालान् ।
द्रव्यगुणपर्यायाणां, ज्ञाता द्रष्टा च सर्वार्थैः ॥ २६९ ॥

क्षीणचतुष्कर्मांशो, वेद्यायुर्नामगोत्रवेदयिता ।
विहरति मुहूर्तकालं, देशोनां पूर्वकोटिं वा ॥ २७० ॥

तेनाभिन्नं चरमभवायु-र्दुर्भेदमनपवर्तित्वात् ।
तदुपग्रहं च वेद्यं, तत्तुल्ये नामगोत्रे च ॥ २७१ ॥

यस्य पुनः केवलिनः, कर्म भवत्यायुषोऽतिरिक्ततरम् ।
स समुद्घातं भगवा-नथ गच्छति तत्समीकर्तुम् ॥ २७२ ॥

दण्डं प्रथमे समये, कपाटमथ चोत्तरे तथा समये ।
मन्थानमथ तृतीये, लोकव्यापी चतुर्थे तु ॥ २७३ ॥

संहरति पञ्चमे त्वन्तराणि मन्थानमथ पुनः षष्ठे ।
सप्तमके तु कपाटं, संहरति ततोऽष्टमे दण्डम् ॥ २७४ ॥

औदारिकप्रयोक्ता, प्रथमाष्टमसमययोरसाविष्टः ।
मिश्रौदारिकयोक्ता, सप्तमषष्ठद्वितीयेषु ॥ २७५ ॥

कार्मणशरीरयोगी, चतुर्थके पञ्चमे तृतीये च ।
समयत्रयेऽपि तस्मिन्, भवत्यनाहारको नियमात् ॥ २७६ ॥

स समुद्घातनिवृत्तो-ऽथ मनोवाक्काययोगवान् भगवान् ।
यतियोग्ययोगयोक्ता, योगनिरोधं मुनिरुपैति ॥ २७७ ॥

पञ्चेन्द्रियोऽथ संज्ञी, यः पर्याप्तो जघन्ययोगी स्यात् ।
निरुणद्धि मनोयोगं, ततोऽप्यसंख्यातगुणहीनम् ॥ २७८ ॥

द्वीन्द्रियसाधारणयोर्वागुच्छ्वासावधो जयति तद्वत् ।
पनकस्य काययोगं, जघन्यपर्याप्तकस्याधः ॥ २७९ ॥

सूक्ष्मक्रियमप्रतिपाति, काययोगोपगस्ततो ध्यात्वा ।
विगतक्रियमनिवर्ति-त्वमुत्तरं ध्यायति परेण ॥ २८० ॥

चरमभवे संस्थानं, यादृग्यस्योच्छ्रयप्रमाणं च ।
तस्मात्त्रिभागहीना-वगाहसंस्थानपरिणाहः ॥ २८१ ॥

सोऽथ मनोवागुच्छ्वासकाययोगक्रियार्थविनिवृत्तः ।
अपरिमितनिर्जरात्मा, संसारमहार्णवोत्तीर्णः ॥ २८२ ॥

ईषद्ध्रस्वाक्षरपञ्चकोद्गिरणमात्रतुल्यकालीयाम् ।
संयमवीर्याप्तबलः, शैलेशीमेति गतलेश्यः ॥ २८३ ॥

पूर्वरचितं च तस्यां, समयश्रेण्यामथ प्रकृतिशेषम् ।
समये समये क्षपय-त्यसंख्यगुणमुत्तरोत्तरतः ॥ २८४ ॥

चरमे समये संख्या-तीतान्विनिहन्ति चरमकर्मांशान् ।
क्षपयति युगपत् कृत्स्नं, वेद्यायुर्नामगोत्रगणम् ॥ २८५ ॥

सर्वगतियोग्यसंसार-मूलकरणानि सर्वभावीनि ।
औदारिकतैजसकार्मणानि सर्वात्मना त्यक्त्वा ॥ २८६ ॥

देहत्रयनिर्मुक्तः, प्राप्यर्जुश्रेणिवीतिमस्पर्शाम् ।
समयेनैकेनाविग्रहेण गत्वोर्ध्वगतिमप्रतिघः ॥ २८७ ॥

सिद्धक्षेत्रे विमले, जन्मजरामरणरोगनिर्मुक्तः ।
लोकाग्रगतः सिध्यति, साकारेणोपयोगेन ॥ २८८ ॥

सादिकमनन्तमनुपम-मव्याबाधसुखमुत्तमं प्राप्तः ।
केवलसम्यक्त्वज्ञान-दर्शनात्मा भवति मुक्तः ॥ २८९ ॥

मुक्तः सन्नाभावः, स्वालक्षण्यात्स्वतोऽर्थसिद्धेश्च ।
भावान्तरसंक्रान्तेः, सर्वज्ञाज्ञोपदेशाच्च ॥ २९० ॥

त्यक्त्वा शरीरबन्धन-मिहैव कर्माष्टकक्षयं कृत्वा ।
न स तिष्ठत्यनिबन्धा-दनाश्रयादप्रयोगाच्च ॥ २९१ ॥

नाधो गौरवविगमा-दशक्यभावाच्च गच्छति विमुक्तः ।
लोकान्तादपि न परं, प्लवक इवोपग्रहाभावात् ॥ २९२ ॥

योगप्रयोगयोश्चा-भावात्तिर्यग् न तस्य गतिरस्ति ।
सिद्धस्योर्ध्वं मुक्तस्यालोकान्ताद् गतिर्भवति ॥ २९३ ॥

पूर्वप्रयोगसिद्धे-र्बन्धच्छेदादसंङ्गभावाच्च ।
गतिपरीणामाच्च तथा, सिद्धस्योर्ध्वं गतिः सिद्धा ॥ २९४ ॥

देहमनोवृत्तिभ्यां, भवतः शारीरमानसे दुःखे ।
तदभावस्तदभावे, सिद्धं सिद्धस्य सिद्धिसुखम् ॥ २९५ ॥

यस्तु यतिर्घटमानः, सम्यक्त्वज्ञानशीलसम्पन्नः ।
वीर्यमनिगूहमानः, शक्त्यनुरूपं प्रयत्नेन ॥ २९६ ॥

संहननायुर्बलकाल-वीर्यसम्पत्समाधिवैकल्यात् ।
कर्मातिगौरवाद्वा, स्वार्थमकृत्वोपरममेति ॥ २९७ ॥

सौधर्मादिष्वन्यत-मकेषु सर्वार्थसिद्धिचरमेषु ।
स भवति देवो वैमा-निको महर्द्धिद्युतिवपुष्कः ॥ २९८ ॥

तत्र सुरलोकसौख्यं, चिरमनुभूय स्थितिक्षयात्तस्मात् ।
पुनरपि मनुष्यलोके, गुणवत्सु मनुष्यसङ्घेषु ॥ २९९ ॥

जन्म समवाप्य कुलबन्धुविभवरूपबलबुद्धिसम्पन्नः ।
श्रद्धासम्यक्त्वज्ञान-संवरतपोबलसमग्रः ॥ ३०० ॥

पूर्वोक्तभावनाभा-वितान्तरात्मा विधूतसंसारः ।
सेत्स्यति ततः परं वा, स्वर्गान्तरितस्त्रिभवभावात् ॥ ३०१ ॥

यश्चेह जिनवरमते, गृहाश्रमी निश्चितः सुविदितार्थः ।
दर्शनशीलव्रतभा-वनाभिरभिरञ्जितमनस्कः ॥ ३०२ ॥

स्थूलवधानृतचौर्य-परस्त्रीरत्यरतिवर्जितः सततम् ।
दिग्व्रतमिह देशाव-काशिकमनर्थविरतिं च ॥ ३०३ ॥

सामायिकं च कृत्वा, पौषधमुपभोगपारिमाण्यं च ।
न्यायागतं च कल्प्यं, विधिवत्पात्रेषु विनियोज्यम् ॥ ३०४ ॥

चैत्यायतनप्रस्था-पनानि कृत्वा च शक्तितः प्रयतः ।
पूजाश्च गन्धमाल्या-धिवासधूपप्रदीपाद्याः ॥ ३०५ ॥

प्रशमरतिनित्यतृषितो, जिनगुरुसाधुजनवन्दनाभिरतः ।
संलेखनां च काले, योगेनाराध्य सुविशुद्धाम् ॥ ३०६ ॥

प्राप्तः कल्पेष्विन्द्र-त्वं सामानिकत्वमन्यद्वा ।
स्थानमुदारं तत्रा-नुभूय च सुखं तदनुरूपम् ॥ ३०७ ॥

नरलोकमेत्य सर्वगुण-सम्पदं दुर्लभां पुनर्लब्ध्वा ।
शुद्धः स सिद्धिमेष्यति, भवाष्टकाभ्यन्तरे नियमात् ॥ ३०८ ॥

इत्येवं प्रशमरतेः, फलमिह स्वर्गापवर्गयोश्च शुभम् ।
सम्प्राप्यतेऽनगारै-रगारिभिश्चोत्तरगुणाढ्यैः ॥ ३०९ ॥

जिनशासनार्णवादा-कृष्टां धर्मकथिकामिमां श्रुत्वा ।
रत्नाकरादिव जर-त्कपर्दिकामुद्धृतां भक्त्या ॥ ३१० ॥

सद्भिर्गुणदोषज्ञै-र्दोषानुत्सृज्य गुणलवा ग्राह्याः ।
सर्वात्मना च सततं, प्रशमसुखायैव यतितव्यम् ॥ ३११ ॥

यच्चासमञ्जसमिह, छन्दःशब्दसमयार्थतोऽभिहितम् ।
पुत्रापराधवन्मम, मर्षयितव्यं बुधैः सर्वम् ॥ ३१२ ॥

सर्वसुखमूलबीजं सर्वार्थविनिश्चयप्रकाशकरम् ।
सर्वगुणसिद्धिसाधन-मर्हच्छासनं जयति ॥ ३१३ ॥

अज्ञातकृता

## ॥ हृदयप्रदीप षट्त्रिंशिका ॥

शब्दादिपञ्चविषयेषु विचेतनेषु,
योऽन्तर्गतो हृदि विवेककलां व्यनक्ति ।
यस्माद् भवान्तरगतान्यपि चेष्टितानि,
प्रादुर्भवन्त्यनुभवं तमिमं भजेथाः ॥ १ ॥

जानन्ति केचिन्नतु कर्तुमीशाः कर्तुं क्षमा ये न च ते विदन्ति ।
जानन्ति तत्त्वं प्रभवन्ति कर्तुं, ते केऽपि लोके विरला भवन्ति ॥ २ ॥

सम्यग् विरक्तिर्ननु यस्य चित्ते, सम्यग् गुरुर्यस्य च तत्त्ववेत्ता ।
सदानुभूत्या दृढनिश्चयो यः, तस्यैव सिद्धिर्न हि चापरस्य ॥ ३ ॥

विग्रहं कृमिनिकायसङ्कुलं, दुःखदं हृदि विवेचयन्ति ये ।
गुप्तिबन्धमिव चेतनं हि ते, मोचयन्ति तनुयन्त्रयन्त्रितम् ॥ ४ ॥

भोगार्थमेतद् भविनां शरीरम्, ज्ञानार्थमेतत् किल योगिनां वै ।
जाता विषं चेद्विषया हि सम्यग्, ज्ञानात्ततः किं कुणपस्य पुष्ट्या ? ५

त्वङ्मांसमेदोऽस्थिपुरीषमूत्रपूर्णेऽनुरागः कुणपे कथं ते ? ।
द्रष्टा च वक्ता च विवेकरूपस्त्वमेव साक्षात् किमु मुह्यसीत्थम् ॥ ६ ॥

धनं न केषां निधनं गतं वै, दरिद्रिणः के धनिनो न दृष्टाः ।
दुःखैकहेतुनि धनेऽतितृष्णां, त्यक्त्वा सुखी स्यादिति मे विचारः ॥ ७ ॥

संसारदुःखान्न परोऽस्ति रोगः, सम्यग्विचारात् परमौषधं न ।
तद्रोगदुःखस्य विनाशनाय, सच्छास्त्रतोऽयं क्रियते विचारः ॥ ८ ॥

अनित्यताया यदि चेत् प्रतीतिस्तत्त्वस्य निष्ठा च गुरुप्रसादात् ।
सुखी हि सर्वत्र जने वने च, नो चेद्वने चाथ जनेषु दुःखी ॥ ९ ॥

मोहान्धकारे भ्रमतीह तावत्, संसारदुःखैश्च कदर्थ्यमानः ।
यावद्विवेकार्कमहोदयेन, यथास्थितं पश्यति नात्मरूपम् ॥ १० ॥

अर्थो ह्यनर्थो बहुधा मतोऽयं, स्त्रीणां चरित्राणि शबोपमानि ।
विषेण तुल्या विषयाश्च तेषां, येषां हृदि स्वात्मलयानुभूतिः ॥ ११ ॥

कार्यं च किं ते परदोषदृष्ट्या, कार्यं च किं ते परचिन्तया च ।
वृथा कथं खिद्यसि बालबुद्धे !, कुरु स्वकार्यं त्यज सर्वमन्यत् ॥ १२ ॥

यस्मिन् कृते कर्मणि सौख्यलेशो, दुःखानुबन्धस्य तथास्ति नान्तः ।
मनोऽभितापो मरणं हि यावत्, मूर्खोऽपि कुर्यात् खलु तन्न कर्म॥१३॥

यदर्जितं वै वयसाऽखिलेन, ध्यानं तपो ज्ञानमुखं च सत्यम् ।
क्षणेन सर्वं प्रदहत्यहो तत्, कामो बली प्राप्य बलं (छलं?) यतीनाम्

बलादसौ मोहरिपुर्जनानां, ज्ञानं विवेकं च निराकरोति ।
मोहाभिभूतं हि जगद्विनष्टं, तत्त्वावबोधादपयाति मोहः ॥ १५ ॥

सर्वत्र सर्वस्य सदा प्रवृत्तिर्दुःखस्य नाशाय सुखस्य हेतोः ।
तथापि दुःखं न विनाशमेति, सुखं न कस्यापि भजेत् स्थिरत्वम्॥१६॥

यत् कृत्रिमं वैषयिकादिसौख्यम्, भ्रमन् भवे को न लभेत मर्त्यः ।
सर्वेषु तच्चाधममध्यमेषु, यद् दृश्यते तत्र किमद्भुतं च ॥ १७ ॥

क्षुधातृषाकामविकाररोष-हेतुश्च तद् भेषजवद्वदन्ति ।
तदस्वतन्त्रं क्षणिकं प्रयासकृत्, यतीश्वरा दूरतरं त्यजन्ति ॥ १८ ॥

गृहीतलिङ्गस्य च चेद्धनाशा, गृहीतलिङ्गो विषयाभिलाषी ।
गृहीतलिङ्गो रसलोलुपश्चेद्, विडम्बनं नास्ति ततोऽधिकं हि ॥ १९ ॥

ये लुब्धचिता विषयार्थभोगे, बहिर्विरागा हृदि बद्धरागाः ।
ते दाम्भिका वेषधराश्च धूर्ताः, मनांसि लोकस्य तु रञ्जयन्ति ॥ २० ॥

मुग्धश्च लोकोऽपि हि यत्र मार्गे, निवेशितस्तत्र रतिं करोति ।
धूर्तस्य वाक्यैः परिमोहितानां, केषां न चित्तं भ्रमतीहलोके ॥ २१ ॥

ये निःस्पृहास्त्यक्तसमस्तरागास्तत्त्वैकनिष्ठा गलिताभिमानाः ।
सन्तोषपोषैकविलीनवाञ्छास्ते रञ्जयन्ति स्वमनो न लोकम् ॥ २२ ॥

तावद्विवादी जनरञ्जकश्च, यावन्न चैवात्मरसे सुखज्ञः ।
चिन्तामणिं प्राप्य वरं हि लोके, जने जने कः कथयन् प्रयाति ? २३

षण्णां विरोधोऽपि च दर्शनानाम्, तथैव तेषां शतशश्च भेदाः ।
नानापथे सर्वजनः प्रवृत्तः, को लोकमाराधयितुं समर्थः ? ॥ २४ ॥

तदेव राज्यं हि धनं तदेव, तपस्तदेवेह कला च सैव ।
स्वस्थे भवेच्छीतलताऽऽशये चेन्नो चेद्वृथा सर्वमिदं हि मन्ये ॥ २५ ॥

रुष्टैर्जनैः किं यदि चित्तशान्ति-स्तुष्टैर्जनैः किं यदि चित्ततापः ।
प्रीणाति नो नैव दुनोति चान्यान् स्वस्थः सदोदासपरो हि योगी ॥ २६ ॥

एकः पापात् पतति नरके, याति पुण्यात् स्वरेकः,
पुण्यापुण्यप्रचयविगमात्, मोक्षमेकः प्रयाति ।
सङ्गान्नूनं न भवति सुखं, न द्वितीयेन कार्यम्,
तस्मादेको विचरति सदानन्दसौख्येन पूर्णः ॥ २७ ॥

त्रैलोक्यमेतद् बहुभिर्जितं यैर्मनोजये तेऽपि यतो न शक्ताः ।
मनोजयस्यात्र पुरो हि तस्मात्, तृणं त्रिलोकीविजयं वदन्ति ॥ २८ ॥

मनोलयान्नास्ति परो हि योगो, ज्ञानं तु तत्त्वार्थविचारणाच्च ।
समाधिसौख्यान्न परं च सौख्यम्, संसारसारं त्रयमेतदेव ॥ २९ ॥

या सिद्धयोऽष्टावपि दुर्लभा ये, रसायनं चाञ्जनधातुवादाः ।
ध्यानानि मन्त्राश्च समाधियोगाश्चित्तेऽप्रसन्ने विषवद् भवन्ति॥ ३० ॥

विन्दन्ति तत्त्वं न यथास्थितं वै सङ्कल्पचिन्ताविषयाकुला ये ।
संसारदुःखैश्च कदर्थितानाम् स्वप्नेऽपि तेषां न समाधिसौख्यम् ३१

श्लोको वरं परमतत्त्वपथप्रकाशी, न ग्रन्थकोटिपठनं जनरञ्जनाय ।
सञ्जीवनीति वरमौषधमेकमेव, व्यर्थः श्रमप्रजननो न तु मूलभारः ३२

तावत् सुखेच्छा विषयादिभोगे, यावन्मनः स्वास्थ्यसुखं न वेत्ति ।
लब्धे मनःस्वास्थ्यसुखैकलेशे त्रैलोक्यराज्येऽपि न तस्य वाञ्छा ॥३३॥

न देवराजस्य न चक्रवर्त्तिनस्तद्वै सुखं रागयुतस्य मन्ये ।
यद्वीतरागस्य मुनेः सदात्मनिष्ठस्य चित्ते स्थिरतां प्रयाति ॥ ३४ ॥

यथा यथा कार्यशताकुलं वै कुत्रापि नो विश्रमतीह चित्तम् ।
तथा तथा तत्त्वमिदं दुरापं हृदि स्थितं सारविचारहीनैः ॥ ३५ ॥

शमसुखरसलेशात् द्वेष्यतां संप्रयाता,
विविधविषयभोगात्यन्तवाञ्छाविशेषाः ।
परमसुखमिदं यद् भुज्यतेऽन्तः समाधौ,
मनसि यदि तदा ते शिष्यते किं वदान्यत् ? ॥ ३६ ॥

पू.आ.श्रीमुनिसुन्दरसूरिविरचितः

# ॥ अध्यात्म-कल्पद्रुमः ॥

## ॥ १ ॥ समताअधिकारः

जयश्रीरान्तरारीणां, लेभे येन प्रशान्तितः ।
तं श्रीवीरजिनं नत्वा, रसः शान्तो विभाव्यते ॥ १ ॥

सर्वमङ्गलनिधौ हृदि यस्मिन्, संगते निरूपमं सुखमेति ।
मुक्तिशर्म च वशीभवति द्राक्, तं बुधा भजत शान्तरसेन्द्रम् ॥ २ ॥

समतैकलीनचित्तो, ललनापत्यस्वदेहममतामुक् ।
विषयकषायाद्यवशः शास्त्रगुणैर्दमितचेतस्कः ॥ ३ ॥

वैराग्यशुद्धधर्मा, देवादिसतत्त्वविद्विरतिधारी ।
संवरवान् शुभवृत्तिः साम्यरहस्यं भज शिवार्थिन् ! ॥ ४ ॥

चित्तबालक ! मा त्याक्षीरजस्रं भावनौषधीः ।
यत्त्वां दुर्ध्यानभूता, न छलयन्ति छलान्विषः ॥ ५ ॥

यदिन्द्रियार्थैः सकलैः सुखं स्यान्नरेन्द्रचक्रित्रिदशाधिपानाम् ।
तद्बिन्दवत्येव पुरो हि साम्यसुधाम्बुधेस्तेन तमाद्रियस्व ॥ ६ ॥

अदृष्टवैचित्र्यवशाज्जगज्जने, विचित्रकर्माशयवाग्विसंस्थुले ।
उदासवृत्तिस्थितचित्तवृत्तयः, सुखं श्रयन्ते यतयः क्षतार्तयः ॥ ७ ॥

विश्वजन्तुषु यदि क्षणमेकं, साम्यतो भजसि मानस ! मैत्रीम् ।
तत्सुखं परममत्र परत्राप्यश्नुषे न यदभूत्तव जातु ॥ ८ ॥

न यस्य मित्रं न च कोऽपि शत्रुर्निजः परो वापि न कश्चनास्ते ।
न चेन्द्रियार्थेषु रमेत चेतः, कषायमुक्तं परमः स योगी ॥ ९ ॥

भजस्व मैत्रीं जगदङ्गिराशिषु, प्रमोदमात्मन् ! गुणिषु त्वशेषतः ।
भवार्तिदीनेषु कृपारसं सदाप्युदासवृत्तिं खलु निर्गुणेष्वपि ॥ १० ॥

मैत्री परस्मिन् हितधीः समग्रे, भवेत्प्रमोदो गुणपक्षपातः ।
कृपा भवार्ते प्रतिकर्तुमीहोपेक्षैव माध्यस्थ्यमवार्यदोषे ॥ ११ ॥

परहितचिन्ता मैत्री, परदु:खविनाशिनी तथा करुणा।
परसुखतुष्टिर्मुदिता, परदोषोपेक्षणमुपेक्षा ॥ १२ ॥

मा कार्षीत्कोपि पापानि, मा चभूत्कोपि दु:खित: ।
मुच्यतां जगदप्येषा, मतिर्मैत्री निगद्यते ॥ १३ ॥

अपास्ताशेषदोषाणां, वस्तुतत्त्वावलोकिनाम् ।
गुणेषु पक्षपातो य:, स प्रमोद: प्रकीर्तित: ॥ १४ ॥

दीनेष्वार्तेषु भीतेषु, याचमानेषु जीवितम् ।
प्रतिकारपरा बुद्धि:, कारुण्यमभिधीयते ॥ १५ ॥

क्रूरकर्मसु नि:शंकं, देवतागुरुनिन्दिषु ।
आत्मशंसिषु योपेक्षा, तन्माध्यस्थ्यमुदीरितं ॥ १६ ॥

चेतनेतरगतेष्वखिलेषु, स्पर्शरूपरवगन्धरसेषु ।
साम्यमेष्यति यदा तव चेत:, पाणिगं शिवसुखं हि तदात्मन् ॥ १७ ॥

के गुणास्तव यत: स्तुतिमिच्छस्यद्‌भुतं किमकृथा मदवान् यत् ।
कैर्गता नरकभी: सुकृतैस्ते, किं जित: पितृपतिर्यदचिन्त: ॥ १८ ॥

गुणस्तवैर्यो गुणिनां परेषामाक्रोशनिन्दादिभिरात्मनश्च ।
मन: समं शीलति मोदते वा, खिद्येत च व्यत्ययत: स वेत्ता ॥ १९ ॥

न वेत्सि शत्रून् सुहृदश्च नैव, हिताहिते स्वं न परं च जन्तो ! ।
दु:खं द्विषन् वांछसि शर्म चैतन्निदानमूढ: कथमाप्स्यसीष्टम् ॥ २० ॥

कृती हि सर्वं परिणामरम्यं, विचार्य गृह्णाति चिरस्थितीह ।
भवान्तरेऽनन्तसुखाप्तये तदात्मन् किमाचारमिमं जहासि ॥ २१ ॥

निज: परो वेति कृतो विभागो, रागादिभिस्ते त्वरयस्तवात्मन् ! ।
चतुर्गतिक्लेशविधानतस्तत्, प्रमाणयन्नस्यरिनिर्मितं किम् ॥ २२ ॥

अनादिरात्मा न निज: परो वा, कस्यापि कश्चिन्न रिपु: सुहृद्वा ।
स्थिरा न देहाकृतयोऽणवश्च, तथापि साम्यं किमुपैषि नैषु ॥ २३ ॥

यथा विदां लेप्यमया न तत्त्वात्, सुखाय मातापितृपुत्रदाराः ।
तथा परेऽपीह विशीर्णतत्तदाकारमेतद्धि समं समग्रम् ॥ २४ ॥

जानन्ति कामान्निखिलाः ससंज्ञाः, अर्थं नराः केऽपि च केऽपि धर्मम् ।
जैनं च केचिद् गुरुदेवशुद्धं, केचित् शिवं केऽपि च केऽपि साम्यम्

स्निह्यन्ति तावद्धि निजा निजेषु, पश्यन्ति यावन्निजमर्थमेभ्यः ।
इमां भवेऽत्रापि समीक्ष्य रीतिं, स्वार्थे न कः प्रेत्यहिते यतेत ॥ २६ ॥

स्वप्नेन्द्रजालादिषु यद्वदाप्तै-रोषश्च तोषश्च मुधा पदार्थैः ।
तथा भवेऽस्मिन् विषयैः समस्तैरेवं विभाव्यात्मलयेऽवधेहि ॥ २७ ॥

एष मे जनयिता जननीयं, बन्धवः पुनरिमे स्वजनाश्च ।
द्रव्यमेतदिति जातममत्वो, नैव पश्यसि कृतान्तवशत्वम् ॥ २८ ॥

नो धनैः परिजनैः स्वजनैर्वा, दैवतैः परिचितैरपि मन्त्रैः ।
रक्ष्यतेऽत्र खलु कोऽपि कृतान्तान्नो विभावयसि मूढ ! किमेवम् २९ ॥

तैर्भवेऽपि यदहो सुखमिच्छंस्तस्य साधनतया प्रतिभातैः ।
मुह्यसि प्रतिकलं विषयेषु, प्रीतिमेषि न तु साम्यसतत्त्वे ॥ ३० ॥

किं कषायकलुषं कुरुषे स्वं, केषुचिन्ननु मनोऽरिधियात्मन् ! ।
तेऽपि ते हि जनकादिकरूपैरिष्टतां दधुरनन्तभवेषु ॥ ३१ ॥

याश्च शोचसि गताः किमिमे मे स्नेहला इति धिया विधुरात्मन् ! ।
तैर्भवेषु निहतस्त्वमनन्तेष्वेव तेपि निहता भवता च ॥ ३२ ॥

त्रातुं न शक्या भवदुःखतो ये, त्वया न ये त्वामपि पातुमीशाः ।
ममत्वमेतेषु दधन्मुधात्मन् ! पदे पदे किं शुचमेषि मूढ ? ॥ ३३ ॥

सचेतनाः पुद्गलपिण्डजीवा, अर्थाः परे चाणुमया द्वयेऽपि ।
दधत्यनन्तान् परिणामभावांस्तत्तेषु कस्त्वर्हति रागरोषौ ॥ ३४ ॥

## ॥ २ ॥ स्त्रीममत्वमोचनाधिकारः

मुह्यसि प्रणयचारुगिरासु, प्रीतितः प्रणयिनीषु कृतिंस्त्वम् ।
किं न वेत्सि पततां भववार्द्धौ, ता नृणां खलु शिला गलबद्धाः ॥ ३५ ॥

चर्मास्थिमज्जान्त्रवसास्त्रमांसामेध्याद्यशुच्यस्थिरपुद्गलानाम् ।
स्त्रीदेहपिण्डाकृतिसंस्थितेषु, स्कन्धेषु किं पश्यसि रम्यमात्मन् !॥३६ ॥

विलोक्य दूरस्थममेध्यमल्पं, जुगुप्ससे मोटितनासिकस्त्वम् ।
भृतेषु तेनैव विमूढ ! योषावपुःषु तत्किं कुरुषेऽभिलाषम् ॥ ३७ ॥

अमेध्यमांसास्त्रवसात्मकानि, नारीशरीराणि निषेवमाणाः ।
इहाप्यपत्यद्रविणादिचिन्तातापान् परत्रेयूरति दुर्गतीश्च ॥ ३८ ॥

अङ्गेषु येषु परिमुह्यसि कामिनीनां,
चेतः प्रसीद विश च क्षणमन्तरेषाम् ।
सम्यक् समीक्ष्य विरमाशुचिपिण्डकेभ्य-
स्तेभ्यश्च शुच्यशुचिवस्तुविचारमिच्छत् ॥ ३९ ॥

विमुह्यसि स्मेरदृशः सुमुख्या मुखेक्षणादीन्यभिवीक्षमाणः ।
समीक्षसे नो नरकेषु तेषु, मोहोद्भवा भाविकदर्थनास्ताः ॥ ४० ॥

अमेध्यभस्त्रा बहुरन्ध्रनिर्यन्मलाविलोद्यत्कृमिजालकीर्णा ।
चापल्यमायानृतवञ्चिका स्त्री, संस्कारमोहान्नरकाय भुक्ता ॥ ४१ ॥

निर्भूमिर्विषकन्दली गतदरी व्याघ्री निराह्वो महा-
व्याधिर्मृत्युरकारणश्च ललनाऽनभ्रा च वज्राशनिः ।
बन्धुस्नेहविघातसाहसमृषावादादिसंतापभूः,
प्रत्यक्षापि च राक्षसीति बिरुदैः ख्याताऽऽगमे त्यज्यताम् ॥ ४२ ॥

## ॥ ३ ॥ अपत्यममत्वमोचनाधिकारः

मा भूरपत्यान्यवलोकमानो, मुदाकुलो मोहनृपारिणा यत् ।
चिक्षिप्सया नारकचारकेऽसि, दृढं निबद्धो निगडैरमीभिः ॥ ४३ ॥

आजीवितं जीव ! भवान्तरेऽपि वा, शल्यान्यपत्यानि न वेत्सि किं हृदि ।
चलाचलैर्ये विविधार्तिदानतोऽनिशं निहन्येत समाधिरात्मनः ॥ ४४ ॥

कुक्षौ युवत्याः कृमयो विचित्रा, अप्यस्रशुक्रप्रभवा भवन्ति ।
न तेषु तस्या न हि तत्पतेश्च, रागस्ततोऽयं किमपत्यकेषु ॥ ४५ ॥

त्राणाशक्तेरापदि संबन्धानन्त्यतो मिथोऽङ्गवताम् ।
संदेहाच्चोपकृतेर्मापत्येषु स्निह्यो जीव ॥ ४६ ॥

## ॥ ४ ॥ धनममत्वमोचनाधिकारः

याः सुखोपकृतिकृत्त्वधिया त्वं मेलयन्नसि रमा ममताभाक् ।
पाप्मनोऽधिकरणत्वत एता, हेतवो ददति संसृतिपातम् ॥ ४७ ॥

यानि द्विषामप्युपकारकाणि, सर्पोन्दुरादिष्वपि यैर्गतिश्च ।
शक्या च नापन्मरणामयाद्या, हन्तुं धनेष्वेषु क एव मोहः ॥ ४८ ॥

ममत्वमात्रेण मनःप्रसादसुखं धनैरल्पकमल्पकालम् ।
आरम्भपापैः सुचिरं तु दुःखं, स्याद्दुर्गतौ दारुणमित्यवेहि ॥ ४९ ॥

द्रव्यस्तवात्मा धनसाधनो न, धर्मोऽपि सारम्भतयातिशुद्धः ।
निःसङ्गतात्मा त्वतिशुद्धियोगात्, मुक्तिश्रियं यच्छति तद्भवेपि ५० ॥

क्षेत्रवास्तुधनधान्यगवाश्वैर्मेलितैः सनिधिभिस्तनुभाजाम् ।
क्लेशपापनरकाभ्यधिकः स्यात्को गुणो न यदि धर्मनियोगः ॥ ५१ ॥

आरम्भैर्भरितो निमज्जति यतः प्राणी भवाम्भोनिधा-
वीहन्ते कुनृपादयश्च पुरुषा येन च्छलाद् बाधितुम् ।

चिन्ताव्याकुलताकृतेश्च हरते यो धर्मकर्मस्मृतिं,
विज्ञा ! भूरिपरिग्रहं त्यजत तं भोग्यं परैः प्रायशः ॥ ५२ ॥

क्षेत्रेषु नो वपसि यत्सदपि स्वमेतद्यातासि तत्परभवे किमिदं गृहीत्वा ।
तस्यार्जनादिजनिताघचयार्जितात्ते भावी कथं नरकदुःखभराच्च मोक्षः५३

## ॥ ५ ॥ देहममत्वमोचनाधिकारः ।

पुष्णासि यं देहमघान्यचिन्तयंस्तवोपकारं कमयं विधास्यति ।
कर्माणि कुर्वन्निति चिन्तयायतिं, जगत्ययं वञ्चयते हि धूर्त्तराट् ५४

कारागृहाद्बहुविधाशुचितादिदुःखा-न्निर्गन्तुमिच्छति जडोपि ही तद्विभिद्य
क्षिप्तस्ततोऽधिकारे वपुषि स्वकर्मव्रातेन तद्द्रढयितुं यतसे किमात्मन्

चेद्वाञ्छसीदमवितुं परलोकदुःख-
भीत्या ततो न कुरुषे किमु पुण्यमेव ।
शक्यं न रक्षितुमिदं हि च दुःखभीतिः
पुण्यं विना क्षयमुपैति न वज्रिणोपि ॥ ५६ ॥

देहे विमुह्य कुरुषे किमघं न वेत्सि, देहस्थ एव भजसे भवदुःखजालम्
लोहाश्रितो हि सहते घनघातमग्निर्बाधा न तेऽस्य च नभोवदनाश्रयत्वे

दुष्टः कर्मविपाकभूपतिवशः कायाह्वयः कर्मकृत्,
बद्ध्वा कर्मगुणैर्हृषिकचषकैः पीतप्रमादासवम् ।
कृत्वा नारकचारकापदुचितं त्वां प्राप्य चाशु च्छलं,
गन्तेति स्वहिताय संयमभरं तं वाहयाल्पं ददत् ॥ ५८ ॥

यतः शुचीन्यप्यशुचीभवन्ति कृम्याकुलात्काकशुनादिभक्ष्यात् ।
द्रागभाविनो भस्मतया ततोऽङ्गात्, मांसादिपिण्डात् स्वहितं गृहाण५९

परोपकारोस्ति तपो जपो वा, विनश्वराद्यस्य फलं न देहात् ।
सभाटकादल्पदिनाप्तगेहमृत्पिण्डमूढः फलमश्नुते किम् ॥ ६० ॥

मृत्पिण्डरूपेण विनश्वरेण, जुगुप्सनीयेन गदालयेन।
देहेन चेदात्महितं सुसाधं, धर्मान्न किं तद्यतसेऽत्र मूढ ! ॥ ६१ ॥

## ॥ ६.॥ विषयप्रमादत्यागाधिकारः

अत्यल्पकल्पितसुखाय किमिन्द्रियार्थैस्त्वं मुह्यसि प्रतिपदं प्रचुरप्रमादः।
एते क्षिपन्ति गहने भवभीमकक्षे जन्तून्न यत्र सुलभा शिवमार्गदृष्टिः६२

आपातरम्ये परिणामदुःखे, सुखे कथं वैषयिके रतोऽसि।
जडोऽपि कार्यं रचयन् हितार्थी, करोति विद्वन् ! यदुदर्कतर्कम् ६३ ॥

यदिन्द्रियार्थैरिह शर्म बिन्दुवद्यदर्णवत्स्वःशिवगं परत्र च।
तयोर्मिथोऽस्ति प्रतिपक्षता कृतिन् ! विशेषदृष्ट्यान्यतरद् गृहाण तत्६४

भुङ्क्ते कथं नारकतिर्यगादिदुःखानि देहीत्यवधेहि शास्त्रैः।
निवर्तते ते विषयेषु तृष्णा, बिभेषि पापप्रचयाच्च येन ॥ ६५ ॥

गर्भवासनरकादिवेदनाः, पश्यतोऽनवरतं श्रुतेक्षणैः।
नो कषायविषयेषु मानसं, श्लिष्यते बुध ! विचिन्तयेति ताः ॥ ६६ ॥

वध्यस्य चौरस्य यथा पशोर्वा, संप्राप्यमाणस्य पदं वधस्य।
शनैः शनैरेति मृतिः समीपं, तथाखिलस्येति कथं प्रमादः ॥ ६७ ॥

बिभेषि जन्तो ! यदि दुःखराशेस्तदिन्द्रियार्थेषु रतिं कृथा मा।
तदुद्भवं नश्यति शर्म यदद्राक्, नाशे च तस्य ध्रुवमेव दुःखम् ६८

मृतः किमु प्रेतपतिर्दुरामया, गताः क्षयं किं नरकाश्च मुद्रिताः।
ध्रुवाः किमायुर्धनदेहबन्धवः, सकौतुको यद्विषयैर्विमुह्यसि ॥ ६९ ॥

विमोह्यसे किं विषयप्रमादैर्भ्रमात्सुखस्यायतिदुःखराशेः।
तद्गर्धमुक्तस्य हि यत्सुखं ते गतोपमं चायतिमुक्तिदं तत् ॥ ७० ॥

## ॥ ७ ॥ कषायत्यागाधिकारः

रे जीव ! सेहिथ सहिष्यसि च व्यथास्ता-
स्त्वं नारकादिषु पराभवभूः कषायैः ।
मुग्धोदितैः कुवचनादिभिरप्यतः किं,
क्रोधान्निहंसि निजपुण्यधनं दुरापम् ॥ ७१ ॥

पराभिभूतौ यदि मानमुक्तिस्ततस्तपोऽखण्डमतः शिवं वा ।
मानादृतिर्दुर्वचनादिभिश्चेत्तपःक्षयत्तन्नरकादि दुःखम् ॥ ७२ ॥

वैरादि चात्रेति विचार्य लाभालाभौ कृतिन्नाभवसंभविन्याम् ।
तपोऽथवा मानमवाभिभूताविहास्ति नूनं हि गतिर्द्विधैव ॥ ७३ ॥

श्रुत्वाक्रोशान् यो मुदा पूरितः स्यात् लोष्टाद्यैर्यश्चाहतो रोमहर्षी ।
यः प्राणान्तेऽप्यन्यदोषं न पश्यत्येष श्रेयो द्राग् लभेतैव योगी॥ ७४ ॥

को गुणस्तव कदा च कषायैर्निर्ममे भजसि नित्यमिमान् यत् ।
किं न पश्यसि दोषममीषां, तापमत्र नरकं च परत्र ॥ ७५ ॥

यत्कषायजनितं तव सौख्यं, यत्कषायपरिहानिभवं च ।
तद्विशेषमथवैतदुदर्कं, संविभाव्य भज धीर ! विशिष्टम् ॥ ७६ ॥

सुखेन साध्या तपसां प्रवृत्तिर्यथा तथा नैव तु मानमुक्तिः ।
आद्या न दत्तेऽपि शिवं परा तु, निदर्शनाद् बाहुबलेः प्रदत्ते ॥ ७७ ॥

सम्यग्विचार्येति विहाय मानं, रक्षन् दुरापाणि तपांसि यत्नात् ।
मुदा मनीषी सहतेऽभिभूतीः, शूरः क्षमायामपि नीचजाताः ॥ ७८ ॥

पराभिभूत्याल्पिकयापि कुप्यस्यघैरपीमां प्रतिकर्तुमिच्छन् ।
न वेत्सि तिर्यङ्नरकादिकेषु, तास्तैरनन्तास्त्वतुला भवित्रीः ॥ ७९ ॥

धत्से कृतिन् ! यद्यपकारकेषु, क्रोधं ततो धेह्यरिषट्क एव ।
अथोपकारिष्वपि तद्भवार्तिकृत्कर्महन्मित्रबहिर्द्विषत्सु ॥ ८० ॥

अधीत्यनुष्ठानतपःशमाद्यान्, धर्मान् विचित्रान् विदधत्समायान् ।
न लप्स्यसे तत्फलमात्मदेहक्लेशाधिकं तांश्च भवान्तरेषु ॥ ८१ ॥

सुखाय धत्से यदि लोभमात्मनो, ज्ञानादिरत्नत्रितये विधेहि तत् ।
दुःखाय चेदत्र परत्र वा कृतिन् ! परिग्रहे तद्बहिरान्तरेऽपि च॥ ८२ ॥

करोषि यत्प्रेत्यहिताय किञ्चित्, कदाचिदल्पं सुकृतं कथञ्चित् ।
मा जीहरस्तन्मदमत्सराद्यैर्विना च तन्मा नरकातिथिर्भूः ॥ ८३ ॥

पुरापि पापैः पतितोऽसि संसृतौ, दधासि रे किं गुणिमत्सरं पुनः ।
न वेत्सि किं घोरजले निपात्यसे, नियन्त्र्यसे शृङ्खलया च सर्वतः ८४ ॥

कष्टेन धर्मो लवशो मिलत्ययं, क्षयं कषायैर्युगपत्प्रयाति च ।
अतिप्रयत्नार्जितमर्जुनं ततः, किमङ्ग ! ही हारयसे नभस्वता ॥ ८५ ॥

शत्रूभवन्ति सुहृदः कलुषीभवन्ति,
धर्मा यशांसि निचितायशसीभवन्ति ।
स्निह्यन्ति नैव पितरोऽपि च बान्धवाश्च,
लोकद्वयेऽपि विपदो भविनां कषायैः ॥ ८६ ॥

रूपलाभकुलविक्रमविद्याश्रीतपोवितरणप्रभुताद्यैः ।
किं मदं वहसि वेत्सि न, मूढाऽनन्तशः स्वभृशलाघवदुःखम् ८७ ॥

विना कषायान्न भवार्त्तिराशिर्भवेद्भवेदेव च तेषु सत्सु ।
मूलं हि संसारतरोः कषायास्तत्तान् विहायैव सुखी भवात्मन् ! ८८ ॥

समीक्ष्य तिर्यङ्नरकादिवेदनाः, श्रुतेक्षणैर्धर्मदुरापतां तथा ।
प्रमोदसे यद्विषयैः सकौतुकैस्ततस्तवात्मन् ! विफलैव चेतना॥ ८९ ॥

चौरैस्तथा कर्मकरैर्गृहीते, दुष्टैः स्वमात्रेऽप्युपतप्यसे त्वम् ।
पुष्टैः प्रमादैस्तनुभिश्च पुण्यधनं न किं वेत्स्यपि लुट्यमानम् ॥ ९० ॥

मृत्योः कोऽपि न रक्षितो न जगतो दारिद्र्यमुत्त्रासितं,
रोगस्तेननृपादिजा न च भियो निर्णाशिताः षोडश ।

विध्वस्ता नरका न नापि सुखिता धर्मैस्त्रिलोकी सदा,
तत्को नाम गुणो मदश्च विभुता का ते स्तुतीच्छा च का ॥ ९१ ॥

## ॥ ८ ॥ शास्त्रगुणाधिकारः

शिलातलाभे हृदि ते वहन्ति, विशन्ति सिद्धान्तरसा न चान्तः ।
यदत्र नो जीवदयार्द्रता ते, न भावनाङ्कुरततिश्च लभ्या ॥ ९२ ॥

यस्यागमाम्भोदरसैर्न धौतः, प्रमादपङ्कः स कथं शिवेच्छुः ।
रसायनैर्यस्य गदः क्षतो नो, सुदुर्लभं जीवितमस्य नूनम् ॥ ९३ ॥

अधीतिनोऽर्चादिकृते जिनागमः, प्रमादिनो दुर्गतिपापतेर्मुधा ।
ज्योतिर्विमूढस्य हि दीपपातिनो, गुणाय कस्मै शलभस्य चक्षुषी ९४

मोदन्ते बहुतर्कतर्कणचणाःकेचिज्जयाद्वादिनां,
काव्यैः केचन कल्पितार्थघटनैस्तुष्टाः कविख्यातितः ।
ज्योतिर्नाटकनीतिलक्षणधनुर्वेदादिशास्त्रैः परे,
ब्रूमः प्रेत्यहिते तु कर्मणि जडान् कुक्षिभरीनेव तान् ॥ ९५ ॥

किं मोदसे पण्डितनाममात्रात्, शास्त्रेष्वधीती जनरञ्जकेषु ।
तत्किञ्चनाधीष्व कुरुष्व चाशु, न ते भवेद्येन भवाब्धिपातः ॥ ९६ ॥

धिगागमैर्माद्यसि रञ्जयन् जनान्, नोद्यच्छसि प्रेत्यहिताय संयमे ।
दधासि कुक्षिभरिमात्रतां मुने ! क्व ते क्व तत् क्वैष च ते भवान्तरे ९७ ॥

धन्याः केऽप्यनधीतिनोऽपि सदनुष्ठानेषु बद्धादरा,
दुःसाध्येषु परोपदेशलवतः श्रद्धानशुद्धाशयाः ।
केचित्त्वागमपाठिनोऽपि दधतस्तत्पुस्तकान् येऽलसाः
अत्रामुत्रहितेषु कर्मसु कथं ते भाविनः प्रेत्यहाः ॥ ९८ ॥

धन्यः स मुग्धमतिरप्युदितार्हदाज्ञा-
रागेण यः सृजति पुण्यमदुर्विकल्पः ।

पाठेन किं व्यसनतोऽस्य तु दुर्विकल्पै-
र्यो दुस्थितोऽत्र सदनुष्ठितिषु प्रमादी ॥ ९९ ॥

अधीतिमात्रेण फलन्ति नागमाः, समीहितैर्जीव सुखैर्भवान्तरे।
स्वनुष्ठितैः किन्तु तदीरितैः खरो, न यत्सिताया वहनश्रमात्सुखी १००

दुर्गन्धतो यदणुतोपि पुरस्य मृत्युरायूंषि सागरमितान्यनुपक्रमाणि।
स्पर्शः खरः क्रकचतोऽतितमामितश्च दुःखांवनन्तगुणितौ भृशशैत्यतापौ

तीव्राव्यथाः सुरकृता विविधाश्च यत्राक्रन्दारवैः सततमभ्रभृतोऽप्यमुष्मात्।
किं भाविनो न नरकात्कुमते ! बिभेषि यन्मोदसे क्षणसुखैर्विषयैः कषायी

बन्धोऽनिशं वाहनताडनानि, क्षुत्तृड्दुरामातपशीतवाताः।
निजान्यजातीयभयापमृत्युदुःखानि तिर्यक्ष्विति दुस्सहानि ॥ १०३ ॥

मुधान्यदास्याभिभवाभ्यसूया, भियोऽन्तगर्भस्थितिदुर्गतीनाम्।
एवं सुरेष्वप्यसुखानि नित्यं, किं तत्सुखैर्वा परिणामदुःखैः ॥ १०४ ॥

सप्तभीत्यभिभवेष्टविप्लवानिष्टयोगगददुःसुतादिभिः।
स्याच्चिरं विरसता नृजन्मनः, पुण्यतः सरसतां तदानय ॥ १०५ ॥

इति चतुर्गतिदुःखततीः कृतिन्नतिभयास्त्वमनन्तमनेहसम्।
हृदि विभाव्य जिनोक्तकृतान्ततः, कुरु तथा न यथा स्युरिमास्तव १०६

आत्मन्! परस्त्वमसि साहसिकः श्रुताक्षैर्यद्भाविनं चिरचतुर्गतिदुःखराशिम्
पश्यन्नपीह न बिभेषि ततो न तस्य, विच्छित्तये च यतसे विपरीतकारी

## ॥ ९ ॥ चित्तदमनाधिकारः

कुकर्मजालैः कुविकल्पसूत्रजैर्निबध्य गाढं नरकाग्निभिश्चिरम्।
विसारवत् पक्ष्यति जीव ! हे मनःकैवर्तकस्त्वामिति मास्य विश्वसीः

चेतोर्थये मयि चिरत्नसख ! प्रसीद,
किं दुर्विकल्पनिकरैः क्षिपसे भवे माम्।

बद्धोञ्जलिःकुरु कृपां भज सद्विकल्पान्,
मैत्रीं कृतार्थय यतो नरकाद् बिभेमि ॥ १०९ ॥

स्वर्गापवर्गौ नरकं तथान्तर्मुहूर्तमात्रेण वशावशं यत् ।
ददाति जन्तोः सततं प्रयत्नात्, वशं तदन्तःकरणं कुरुष्व ॥ ११० ॥

सुखाय दुःखाय च नैव देवा, न चापि कालः सुहृदोऽरयो वा ।
भवेत्परं मानसमेव जन्तोः, संसारचक्रभ्रमणैकहेतुः ॥ १११ ॥

वशं मनो यस्य समाहितं स्यात्, किं तस्य कार्यं नियमैर्यमैश्च ? ।
हतं मनो यस्य च दुर्विकल्पैः, किं तस्य कार्यं नियमैर्यमैश्च ? ॥ ११२

दानश्रुतध्यानतपोऽर्चनादि, वृथा मनोनिग्रहमन्तरेण ।
कषायचिन्ताकुलतोज्झितस्य, परो हि योगो मनसो वशत्वम्॥ ११३ ॥

जपो न मुक्त्यै न तपो द्विभेदं, न संयमो नापि दमो न मौनम् ।
न साधनाद्यं पवनादिकस्य, किन्त्वेकमन्तःकरणं सुदान्तम् ॥ ११४ ॥

लब्ध्वापि धर्मं सकलं जिनोदितं, सुदुर्लभं पोतनिभं विहाय च ।
मनःपिशाचग्रहिलीकृतः पतन्, भवाम्बुधौ नायतिदृग् जडो जनः ११५

सुदुर्जयं ही रिपुवत्यदो मनो, रिपूकरोत्येव च वाक्तनू अपि ।
त्रिभिर्हतस्तद्रिपुभिः करोतु किं, पदीभवन् दुर्विपदां पदे पदे॥ ११६ ॥

रे चित्त ! वैरि ! तव किं नु मयापराद्धं,
यद्दुर्गतौ क्षिपसि मां कुविकल्पजालैः ।
जानासि मामयमपास्य शिवेऽस्ति गन्ता,
तत्किं न सन्ति तव वासपदं ह्यसंख्याः ॥ ११७ ॥

पूतिश्रुतिः श्वेव रतेर्विदूरे, कुष्ठीव संपत्सुदृशामनर्हः ।
श्वपाकवत्सद्गतिमन्दिरेषु, नार्हेत्प्रवेशं कुमनोहतोङ्गी ॥ ११८ ॥

तपोजपाद्याः स्वफलाय धर्मा, न दुर्विकल्पैर्हतचेतसः स्युः ।
तत्खाद्यपेयैः सुभृतेऽपि गेहे, क्षुधातृषाभ्यां म्रियते स्वदोषात्॥ ११९ ॥

अकृच्छ्रसाध्यं मनसो वशीकृतात्, परं च पुण्यं, न तु यस्य तद्वशम्।
स वञ्चितः पुण्यचयैस्तदुद्भवैः, फलैश्च ही! ही! हतकः करोतु किम्?

अकारणं यस्य च दुर्विकल्पैर्हतं मनः शास्त्रविदोपि नित्यम्।
घोरैरघैर्निश्चितनारकायुर्मृत्यौ प्रयाता नरके स नूनम् ॥ १२१ ॥

योगस्य हेतुर्मनसः समाधिः, परं निदानं तपसश्च योगः।
तपश्च मूलं शिवशर्मवल्ल्या, मनःसमाधिं भज तत्कथञ्चित् ॥ १२२ ॥

स्वाध्याययोगैश्चरणक्रियासु, व्यापारणैर्द्वादशभावनाभिः।
सुधीस्त्रियोगीसदसत्प्रवृत्तिफलोपयोगैश्च मनो निरुन्ध्यात् ॥ १२३ ॥

भावनापरिणामेषु, सिंहेष्विव मनोवने।
सदा जाग्रत्सु दुर्ध्यानसूकरा न विशन्त्यपि ॥ १२४ ॥

## ॥ १० ॥ वैराग्योपदेशाधिकारः

किं जीव! माद्यसि हसस्ययमीहसेऽर्थान्,
कामांश्च खेलसि तथा कुतुकैरशङ्कः।
चिक्षिप्सु घोरनरकावटकोटरे त्वा-
मभ्यापतल्लघु विभावय मृत्युरक्षः ॥ १२५ ॥

आलम्बनं तव लवादिकुठारघाताः,
छिन्दन्ति जीविततरुं न हि यावदात्मन्!।
तावद्यतस्व परिणामहिताय तस्मिन्,
छिन्ने हि कः क्व च कथं भविता स्वतन्त्रः ॥ १२६ ॥

त्वमेव मोग्धा मतिमान् त्वमात्मन्! नेष्टाप्यनेष्टा सुखदुःखयोस्त्वम्।
दाता च भोक्ता च तयोस्त्वमेव, तच्चेष्टसे किं? न यथा हितासि:१२७

कस्ते निरञ्जन! चिरं जनरञ्जनेन, धीमन्! गुणोस्ति परमार्थदृशेति पश्य।
तं रञ्जयाशुचरितैर्विशदैर्भवाब्धौ, यस्त्वां पतन्तमबलं परिपातुमीष्टे १२८

विद्वानहं सकललब्धिरहं नृपोऽहं दाताहमद्भुतगुणोऽहमहं गरीयान् ।
इत्याद्यहंकृतिवशात्परितोषमेषि नो वेत्सि किं परभवे लघुतां भवित्रीम्

वेत्सि स्वरूपफलसाधनबाधनानि,
धर्मस्य, तं प्रभवसि स्ववशश्च कर्तुम् ।
तस्मिन् यतस्व मतिमन्नधुनेत्यमुत्र,
किञ्चित्त्वया हि नहि सेत्स्यति भोत्स्यते वा ॥ १३० ॥

धर्मस्याऽवसरोऽस्ति पुद्गलपरावर्तैरनन्तैस्तवाऽऽ-
यातः संप्रति जीव हे प्रसहतो दुःखान्यनन्तान्ययम् ।
स्वल्पाहः पुनरेष दुर्लभतमश्चास्मिन् यतस्वार्हतो,
धर्मं कर्तुमिमं विना हि न हि ते दुःखक्षयः कर्हिचित् ॥ १३१ ॥

गुणस्तुतीर्वाञ्छसि निर्गुणोऽपि सुखप्रतिष्ठादि विनापि पुण्यम् ।
अष्टाङ्गयोगं च विनापि सिद्धीर्वातूलता कापि नवा तवात्मन् ॥ १३२ ॥

पदे पदे जीव ! पराभिभूतीः, पश्यन् किमीर्ष्यस्यधमः परेभ्यः ।
अपुण्यमात्मानमवैषि किं न, तनोषि किं वा नहि पुण्यमेव ॥ १३३ ॥

किमर्दयन्निर्दयमङ्गिनो लघून्, विचेष्टसे कर्मसु ही प्रमादतः ।
यदेकशोऽप्यन्यकृतार्दनः सहत्यनन्तशोऽप्यंग्ययमर्दनं भवे ॥ १३४ ॥

यथा सर्पमुखस्थोऽपि, भेको जन्तूनि भक्षयेत् ।
तथा मृत्युमुखस्थोऽपि, किमात्मन्नर्दसेऽगिनः ॥ १३५ ॥

आत्मानमल्पैरिह वञ्चयित्वा, प्रकल्पितैर्वा तनुचित्तसौख्यैः ।
भवाधमे किं जन ! सागराणि, सोढासि ही नारकदुःखराशीन् ॥ १३६ ॥

उरभ्रकाकिण्युदबिन्दुकाम्रवणिक्त्रयीशाकटभिक्षुकाद्यैः ।
निदर्शनैर्हारितमर्त्यजन्मा, दुःखी प्रमादैर्बहु शोचितासि ॥ १३७ ॥

पतङ्गभृङ्गैणखगाहिमीनद्विपद्विपारिप्रमुखाः प्रमादैः ।
शोच्या यथा स्युर्मृतिबन्धदुःखैश्चिराय भावी त्वमपीति जन्तो ! १३८

पुरापि पापैः पतितोऽसि दुःखराशौ पुनर्मूढ ! करोषि तानि ।
मज्जन्महापङ्किलवारिपूरे, शिला निजे मूर्ध्नि गले च धत्से ॥ १३९ ॥

पुनः पुनर्जीव ! तवोपदिश्यते, बिभेषि दुःखात्सुखमीहसेच चेत् ।
कुरूष्व तत्किञ्चन येन वाञ्छितं, भवेत्तवास्तेऽवसरोऽयमेव यत् १४०

धनाङ्गसौख्यस्वजनानसूनपि, त्यज त्यजैकं न च धर्ममार्हतम् ।
भवन्ति धर्माद्धि भवे भवेऽर्थितान्यमून्यमीभिः पुनरेष दुर्लभः ॥ १४१ ॥

दुःखं यथा बहुविधं सहसेऽप्यकामः,
कामं तथा सहसि चेत्करुणादिभावैः ।
अल्पीयसापि तव तेन भवान्तरे स्या-
दात्यन्तिकी सकलदुःखनिवृत्तिरेव ॥ १४२ ॥

प्रगल्भसे कर्मसु पापकेष्वरे, यदाशया शर्म न तद्विनानितम् ।
विभावयंस्तच्च विनश्वरं द्रुतं, बिभेषि किं दुर्गतिदुःखतो नहि ? १४३

कर्माणि रे जीव ! करोषि तानि यैस्ते भवित्र्यो विपदो ह्यनन्ताः ।
ताभ्यो भिया तद्दधसेऽधुना किं ? संभाविताभ्योऽपि भृशाकुलत्वम्

ये पालिता वृद्धिमिताः सहैव, स्निग्धा भृशं नेहपदं च ये ते ।
यमेन तानप्यदयं गृहीतान्, ज्ञात्वापि किं न त्वरसे हिताय ?॥ १४५ ॥

यैः क्लिश्यसे त्वं धनबन्ध्वपत्ययशःप्रभुत्वादिभिराशयस्थैः ।
कियानिह प्रेत्य च तैर्गुणस्ते, साध्यः किमायुश्च विचारयैवम्॥ १४६ ॥

किमु मुह्यसि गत्वरैः पृथक्, कृपणैर्बन्धुवपुःपरिग्रहैः ।
विमृशस्व हितोपयोगिनोऽवसरेऽस्मिन् परलोकपान्थ ! रे ॥ १४७ ॥

सुखमास्से सुखं शेषे, भुङ्क्षे पिबसि खेलसि ।
न जाने त्वग्रतः पुण्यैर्विना ते किं भविष्यति ? ॥ १४८ ॥

शीतात्तापान्मक्षिकाकत्तृणादिस्पर्शाद्युत्थात्कष्टतोऽल्पाद् बिभेषि ।
तास्ताश्चैभिः कर्मभिः स्वीकरोषि श्वभ्रादीनां वेदना धिग् धियं ते १४९

क्वचित्कषायैः क्वचन प्रमादैः, कदाग्रहैः क्वापि च मत्सराद्यैः।
आत्मानमात्मन्! कलुषीकरोषि, बिभेषि धिङ्नो नरकादधर्मा॥ १५०॥

## ॥ ११ ॥ धर्मशुद्ध्युपदेशाधिकारः

भवेद्भवापायविनाशनाय यः, तमज्ञ! धर्मं कलुषीकरोषि किम्?।
प्रमादमानोपधिमत्सरादिभिर्न मिश्रितं ह्यौषधमामयापहम् ॥ १५१॥

शैथिल्यमात्सर्यकदाग्रहक्रुधोऽनुतापदम्भाविधिगौरवाणि च।
प्रमादमानौ कुगुरुः कुसंगतिः, श्लाघार्थिता वा सुकृते मला इमे १५२

यथा तवेष्टा स्वगुणप्रशंसा, तथा परेषामिति मत्सरोज्झी।
तेषामिमां संतनु यल्लभेथास्तां नेष्टदानादि विनेष्टलाभः ॥ १५३॥

जनेषु गृह्णत्सु गुणान् प्रमोदसे, ततो भवित्री गुणरिक्तता तव।
गृह्णत्सु दोषान् परितप्यसे च चेद्, भवन्तु दोषास्त्वयि सुस्थिरास्ततः१५४

प्रमोदसे स्वस्य यथान्यनिर्मितैः, स्तवैस्तथा चेत्प्रतिपन्थिनामपि।
विगर्हणैः स्वस्य यथोपतप्यसे, तथा रिपूणामपि चेत्ततोऽसि वित्१५५

स्तवैर्यथा स्वस्य विगर्हणैश्च, प्रमोदतापौ भजसे तथा चेत्।
इमौ परेषामपि तैश्चतुर्ष्वप्युदासतां वासि ततोऽर्थवेदी ॥ १५६॥

भवेन्न कोऽपि स्तुतिमात्रतो गुणी, ख्यात्या न बह्व्यापि हितं परत्र च।
तदिच्छुरीर्ष्यादिभिरायतिं ततो, मुधाभिमानग्रहिलो निहंसि किम् १५७

सृजन्ति के के न बहिर्मुखा जनाः। प्रमादमात्सर्यकुबोधविप्लुताः।
दानादिधर्माणि मलीमसान्यमून्युपेक्ष्य शुद्धं सुकृतं चराऽण्वपि १५८

आच्छादितानि सुकृतानि यथा दधन्ते, सौभाग्यमत्र न तथा प्रकटीकृतानि
व्रीडानताननसरोजसरोजनेत्रावक्षःस्थलानि कलितानि यथा दुकूलैः १५९

स्तुतैः श्रुतैर्वाप्यपरैर्निरीक्षितैर्गुणस्तवात्मन्! सुकृतैर्न कश्चन।
फलन्ति नैव प्रकटीकृतैर्भुवो, द्रुमा हि मूलैर्निपतन्त्यपि त्वधः॥ १६०॥

तपःक्रियावश्यकदानपूजनैः, शिवं न गन्ता गुणमत्सरी जनः ।
अपथ्यभोजी न निरामयो भवेद्रसायनैरप्यतुलैर्यदातुरः ॥ १६१ ॥

मन्त्रप्रभारत्नरसायनादिनिदर्शनादल्पमपीह शुद्धम् ।
दानार्चनावश्यकपौषधादि, महाफलं पुण्यमितोऽन्यथान्यत् ॥ १६२ ॥

दीपो यथाल्पोऽपि तमांसि हन्ति, लवोऽपि रोगान् हरते सुधायाः ।
तृण्यां दहत्याशु कणोऽपि चाग्नेर्धर्मस्य लेशोऽप्यमलस्तथांहः॥ १६३ ॥

भावोपयोगशून्याः, कुर्वन्नावश्यकीः क्रियाः सर्वाः ।
देहक्लेशं लभसे, फलमाप्स्यसि नैव पुनरासाम् ॥ १६४ ॥

## ॥ १२ ॥ देवगुरुधर्मशुद्ध्यधिकारः

तत्त्वेषु सर्वेषु गुरुः प्रधानं, हितार्थधर्मा हि तदुक्तिसाध्याः ।
श्रयंस्तमेवेत्यपरीक्ष्य मूढ !, धर्मप्रयासान् कुरुषे वृथैव ॥ १६५ ॥

भवी न धर्मैरविधिप्रयुक्तैर्गमी शिवं येषु गुरुर्न शुद्धः ।
रोगी हि कल्यो न रसायनैस्तैर्येषां प्रयोक्ता भिषगेव मूढः ॥ १६६ ॥

समाश्रितस्तारकबुद्धितो यो, यस्यास्त्यहो मज्जयिता स एव ।
ओघं तरीता विषमं कथं स, तथैव जन्तुः कुगुरोर्भवाब्धिम् ॥ १६७ ॥

गजाश्वपोतोक्षरथान् यथेष्टपदाप्तये भद्र ! निजान् परान् वा ।
भजन्ति विज्ञाः सुगुणान् भजैवं, शिवाय शुद्धान् गुरुदेवधर्मान्॥ १६८ ॥

फलाद् वृथाः स्युः कुगुरूपदेशतः, कृता हि धर्मार्थमपीह सूद्यमाः ।
तद्दृष्टिरागं परिमुच्य भद्र ! हे गुरुं विशुद्धं भज चेद्धितार्थ्यसि ॥ १६९ ॥

न्यस्ता मुक्तिपथस्य वाहकतया श्रीवीर ! ये प्राक् त्वया,
लुण्टाकास्त्वदृतेऽभवन् बहुतरास्त्वच्छासने ते कलौ ।
बिभ्राणा यतिनाम तत्तनुधियां मुष्णन्ति पुण्यश्रियः,
पूत्कुर्मः किमराज्यके ह्यपि तलारक्षा न किं दस्यवः ? ॥ १७० ॥

माद्यस्यशुद्धैर्गुरुदेवधर्मैर्धिग् दृष्टिरागेण गुणानपेक्षः ।
अमुत्र शोचिष्यसि तत्फले तु, कुपथ्यभोजीव महामयार्त्तः ॥ १७१ ॥

नाम्रं सुसिक्तोऽपि ददाति निम्बकः, पुष्टा रसैर्वंध्यगवी पयो न च ।
दुःस्थो नृपो नैव सुसेवितः श्रियं, धर्मं शिवं वा कुगुरुर्न संश्रितः १७२

कुलं न जातिः पितरौ गणो वा, विद्या च बन्धुः स्वगुरुर्धनं वा ।
हिताय जन्तोर्न परं च किञ्चित्, किन्त्वादृताः सद्गुरुदेवधर्माः॥ १७३ ॥

माता पिता स्वः सुगुरुश्च तत्त्वात्, प्रबोध्य यो योजति शुद्धधर्मे ।
न तत्समोऽरिः क्षिपते भवाब्धौ, यो धर्मविघ्नादिकृतेश्च जीवम् १७४

दाक्षिण्यलज्जे गुरुदेवपूजा, पित्रादिभक्तिः सुकृताभिलाषः ।
परोपकारव्यवहारशुद्धी, नृणामिहामुत्र च संपदे स्युः ॥ १७५ ॥

जिनेष्वभक्तिर्यमिनामवज्ञा, कर्मस्वनौचित्यमधर्मसंगः ।
पित्राद्युपेक्षा परवञ्चनञ्च, सृजन्ति पुंसां विपदः समन्तात् ॥ १७६ ॥

भक्त्यैव नार्चसि जिनं सुगुरोश्च धर्मं, नाकर्णयस्यविरतं विरतीर्न धत्से ।
सार्थं निरर्थमपि च प्रचिनोष्यघानि, मूल्येन केन तदमुत्र समीहसे शम् ?

चतुष्पदैः सिंह इव स्वजात्यै, मिलन्निमांस्तारयतीह कश्चित् ।
सहैव तैर्मज्जति कोऽपि दुर्गे, शृगालवच्चेत्यमिलन् वरं सः॥ १७८ ॥

पूर्णे तटाके तृषितः सदैव, भृतेऽपि गेहे क्षुधितः स मूढः ।
कल्पद्रुमे सत्यपि ही दरिद्रो, गुर्वादियोगेऽपि हि यः प्रमादी॥ १७९ ॥

न धर्मचिन्ता गुरुदेवभक्तिर्येषां न वैराग्यलवोऽपि चित्ते ।
तेषां प्रसूक्लेशफलः पशूनामिवोद्भवः स्यादुदरम्भरीणाम् ॥ १८० ॥

न देवकार्ये न च सङ्घकार्ये, येषां धनं नश्वरमाशु तेषाम् ।
तदर्जनाद्यैर्वृजिनैर्भवाब्धौ, पतिष्यतां किं त्ववलम्बनं स्यात् ?॥ १८१ ॥

## ॥ १३ ॥ यतिशिक्षोपदेशाधिकारः

ते तीर्णा भववारिधिं मुनिवरास्तेभ्यो नमस्कुर्महे,
येषां नो विषयेषु गृध्यति मनो नो वा कषायैः प्लुतम् ।
रागद्वेषविमुक् प्रशान्तकलुषं साम्यासशर्माद्वयं,
नित्यं खेलति चात्मसंयमगुणाक्रीडे भजद्भावनाः ॥ १८२ ॥

स्वाध्यायमाधित्ससि नो प्रमादैः, शुद्धा न गुप्तीः समितीश्च धत्से ।
तपो द्विधा नार्जसि देहमोहादल्पेऽपि हेतौ दधसे कषायान् ॥ १८३ ॥

परीषहान्नो सहसे न चोपसर्गान्न शीलाङ्गधरोऽपि चासि ।
तन्मोक्ष्यमाणोऽपि भवाब्धिपारं, मुने ! कथं यास्यसि वेषमात्रात् १८४

आजीविकार्थमिह यद्यतिवेषमेष,
धत्से चरित्रममलं न तु कष्टभीरुः ।
तद्वेत्सि किं न न बिभेति जगज्जिघृक्षु-
र्मृत्युः कुतोपि नरकश्च न वेषमात्रात् ॥ १८५ ॥

वेषेण माद्यसि यतेश्चरणं विनात्मन् ! पूजां च वाञ्छसि जनाद्बहुधोपधिं च
मुग्धप्रतारणभवे नरकेऽसि गन्ता, न्यायं बिभर्षि तदजागलकर्तरीयम्

जानेऽस्ति संयमतपोभिरमीभिरात्म-
न्नस्य प्रतिग्रहभरस्य न निष्क्रयोऽपि ।
किं दुर्गतौ निपततः शरणं तवास्ते ?,
सौख्यं च दास्यति परत्र किमित्यवेहि ॥ १८७ ॥

किं लोकसत्कृतिनमस्करणार्चनाद्यै
रे मुग्ध ! तुष्यसि विनापि विशुद्धयोगान् ।
कृन्तन् भवान्धुपतने तव यत्प्रमादो,
बोधिद्रुमाश्रयमिमानि करोति पर्शून् ॥ १८८ ॥

गुणांस्तवाश्रित्य नमन्त्यमी जना, ददत्युपध्यालयभैक्ष्यशिष्यकान् ।
विना गुणान् वेषमृषेर्बिभर्षि चेत्, ततष्ठकानां तव भाविनी गतिः १८९

नाजीविकाप्रणयिनीतनयादिचिन्ता नो राजभीश्च भगवत्समयं च वेत्सि ।
शुद्धे तथापि चरणे यतसे न भिक्षो ! तत्ते परिग्रहभरो नरकार्थमेव १९०

शास्त्रज्ञोऽपि धृतव्रतोऽपि गृहिणीपुत्रादिबन्धोज्झितोऽ-
प्यङ्गी यद्यतते प्रमादवशगो न प्रेत्यसौख्यश्रिये ।
तन्मोहद्विषतस्त्रिलोकजयिनः काचित्परा दुष्टता,
बद्धायुष्कतया स वा नरपशुर्नूनं गमी दुर्गतौ ॥ १९१ ॥

उच्चारयस्यनुदिनं न करोमि सर्वं, सावद्यमित्यसकृदेतदथो करोषि ।
नित्यं मृषोक्तिजिनवञ्चनभारितात्तत्, सावद्यतो नरकमेव विभावये ते १९२

वेषोपदेशाद्युपधिप्रतारिता, ददत्यभीष्टानृजवोऽधुना जनाः ।
भुङ्क्षे च शेषे च सुखं विचेष्टसे, भवान्तरे ज्ञास्यसि तत्फलं पुनः १९३

आजीविकादिविविधार्त्तिभृशानिशार्त्ताः,
कृच्छ्रेण केऽपि महतैव सृजन्ति धर्मान् ।
तेभ्योऽपि निर्दय ! जिघृक्षसि सर्वमिष्टं,
नो संयमे च यतसे भविता कथं ही ॥ १९४ ॥

आराधितो वा गुणवान् स्वयं तरन् भवाब्धिमस्मानपि तारयिष्यति ।
श्रयन्ति ये त्वामिति भूरिभक्तिभिः फलं तवैषां च किमस्ति निर्गुण !

स्वयं प्रमादैर्निपतन् भवाम्बुधौ कथं स्वभक्तानपि तारयिष्यसि ? ।
प्रतारयन् स्वार्थमृजून् शिवार्थिनः स्वतोऽन्यतश्चैव विलुप्यसेऽहसा१९६

गृह्णासि शय्याहृतिपुस्तकोपधीन्, सदा परेभ्यस्तपसस्त्वियं स्थितिः ।
तत्ते प्रमादाद्भरितात्प्रतिग्रहैर्ऋणार्णमग्नस्य परत्र का गतिः ? ॥ १९७ ॥

न कापि सिद्धिर्न च तेऽतिशायि, मुने ! क्रियायोगतपःश्रुतादि ।
तथाप्यहङ्कारकदर्थितस्त्वं, ख्यातीच्छया ताम्यसि धिङ्मुधा किम् १९८

हीनोऽप्यरे भाग्यगुणैर्मुधात्मन् ! वाञ्छंस्तवार्चाद्यनवाप्नुवंश्च ।
ईर्ष्यन् परेभ्यो लभसेऽतितापमिहापि याता कुगतिं परत्र ॥ १९९ ॥

गुणैर्विहीनोऽपि जनानतिस्तुतिप्रतिग्रहान् यन्मुदितः प्रतीच्छसि ।
लुलायगोऽश्वोष्ट्रखरादिजन्मभिर्विना, ततस्ते भविता न निष्क्रयः २००

गुणेषु नोद्यच्छसि चेन्मुने ! ततः, प्रगीयसे यैरपि वन्द्यसेऽर्च्यसे ।
जुगुप्सितां प्रेत्यगतिं गतोऽपि तैर्हसिष्यसे चाभिभविष्यसेऽपि वा २०१

दानमाननुतिवन्दनापरैर्मोदसे निकृतिरञ्जितैर्जनैः ।
न त्ववैषि सुकृतस्य चेल्लवः, कोऽपि सोऽपि तव लुट्यते हि तैः २०२

भवेद्गुणी मुग्धकृतैर्न हि स्तवैर्न ख्यातिदानार्चनवन्दनादिभिः ।
विना गुणान्नो भवदुःखसंक्षयस्ततो गुणानर्जय किं स्तवादिभिः॥ २०३ ॥

अध्येषि शास्त्रं सदसद्विचित्रालापादिभिस्ताम्यसि वा समायैः ।
येषां जनानामिह रञ्जनाय, भवान्तरे ते क्व मुने ! क्व च त्वम्॥ २०४ ॥

परिग्रहं चेद्व्यजहा गृहादेस्तत्किं नु धर्मोपकृतिच्छलात्तम् ।
करोषि शय्योपधिपुस्तकादेर्गरोऽपि नामान्तरतोऽपि हन्ता ॥ २०५ ॥

परिग्रहात्स्वीकृतधर्मसाधनाभिधानमात्रात्किमु मूढ ! तुष्यसि ।
न वेत्सि हेम्नाप्यति भारिता तरी, निमज्जयत्यङ्गिनमम्बुधौ द्रुतम् २०६

येंऽहःकषायकलिकर्मनिबन्धभाजनं,
स्युः पुस्तकादिभिरपीहितधर्मसाधनैः ।
तेषां रसायनवरैरपि सर्पदामयै-
रार्त्तात्मनां गदहृतेःसुखकृत्तु किं भवेत् ॥ २०७ ॥

रक्षार्थं खलु संयमस्य गदिता येऽर्था यतिनां जिनै-
र्वासःपुस्तकपात्रकप्रभृतयो धर्मोपकृत्यात्मकाः ।
मूर्छन्मोहवशात्त एव कुधियां संसारपाताय धिक्,
स्वं स्वस्यैव वधाय शस्त्रमधियां यद्दुष्प्रयुक्तं भवेत् ॥ २०८ ॥

संयमोपकरणच्छलात्परान्भारयन्, यदसि पुस्तकादिभिः ।
गोखरोष्ट्रमहिषादिरूपभृत्तच्चिरं, त्वमपि भारयिष्यसे ॥ २०९ ॥

वस्त्रपात्रतनुपुस्तकादिनः, शोभया न खलु संयमस्य सा ।
आदिमा च ददते भवं परा, मुक्तिमाश्रय तदिच्छयैकिकाम् ॥ २१० ॥

शीतातपाद्यान्न मनागपीह, परीषहांश्चेत्क्षमसे विसोढुम् ।
कथं ततो नारकगर्भवासदुःखानि, सोढासि भवान्तरे त्वम् ?॥ २११ ॥

मुने ! न किं नश्वरमस्वदेहमृत्पिण्डमेनं सुतपोव्रताद्यैः ।
निपीड्य भीतिर्भवदुःखराशेर्हित्वात्मसाच्छैवसुखं करोषि ? ॥ २१२ ॥

यदत्र कष्टं चरणस्य पालने, परत्र तिर्यङ्नरकेषु यत्पुनः ।
तयोर्मिथः सप्रतिपक्षता स्थिता, विशेषदृष्ट्यान्यतरञ्जहीहि तत्॥ २१३ ॥

शमत्र यद्बिन्दुरिव प्रमादजं, परत्र यच्चाब्धिरिव द्युमुक्तिजम् ।
तयोर्मिथः सप्रतिपक्षता स्थिता, विशेषदृष्ट्यान्यतरद् गृहाण तत् ॥ २१४

नियन्त्रणा या चरणेऽत्र तिर्यक्स्त्रीगर्भकुम्भीनरकेषु या च ।
तयोर्मिथः सप्रतिपक्षभावाद्विशेषदृष्ट्यान्यतरां गृहाण ॥ २१५ ॥

सह तपोयमसंयमयन्त्रणां, स्ववशतासहने हि गुणो महान् ।
परवशस्त्वति भूरि सहिष्यसे, न च गुणं बहुमाप्स्यसि कञ्चन ॥ २१६ ॥

अणीयसा साम्यनियन्त्रणाभुवा, मुनेऽत्र कष्टेन चरित्रजेन च ।
यदि क्षयो दुर्गतिगर्भवासगाऽसुखावलेस्तत्किमवापि नार्थितम्॥ २१७ ॥

त्यज स्पृहां स्वःशिवशर्मलाभे, स्वीकृत्य तिर्यङ्नरकादिदुःखम् ।
सुखाणुभिश्चेद्विषयादिजातैः, संतोष्यसे संयमकष्टभीरुः ॥ २१८ ॥

समग्रचिन्तार्त्तिहृतेरिहापि, यस्मिन्सुखं स्यात्परमं रतानाम् ।
परत्र चेन्द्रादिमहोदयश्रीः, प्रमाद्यसीहापि कथं चरित्रे ? ॥ २१९ ॥

महातपोध्यानपरीषहादि, न सत्त्वसाध्यं यदि धर्तुमीशः ।
तद्भावनाः किं समितीश्च गुप्तीर्धत्से शिवार्थिन् ! न मनःप्रसाध्याः २२० ॥

अनित्यताद्या भज भावनाः सदा यतस्व दुःसाध्यगुणेऽपि संयमे।
जिघत्सया ते त्वरते ह्ययं यमः श्रयन् प्रमादान्न भवाद् बिभेषि किम्?

हतं मनस्ते कुविकल्पजालैर्वचोऽप्यवद्यैश्च वपुः प्रमादैः।
लब्धीश्च सिद्धीश्च तथापि वाञ्छन्, मनोरथैरेव हहा!! हतोऽसि २२२॥

मनोवशस्ते सुखदुःखसंगमो, मनो मिलेद्यैस्तु तदात्मकं भवेत्।
प्रमादचोरैरिति वार्यतां मिलच्छीलाङ्गमित्रैरनुषञ्जयानिशम् ॥ २२३॥

ध्रुवः प्रमादैर्भववारिधौ मुने! तव प्रपातः परमत्सरः पुनः।
गले निबद्धोरुशिलोपमोऽस्ति चेत् कथं तदोन्मज्जनमप्यवाप्स्यसि २२४

महर्षयः केऽपि सहन्त्युदीर्याप्युग्रातपादीन्यदि निर्जरार्थम्।
कष्टं प्रसङ्गागतमप्यणीयोऽपीच्छन् शिवं किं सहसे न भिक्षो!॥ २२५॥

यो दानमानस्तुतिवन्दनाभिर्न मोदतेऽन्यैर्न तु दुर्मनायते।
अलाभलाभादिपरीषहान् सहन्, यतिः स तत्त्वादपरो विडम्बकः २२६

दधद्गृहस्थेषु ममत्वबुद्धिं, तदीयतप्त्या परितप्यमानः।
अनिवृतान्तःकरणः सदा स्वैस्तेषां च पापैर्भ्रमिता भवेऽसि ॥ २२७॥

त्यक्त्वा गृहं स्वं परगेहचिन्तातप्तस्य को नाम गुणस्तवर्षे!।
आजीविकास्ते यतिवेषतोऽत्र, सुदुर्गतिः प्रेत्य तु दुर्निवारा ॥ २२८॥

कुर्वे न सावद्यमिति प्रतिज्ञां वदन्नकुर्वन्नपि देहमात्रात्।
शय्यादिकृत्येषु नुदन् गृहस्थान् हृदा गिरा वाऽसि कथं मुमुक्षुः? २२९

कथं महत्त्वाय ममत्वतो वा, सावद्यमिच्छस्यपि सङ्घलोके।
न हेममय्यप्युदरे हि शस्त्री, क्षिप्ता क्षणोति क्षणतोऽप्यसून् किम् २३०

रङ्कः कोऽपि जनाभिभूतिपदवीं त्यक्त्वा प्रसादाद् गुरो-
र्वेषं प्राप्य यतेः कथंचन कियच्छास्त्रं पदं कोऽपि च।
मौखर्यादिवशीकृतर्जुजनतादानार्चनैर्गर्वभा-
गात्मानं गणयन्नरेन्द्रमिव धिग् गन्ता द्रुतं दुर्गतौ ॥ २३१॥

प्राप्यापि चारित्रमिदं दुरापं स्वदोषजैर्यद्विषयप्रमादैः।
भवाम्बुधौ धिक् पतितोऽसि भिक्षो ! हतोऽसि दुःखैस्तदनन्तकालम्

कथमपि समवाप्य बोधिरत्नं युगसमिलादिनिदर्शनाद्दुरापम्।
कुरु कुरु रिपुवश्यतामगच्छन् किमपि हितं लभसे यतोऽर्थितं शम्
द्विषस्त्विमे ते विषयप्रमादा, असंवृता मानसदेहवाचः।
असंयमाः सप्तदशापि हास्यादयश्च बिभ्यच्चर नित्यमेभ्यः ॥ २३४ ॥

गुरूनवाप्याप्यपहाय गेहमधीत्य शास्त्राण्यपि तत्त्ववाञ्छि।
निर्वाहचिन्तादिभराद्यभावेऽप्यृषे ! न किं प्रेत्य हिताय यत्नः ? २३५

विराधितैः संयमसर्वयोगैः पतिष्यतस्ते भवदुःखराशौ।
शास्त्राणि शिष्योपधिपुस्तकाद्या भक्ताश्च लोकाः शरणाय नालम् २३६

यस्य क्षणोपि सुरधामसुखानि पल्य-
कोटीर्नृणां द्विनवतीं ह्यधिकां ददाति।
किं हारयस्यधम ! संयमजीवितं तत्,
हा हा प्रमत्त ! पुनरस्य कुतस्तवाप्तिः ॥ २३७ ॥

नाम्नापि यस्येति जनेऽसि पूज्यः, शुद्धात्ततो नेष्टसुखानि कानि।
तत्संयमेऽस्मिन् यतसे मुमुक्षोऽनुभूयमानोरुफलेऽपि किं न ?॥ २३८ ॥

## ॥ १४ ॥ मिथ्यात्वादिनिरोधाधिकारः

मिथ्यात्वयोगाविरतिप्रमादान्, आत्मन् ! सदा संवृणु सौख्यमिच्छन्।
असंवृता यद्भवतापमेते, सुसंवृता मुक्तिरमां च दद्युः ॥ २३९ ॥

मनः संवृणु हे विद्वन् !, असंवृतमना यतः।
याति तन्दुलमत्स्यो द्राक्, सप्तमीं नरकावनीम् ॥ २४० ॥

प्रसन्नचन्द्रराजर्षेर्मनःप्रसरसंवरौ।
नरकस्य शिवस्यापि हेतुभूतौ क्षणादपि ॥ २४१ ॥

मनोऽप्रवृत्तिमात्रेण, ध्यानं नैकेन्द्रियादिषु।
धर्म्यशुक्लमनःस्थैर्यभाजस्तु ध्यायिनः स्तुमः ॥ २४२ ॥

सार्थं निरर्थकं वा यन्मनः सुध्यानयन्त्रितम्।
विरतं दुर्विकल्पेभ्यः, पारगांस्तान् स्तुवे यतीन् ॥ २४३ ॥

वचोऽप्रवृत्तिमात्रेण, मौनं के के न बिभ्रति।
निरवद्यं वचो येषाम्, वचोगुप्तांस्तु तान् स्तुवे ॥ २४४ ॥

निरवद्यं वचो ब्रूहि, सावद्यवचनैर्यतः।
प्रयाता नरकं घोरं, वसुराजादयो द्रुतम् ॥ २४५ ॥

इहाऽमुत्र च वैराय, दुर्वाचो नरकाय च।
अग्निदग्धाः प्ररोहन्ति, दुर्वाग्दग्धाः पुनर्न हि ॥ २४६ ॥

अत एव जिना दीक्षाकालादाकेवलोद्भवम्।
अवद्यादिभिया ब्रूयुर्ज्ञानत्रयभृतोऽपि न ॥ २४७ ॥

कृपया संवृणु स्वाङ्गं, कूर्मज्ञातनिदर्शनात्।
संवृतासंवृताङ्गा यत्, सुखदुःखान्यवाप्नुयुः ॥ २४८ ॥

कायस्तम्भान्न के के स्युस्तरुस्तम्भादयो यताः।
शिवहेतुक्रियो येषां, कायस्तांस्तु स्तुवे यतीन् ॥ २४९ ॥

श्रुतिसंयममात्रेण, शब्दान् कान् के त्यजन्ति न।
इष्टानिष्टेषु चैतेषु, रागद्वेषौ त्यजन्मुनिः ॥ २५० ॥

चक्षुःसंयममात्रात् के, रूपालोकांस्त्यजन्ति न।
इष्टानिष्टेषु चैतेषु, रागद्वेषौ त्यजन्मुनिः ॥ २५१ ॥

घ्राणसंयममात्रेण, गन्धान् कान् के त्यजन्ति न।
इष्टानिष्टेषु चैतेषु, रागद्वेषौ त्यजन् मुनिः ॥ २५२ ॥

जिह्वासंयममात्रेण, रसान् कान् के त्यजन्ति न।
मनसा त्यज तानिष्टान्, यदीच्छसि तपः फलम् ॥ २५३ ॥

त्वचःसंयममात्रेण, स्पर्शान् कान् के त्यजन्ति न।
मनसा त्यज तानिष्टान्, यदीच्छसि तपःफलम् ॥ २५४ ॥

बस्तिसंयममात्रेण, ब्रह्म के के न बिभ्रते।
मनःसंयमतो धेहि, धीर! चेत्तत्फलार्थ्यसि ॥ २५५ ॥

विषयेन्द्रियसंयोगाभावात्के के न संयताः।
रागद्वेषमनोयोगाभावाद्ये तु स्तवीमि तान् ॥ २५६ ॥

कषायान् संवृणु प्राज्ञ! नरकं यदसंवरात्।
महातपस्विनोप्यापुः, करटोत्करटादयः ॥ २५७ ॥

यस्यास्ति किञ्चिन्न तपोयमादि, ब्रूयात्स यत्तत्तुदतां परान् वा।
यस्यास्ति कष्टाप्तमिदं तु किं न, तद्भ्रंशभीः संवृणुते स योगान् २५८

भवेत्समग्रेष्वपि संवरेषु, परं निदानं शिवसंपदां यः।
त्यजन् कषायादिजदुर्विकल्पान्, कुर्यान्मनःसंवरमिद्धधीस्तम्॥ २५९ ॥

तदेवमात्मा कृतसंवरः स्यात्, निःसङ्गताभाक् सततं सुखेन।
निःसङ्गभावादथ संवरस्तद् द्वयं शिवार्थी युगपद्भजेत ॥ २६० ॥

## ॥ १५ ॥ शुभवृत्तिशिक्षोपदेशाधिकारः

आवश्यकेष्वातनु यत्नमाप्तोदितेषु शुद्धेषु तमोऽपहेषु।
न हन्त्यभुक्तं हि न चाप्यशुद्धं, वैद्योक्तमप्यौषधमामयान् यत् ॥ २६१ ॥

तपांसि तन्याद्विविधानि नित्यं, मुखे कटून्यायतिसुन्दराणि।
निघ्नन्ति तान्येव कुकर्मराशिं, रसायनानीव दुरामयान् यत् ॥ २६२ ॥

विशुद्धशीलाङ्गसहस्रधारी, भवानिशं निर्मितयोगसिद्धिः।
सहोपसर्गांस्तनुनिर्ममः सन्, भजस्व गुप्तीः समितीश्च सम्यक् ॥ २६३ ॥

स्वाध्याययोगेषु दधस्व यत्नं, मध्यस्थवृत्यानुसरागमार्थान्।
अगारवो भैक्षमटाऽविषादी, हेतौ विशुद्धे वशितेन्द्रियौघः ॥ २६४ ॥

ददस्व धर्मार्थितयैव धर्म्यान्, सदोपदेशान् स्वपरादिसाम्यान्।
जगद्धितैषी नवभिश्च कल्पैर्ग्रामे कुले वा विहराऽप्रमत्तः ॥ २६५ ॥

कृताकृतं स्वस्य तपोजपादि, शक्तीरशक्तीः सुकृतेतरे च।
सदा समीक्षस्व हृदाथ साध्ये, यतस्व हेयं त्यज चाव्ययार्थी ॥ २६६ ॥

परस्य पीडापरिवर्जनात्ते, त्रिधा त्रियोग्यप्यमला सदास्तु।
साम्यैकलीनं गतदुर्विकल्पं, मनो वचश्चाप्यनघप्रवृत्ति ॥ २६७ ॥

मैत्रीं प्रमोदं करुणां च सम्यक्, मध्यस्थतां चानय साम्यमात्मन्।
सद्भावनास्वात्मलयं प्रयत्नात्, कृताविरामं रमयस्व चेतः ! ॥ २६८ ॥

कुर्यान्न कुत्रापि ममत्वभावं, न च प्रभो ! रत्यरती कषायान्।
इहापि सौख्यं लभसेऽप्यनीहो, ह्यनुत्तरामर्त्यसुखाभमात्मन् ! ॥ २६९ ॥

इति यतिवरशिक्षां योऽवधार्य व्रतस्थ-
श्चरणकरणयोगानेकचित्तः श्रयेत।
सपदि भवमहाब्धिं क्लेशराशिं स तीर्त्वा,
विलसति शिवसौख्यानन्त्यसायुज्यमाप्य ॥ २७० ॥

## ॥ १६ ॥ साम्यसर्वस्वाधिकारः

एवं सदाभ्यासवशेन सात्म्यं, नयस्व साम्यं परमार्थवेदिन् !।
यतः करस्थाः शिवसंपदस्ते, भवन्ति सद्यो भवभीतिभेत्तुः ॥ २७१ ॥

त्वमेव दुःखं नरकस्त्वमेव, त्वमेव शर्मापि शिवं त्वमेव।
त्वमेव कर्माणि मनस्त्वमेव, जहीह्यविद्यामवधेहि चात्मन् ! ॥ २७२ ॥

निःसङ्गतामेहि सदा तदात्मन्नर्थेष्वशेषेष्वपि साम्यभावात्।
अवेहि विद्वन् ! ममतैव मूलं, शुचां सुखानां समतैव चेति ॥ २७३ ॥

स्त्रीषु धूलिषु निजे च परे वा, संपदि प्रसरदापदि चात्मन् !।
तत्त्वमेहि समतां ममतामुग्, येन शाश्वतसुखाद्वयमेषि ॥ २७४ ॥

तमेव सेवस्व गुरुं प्रयत्ना-दधीष्व, शास्त्राण्यपि तानि विद्वन्! ।
तदेव तत्त्वं परिभावयात्मन्!, येभ्यो भवेत्साम्यसुधोपभोगः ॥ २७५ ॥

समग्रच्छास्त्रमहार्णवेभ्यः, समुद्धृतः साम्यसुधारसोऽयम् ।
निपीयतां हे विबुधा ! लभध्वमिहापि मुक्तेः सुखवर्णिकां यत् २७६

शान्तरसभावनात्मा, मुनिसुन्दरसूरिभिः कृतो ग्रन्थः ।
ब्रह्मस्पृहया ध्येयः, स्वपरहितोऽध्यात्मकल्पतरुरेषः ॥ २७७ ॥

इममिति मतिमानधीत्य, चित्ते रमयति यो विरमत्ययं भवाद् द्राक् ।
स च नियतमतो रमेत चास्मिन्, सह भववैरिजयश्रिया शिवश्रीः २७८

## ॥ मनुष्यभवदुर्लभतायां दृष्टान्ताः ॥

विप्रः प्रार्थितवान् प्रसन्नमनसः श्रीब्रह्मदत्तात्पुरा,
क्षेत्रेऽस्मिन् भरतेऽखिले प्रतिगृहं मे भोजनं दापय ।
इत्थं लब्धवरोऽथ तेष्वपि कदाप्यश्नात्यहो द्विः स चेद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ १ ॥

स्तम्भानां हि सहस्रमष्टसहितं प्रत्येकमष्टोत्तरं,
कोणानां शतमेषु तानपि जयन् द्यूतेऽथ शतसंख्यया ।
साम्राज्यं जनकात्सुतः स लभते स्याच्चेदिदं दुर्घटं,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ २ ॥

वृद्धा काऽपि पुरा समस्तभरतक्षेत्रस्य धान्यावलिं,
पिण्डीकृत्य च तत्र सर्षपकणान् क्षिप्त्वाढकेनोन्मितान् ।
प्रत्येकं हि पृथक्करोति किल सा सर्वाणि चान्नानि चेद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ३ ॥

सिद्धद्यूतकलाबलाद्धनिजनं जित्वाथ हेम्नां भरै-
श्चाणक्येन नृपस्य कोशनिवहः पूर्णीकृतो हेलया ।

दैवादाढ्यजनेन तेन स पुनर्जीयेत मन्त्री क्वचिद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ४ ॥

रत्नान्याढ्यसुतैर्वितीर्य वणिजां देशान्तरादीयुषां,
पश्चात्तापवशेन तानि पुनरादातुं कृतोपक्रमैः ।
लभ्यन्ते निखिलानि दुर्घटमिदं दैवाद् घटेत्तत्क्वचिद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ५ ॥

स्वप्ने कार्पटिकेन रात्रिविगमे श्रीमूलदेवेन च,
प्रेक्ष्येन्दुं सकलं कुनिर्णयवशादल्पं फलं प्राप्य च ।
स्वप्नस्तेन पुनः स तत्र शयितेनालोक्यते कुत्रचिद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ६ ॥

राधाया वदनादधः क्रमवशाच्चक्राणि चत्वार्यपि,
भ्राम्यन्तीह विपर्ययेण तदधो धन्वी स्थितोऽवाङ्मुखः ।
तस्या वामकनीनिकामिषुमुखेनैवाशु विध्यत्यहो,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ७ ॥

दृष्ट्वा कोऽपि हि कच्छपो ह्रदमुखे शेवालबन्धच्युते,
पूर्णेन्दुं मुदितः कुटुम्बमिह तं द्रष्टुं समानीतवान् ।
शेवाले भिलिते कदापि स पुनश्चन्द्रं समालोकते,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ८ ॥

शम्या पूर्वपयोनिधौ निपतिता भ्रष्टं युगं पश्चिमा,-
म्भोधौ दुर्धरवीचिभिश्च सुचिरात्संयोजितं तद्द्वयम् ।
सा शम्या प्रविशेद्युगस्य विवरे तस्य स्वयं क्वापि चेद्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ ९ ॥

चूर्णीकृत्य पराक्रमान् मणिमयं स्तम्भं सुरः क्रीडया,
मेरौ सन्नलिका समीरवशतः क्षिप्त्वा रजो दिक्षु चेत् ।

स्तम्भं तैः परमाणुभिः सुमिलितैः कुर्यात्स चेत्पूर्ववत्,
भ्रष्टो मर्त्यभवात्तथाप्यसुकृती भूयस्तमाप्नोति न ॥ १० ॥

"पुण्यैरवाप्यते लक्ष्मीः, पुण्येनैव महोन्नतिः ।
पुण्येन मानवो देहो-दुर्लभः स्वर्गिणामहो ? ॥ ११ ॥

## ॥ परमानन्द-पञ्चविंशतिः ॥

परमानन्दसंयुक्तं, निर्विकारं निरामयम् ।
ध्यानहीना न पश्यन्ति, निजदेहे व्यवस्थितम् ॥ १ ॥

अनन्तसुखसंपन्नं, ज्ञानामृतपयोधरम् ।
अनन्तवीर्यसंपन्नं, दर्शनं परमात्मनः ॥ २ ॥

निर्विकारं निराहारं, सर्वसङ्गविवर्जितम् ।
परमानन्दसंपन्नं, शुद्धं चैतन्यलक्षणम् ॥ ३ ॥

उत्तमा ह्यात्मचिन्ता स्यात्-मोहचिन्ता च मध्यमा ।
अधमा कामचिन्ता स्यात्-परचिन्ताऽधमाऽधमा ॥ ४ ॥

निर्विकल्पं समुत्पन्नं, ज्ञानमेव सुधारसम् ।
विवेकमञ्जलिं कृत्वा, तं पिबन्ति तपस्विनः ॥ ५ ॥

सदानन्दमयं जीवं, यो जानाति स पण्डितः ।
संसेवते निजात्मानं, परमानन्दकारणम् ॥ ६ ॥

नलिन्यां च यथानीरं, भिन्नं तिष्ठति सर्वदा ।
अयमात्मा स्वभावेन, देहे तिष्ठति निर्मलः ॥ ७ ॥

द्रव्यकर्मविनिर्मुक्तं, भावकर्मविवर्जितम् ।
नोकर्म्मरहितं विद्धि, निश्चयेन चिदात्मकम् ॥ ८ ॥

आनन्दं ब्रह्मणो रूपं, निजदेहे व्यवस्थितम् ।
ध्यानहीना न पश्यन्ति, जात्यन्धा इव भास्करम् ॥ ९ ॥

तद्ध्यानं क्रियते भव्यं, मनो येन विलीयते ।
तत् क्षणं पश्यति शुद्धं, चित्चमत्कारलक्षणम् ॥ १० ॥

ये धर्म्मलीना मुनयः प्रधानाः ते दुःक्खहीना नियतं भवन्ति ।
संप्राप्य शीघ्रं परमात्मतत्वं, व्रजन्ति मोक्षं क्षणमेकमध्ये ॥ ११ ॥

आनन्दरूपं परमात्मतत्त्वं, समस्तसंकल्पविकल्पमुक्तम् ।
स्वभावलीना निवसन्ति नित्यं, जानाति योगी स्वयमेव तत्त्वम् १२

सदानन्दमयं शुद्धं, निराकारं निरामयम् ।
अनन्तसुखसंपन्नं, सर्वसङ्गविवर्जितम् ॥ १३ ॥

लोकमात्रप्रमाणोऽहं, निश्चयेन न संशयः ।
व्यवहारे देहमात्रः, कथितः परमेश्वरः ॥ १४ ॥

यत्क्षणं पश्यति शुद्धं, तत्क्षणं गतविभ्रमम् ।
सुस्थं चित्तं स्थिरीभूतं, निर्विकल्पसमाधिना ॥ १५ ॥

स एव परमं ब्रह्म, स एव जिनपुङ्गवः ।
स एव परमं चित्तं, स एव परमो गुरुः ॥ १६ ॥

स एव परमं ज्योतिः स एव परमं तपः ।
स एव परमं ध्यानं, स एव परमात्मकम् ॥ १७ ॥

स एव सर्वकल्याणं, स एव सुखभाजनम् ।
स एव शुद्धचिद्रूपं, स एव परमः शिवः ॥ १८ ॥

स एव परमानन्दः, स एव सुखदायकः ।
स एव परचैतन्यं, स एव गुणसागरः ॥ १९ ॥

परमाह्लादसम्पन्नं, रागद्वेषविवर्जितम् ।
स अहं देहमध्येषु, यो जानाति स पण्डितः ॥ २० ॥

आकाररहितं शुद्धं, स्वस्वरूपे व्यवस्थितम् ।
सिद्धावष्टगुणोपेतं, निर्विकारं निरामयम् ॥ २१ ॥

तत्सदृशं निजात्मानं, परमानन्दकारणम् ।
संसेवते निजात्मानं, यो जानाति स पण्डितः ॥ २२ ॥

पाषाणेषु यथा हेम, दुग्धमध्ये यथा घृतम् ।
तिलमध्ये यथा तैलं, देहमध्ये तथा शिवः ॥ २३ ॥

काष्ठमध्ये यथा वह्निः, शक्तिरूपेण तिष्ठति ।
अयमात्मा स्वभावेन, देहे तिष्ठति निर्मलः ॥ २४ ॥

अव्रतानि परित्यज्य, व्रतेषु परिनिष्ठितः ।
त्यजेत्तान्यपि संप्राप्य, परमं पदमात्मनः ॥ २५ ॥

## ॥ प्रातःकालिकजिनस्तुतिः ॥

येऽर्हन् ! प्रभातसमये तव पादपद्ममापन्महार्ण्णवसमुत्तरणैकसेतुम् ।
पश्यन्ति नश्यति ततस्ततमाशु सर्वमेनोऽतितीव्रभवदाहसमाम्बुवाह १

उद्भूतभूरिसुकृता भविनो भवन्ति, ये केचन च्युतमदप्रसरा प्रगे ते ।
उत्फुल्लपङ्कजदलोपमनेत्रपात्रास्त्राणप्रदौ तव पदौ प्रविलोकयन्ते ॥ २ ॥

प्रातः प्रसन्नवदना भुवनावतंसमासन् सितोज्ज्वलपदा भवदीयरूपम् ।
ये केचिदीक्षणपथं प्रथमं नयन्ति, ते फेनपाण्डुरयशोभवनं भवन्ति ३ ॥

उद्गूढभाग्यभवभाजनमाननीयमालोक्य भास्वदुदये चलनद्वयं ते ।
भव्या नयन्ति वशमत्र जगत्त्रयेऽपि, भद्राणि चन्द्रकिरणोत्करनिर्म्मलानि

चिन्तामणिर्न च न वा नवकामधेनुः, कल्पद्रुमोऽपि न न भद्रघटः प्रसन्नः
आविष्करोति फलमर्कविलोककाले, यत्ते पदाम्बुरुहमीक्षितमात्रमेव

ताराविरामसमये कमलाकरेषु, यातेषु बोधमुदितामलसौरभेषु ।
धन्या विनिद्रितदृशः सुदृशः प्रभावमालोकयन्ति कमलाकुलमाननं ते६

भिन्दन्ति दुर्ग्गतिभयानि समानयन्ति, स्वःसम्भवानि शिवजानि च मङ्गलानि
भानूदये तव नमन्ति नुवन्ति येऽङ्घ्री, पापाम्बुराशिपरिशोषसमीर ! धीर ! ७

तेषां न जन्म न च जीवितमीशभावमुच्चं यशश्च फलवन्न वदन्ति सन्तः ।
यैरुत्थितैर्बहलहर्षजलाविलाक्षैर्निर्ध्यायते क्रमकजं न तव प्रभाते ८

एषा प्रभातसमयस्तुतिरादरेण, पापठ्यते भगवति प्रहितैर्मनोभिः
यैस्तेऽत्र कुन्दकलिकोज्ज्वललाभभाजो, जायन्त एव मुनिचन्द्र पदप्रपन्नाः

## ॥ नूतनाचार्याय हितशिक्षा ॥

धन्यस्त्वं येन विज्ञातः, संसारगिरिदारकः ।
वज्रवद्दुर्भिदश्चायं, महाभाग जिनागमः ॥ १ ॥

इदं चारोपितं यत्ते, पदं तत्संपदां पदम् ।
श्रीगौतमसुधर्मादि - मुनिसिंहनिषेवितम् ॥ २ ॥

धन्येभ्यो दीयते भद्र, धन्या एवास्य पारगाः ।
धन्या गत्वाऽस्य पारं च, पारं गच्छन्ति संसृतेः ॥ ३ ॥

त्वामाश्रितं सदा भद्र, सुसार्थाधिपतिभ्रमात् ।
भीतं संसारकान्तारात्, साधुवृन्दमिदं मुदा ॥ ४ ॥

अतो विधेयं यत्नेन, सारणावारणादिना ।
अपायपरिहारेण, संसाराण्यपारगम् ॥ ५ ॥

संप्राप्य गुणसंदोहं, निर्मलं पारमेश्वरम् ।
त्राणं संसारभीतानां, धन्याः कुर्वन्ति देहिनाम् ॥ ६ ॥

एते हि भावरोगार्त्ता - स्त्वं च भावभिषग्वरः ।
अतस्त्वयाऽमी यत्नेन, मोचनीयास्ततोऽनिशम् ॥ ७ ॥

कल्पोऽयमिति कृत्वेदं, मया तव निवेदितम् ।
ईदृशस्य तु ते वत्स, कथनीयं न विद्यते ॥ ८ ॥

युष्माभिरपि नैवैष, सुस्थबोधिस्थसंनिभः ।
संसारसागरोत्तारी, विमोक्तव्यः कदाचन ॥ ९ ॥

प्रतिकूलं न कर्तव्य-मनुकूलरतैः सदा ।
भाव्यमस्य गृहत्यागो, येन वः सफलो भवेत् ॥ १० ॥

अन्यथा जन्तुबन्धूना - माज्ञालोपः कृतो भवेत् ।
ततो विडम्बना घोरा, जायन्तां न परत्र च ॥ ११ ॥

ततः कुलवधून्यायात्, कार्यनिर्भर्त्सितैरपि ।
यावज्जीवं न मोक्तव्यं, पादमूलममुष्य भोः ॥ १२ ॥

ते ज्ञानभाजनं धन्या-स्ते हि निर्मलदर्शनाः ।
ते निष्प्रकम्पचारित्रा, ये सदा गुरुसेविनः ॥ १३ ॥

प्रोत्सर्पन्मदवारणं शुभसमाचारप्रवाहाद्भुतं,
ज्ञानानन्तशताङ्गदर्शनजयं सुज्ञानसंपत्तिकम् ।
भव्यार्थोपचयं सुबुद्धिसचिवं स्याद्यन्महानन्दकृत्,
राज्यं सूरिपदं च तत्त्वयि मया न्यस्तं सुपाल्यं त्वया ॥ १४ ॥

मूले यथाऽल्पा अपि मुख्यनद्यो, विशन्ति वार्धौ बहुवर्धमानाः ।
सज्ज्ञानचारित्रगुणैस्तथा त्वं, गणेन गच्छेन च वर्धिषीष्ठाः ॥ १५ ॥

## ॥ सज्जनचित्तवल्लभ ॥

नत्वा वीरजिनं जगत्त्रयगुरुं मुक्तिश्रियो वल्लभं,
पुष्पेषुक्षयनीतबाणनिवहं संसारदुःखापहम् ।
वक्ष्ये भव्यजनप्रबोधजननं ग्रन्थं समासादहं,
नाम्ना सज्जनचित्तवल्लभमिमं शृण्वन्तु सन्तो जनाः ॥ १ ॥

रात्रिश्चन्द्रमसा विनाब्जनिवहैर्नो भाति पद्माकरो,
यद्वत्पण्डितलोकवर्ज्जितसभा दन्तीव दन्तं विना ॥
पुष्पं गन्धविवर्ज्जितं मृतपतिः स्त्री चेह तद्वन्मुनिः,
चारित्रेण विना न भाति सततं यद्यप्यसौ शास्त्रवान् ॥ २ ॥

किं वस्त्रत्यजनेन भो मुनिरसावेतावता जायते,
क्ष्वेडेन च्युतपन्नगो गतविषः किं जातवान् भूतले ।
मूलं किं तपसः क्षमेन्द्रियजयः सत्यं सदाचारता-
रागादींश्च बिभर्त्ति चेन्न स यतिर्लिङ्गी भवेत्केवलम् ॥ ३ ॥

किं दीक्षाग्रहणेन भो यदि धनाकाङ्क्षा भवेच्चेतसि,
किं गार्हस्थमनेनवेषधरणेनासुन्दरं मन्यसे ।
द्रव्योपार्जनचित्तमेव कथयत्यभ्यन्तरस्थाङ्गजम्,
नो चेदर्थपरिग्रहग्रहमतिर्भिक्षोर्न संपद्यते ॥ ४ ॥

योषापण्डकगोविवर्जितपदे संतिष्ठ भिक्षो ! सदा,
भुक्ताहारमकारितं परगृहे लब्धं यथासंभवम् ।
षट्धावश्यकसत्क्रियासु निरतो धर्मादिरागं वहन्,
सार्द्धं योगिभिरात्मपावनपरै रत्नत्रयालङ्कृतैः ॥ ५ ॥

दुर्गन्धं वदनं वपुर्मलगृहं भिक्षाटनाद्भोजनम्,
शय्या स्थण्डिलभूमिषु प्रतिदिनं कट्यां न ते कर्पटम् ।
मुण्डं मुण्डितमर्द्धदग्धशबवत्त्वं दृश्यसे भो जनैः,
साधोऽद्याप्यबलाजनस्य भवतो गोष्ठी कथं रोचते ॥ ६ ॥

अङ्गं शोणितशुक्रसंभवमिदं मेदोस्थिमज्जाकुलम्,
बाह्ये माक्षिकपत्रसन्निभमहो चर्मावृत्तं सर्वतः ।
नो चेत्काकवृकादिभिर्वपुरहो जायेत भक्ष्यं ध्रुवम्,
दृष्ट्वाद्यापि शरीरसद्मनि कथं निर्वेदना नास्ति ते ॥ ७ ॥

स्त्रीणां भावविलासविभ्रमगतिं दृष्ट्वानुरागं मनाक्,
मागास्त्वं विषवृक्षपक्कफलवत्सुस्वादवन्त्यस्तदा ॥
ईषत्सेवनमात्रतोऽपि मरणं पुंसां प्रयच्छन्ति भो,
तस्मात् दृष्टिविषाहिवत्परिहर त्वं दूरतोऽमृत्यवे ॥ ८ ॥

यद्यद्वाञ्छसि तत्तदेव वपुषे दत्तं सुपुष्टं त्वया,
सार्द्धं नैति तथापि ते जडमते ! मित्रादयो यान्ति किम् ।
पुण्यं पापमिति द्वयं च भवतः पृष्ठेऽनुयायिष्यते,
तस्मात्त्वं न कृथा मनागपि महामोहं शरीरादिषु ॥ ९ ॥

अष्टाविंशतिभेदमात्मनि पुरा संरोप्य साधौ व्रतं,
साक्षीकृत्य जिनान् गुरूनपि कियत्कालं त्वया पालितम् ।
भङ्क्तुं वाञ्छसि शीतवातविहतो भूत्वाधुना तद्व्रतं,
दारिद्र्योपतः स्ववान्तमसनं भुङ्क्ते क्षुधार्तोऽपि किम् ॥ १० ॥

सौख्यं वाञ्छसि किं त्वया गतभवे दानं तपो वा कृतं,
नो चेत्त्वं किमिहैवमेव लभसे लब्धं तदत्रागतम् ।
धान्यं किं लभते विनापि वपनं लोके कुटुम्बीजनो-
देहे कीटकभक्षितेक्षुसदृशे मोहं वृथा मा कृथाः ॥ ११ ॥

यत्काले लघुभाण्डमण्डितकरो भूत्वा परेषां गृहे,
भिक्षार्थं भ्रमसे तदापि भवतो मानापमानौ नहि ।
भिक्षो ! तापसवृत्तितः कदशनात्किं तप्स्यसेऽहर्निशम्,
श्रेयोर्थं किल सह्यते मुनिवरैर्बाधा क्षुधाद्युद्भवा ॥ १२ ॥

एकाकी विरहत्यनःस्थितबलीवर्दो यथा स्वेच्छया,
योषामध्यरतस्त्वमेवमपि भो ! त्यक्त्वात्मयूथं यते ! ।
तस्मिंश्चेदभिलाषता न भवतः किं भ्राम्यसि प्रत्यहम्,
मध्ये साधुजनस्य तिष्ठसि न किं कृत्वा सदाचारताम् ॥ १३ ॥

क्रीतान्नं भवतो भवेत्कदशने रोषस्तदा श्लाध्यते,
भिक्षायां यदवाप्यते यतिजनैस्तद्भुज्यते सादरात् ।
भिक्षो ! भाटकसद्मसन्निभतनोः पुष्टिं वृथा मा कृथाः,
पूर्णे किं दिवसावधौ क्षणमपि स्थातुं यमो दास्यति ॥ १४ ॥

लब्धान्नं यदि धर्मदानविषये दातुं न यैः शक्यते,
दारिद्र्योपहतास्तथापि विषयाशक्तिं न मुञ्चन्ति ये ।
धृत्वा ये चरणं जिनेन्द्रगदितं तस्मिन् सदा नादरा-
स्तेषां जन्म निरर्थकं गतमजाकण्ठे स्तनाकारवत् ॥ १५ ॥

दुर्गन्धं नवभिर्वपुः प्रवहति द्वारैरिमैः संततम्,
संदृष्ट्वापि हि यस्य चेतसि पुनर्निर्वेदता नास्ति चेत् ।
तस्माद्यद्भुवि वस्तु किदृशमहो तत्कारणं कथ्यते,
श्रीखण्डादिभिरङ्गसंस्कृतिरियं व्याख्याति दुर्गन्धताम् ॥ १६ ॥

शोचन्ति न मृतं कदापि वनिता यद्यस्ति गेहे धनम्,
तच्चेन्नास्ति रुदन्ति जीवनधिया स्मृत्वा पुनः प्रत्यहम् ।
कृत्वा तद्दहनक्रियां निजनिजव्यापारचिन्ताकुला-
स्तन्नामापि च विस्मरन्ति कतिभिः संवत्सरैर्योषितः ॥ १७ ॥

अन्येषां मरणं भवानगणयन् स्वस्यामरत्वं सदा,
देहिन् ! चिन्तयसीन्द्रियद्विपवशी भूत्वा परिभ्राम्यसि ।
अद्य स्वःपुनरागमिष्यति यमो न ज्ञायते तत्त्वतः,
तस्मादात्महितं कुरु त्वमचिराद्धर्मं जिनेन्द्रोदितम् ॥ १८ ॥

देहे निर्ममता गुरौ विनयता नित्यं श्रुताभ्यासता,
चारित्रोज्वलता महोपशमता संसारनिर्वेदता ।
अन्तर्बाह्यपरिग्रहत्यजनता धर्मज्ञता साधुता,
साधो ! साधुजनस्य लक्षणमिदं संसारविच्छेदनम् ॥ १९ ॥

लब्ध्वा मानुषजातिमुत्तमकुलं रूपं च नीरोगताम्,
बुद्धिं धीधनसेवनं सुचरणं श्रीमज्जिनेन्द्रोदितम् ।
लोभार्थं वसुपूर्णहेतुभिरलं स्तोकाय सौख्याय भो,
देहिन् ! देहसुपोतकं गुणभृतं भङ्क्तुं किमिच्छास्ति ते ॥ २० ॥

वैतालाकृतिमर्द्धदग्धमृतकं दृष्ट्वा भवन्तं यते !
यासां नास्ति भयं त्वया सममहो जल्पन्ति प्रत्युत्तरम् ।
राक्षस्यो भुवि नो भवन्ति वनिता मामागता भक्षितुं,
मत्वैवं प्रपलायतां मृतिभयात् त्वं तत्र मा स्थाः क्षणम् ॥ २१ ॥

मागास्त्वं युवतिगृहेषु सततं विश्वासतां संशयो
विश्वासे जनवाच्यता भवति ते न स्यात्पुमर्थं ततः ।
स्वाध्यायानुरतो गुरूक्तवचनं चित्ते समारोपयन्,
तिष्ठ त्वं विकृतिं पुनर्व्रजसि चेद्यासि त्वमेव क्षयम् ॥ २२ ॥

किं संस्कारशतेन विट् जगति भो कास्मीरजं जायते,
किं देहःशुचितां व्रजेदनुदिनं प्रक्षालनादञ्जसा ।
संस्कारो नखदन्तवक्रवपुषां साधो ! त्वया युज्यते,
नाकामी किल मण्डनप्रिय इति त्वं सार्थकं मा कृथाः ॥ २३ ॥

आयुष्यं तव निद्रयार्द्धमपरं चायुस्त्रिभेदादहो,
बालत्वे जरया कियद्व्यसनतो यातीति देहिन् ! वृथा ।
निश्चित्यात्मनि मोहपासमधुना संछिद्य बोधासिना,
मुक्तिश्रीवनितावशीकरणसच्चारित्रमाराधय ॥ २४ ॥

वृत्तैर्विंशतिभिश्चतुर्भिरधिकैः सल्लक्षणेनान्वितः,
ग्रन्थं सज्जनचित्तवल्लभमिमं श्रीमल्लिषेणोदितम् ।
श्रुत्वात्मेन्द्रियकुञ्जरान्समटतो रुद्धन्तु ते दुर्ज्जयान्,
विद्वांसो विषयाटवीषु सततं संसारविच्छित्तये ॥ २५ ॥

पू.आ.श्री मुनिचन्द्रसूरि विरचितम्

# ॥ मोक्षोपदेशपञ्चाशकम् ॥

शुद्धध्यानलवित्रेण, समूलः क्लेशपादपः ।
विलूनो येन स सदा, जिनो जीयाज्जगत्पतिः ॥ १ ॥

समस्त्यस्तसुखो मोहमूलो भवविषद्रुमः ।
विलीनातिचिरालीनवासनाजललालितः ॥ २ ॥

आधयो विविधावस्था, व्याधयश्चाधमाधमाः ।
जन्ममृत्युजराश्चास्य, स्वं स्वरूपं जिनैर्मतम् ॥ ३ ॥

दुर्भगत्वदरिद्रत्वविरूपत्वपुरस्सराः ।
विडम्बनाः फलं प्राहुर्विडम्बितजगज्जनाः ॥ ४ ॥

चतस्रो गतयः शाखा, नानादुःखफलाकुलाः ।
तासु यद्दुःखमाख्यातं, तदिदानीं निरूप्यते ॥ ५ ॥

पञ्चेन्द्रियवधासक्ता, मांसाशनकृतादराः ।
जायन्ते नरके जीवा, बह्वारम्भपरिग्रहाः ॥ ६ ॥

कुम्भीपाकेन पच्यन्ते, पिष्टवन्नष्टचेतनाः ।
तत्र मुञ्जादि (तृणादि) वच्चैते, हन्यन्ते लगुडैर्दृढैः ॥ ७ ॥

वज्रजङ्घेषु पीड्यन्ते, निपीड्यन्ते तिलेक्षुवत् ।
भृष्टा भूमीषु भृज्ज्यन्ते, निस्त्राणाश्चणकादिवत् ॥ ८ ॥

दारुवद्दारुणाकारैश्छिद्यन्ते च परश्वधैः ।
भिद्यन्ते प्रासकुन्ताद्यैराखेटकमृगादिवत् ॥ ९ ॥

तप्तं त्रपुं च पाय्यन्ते, आच्छोट्यन्ते शिलातले ।
आकीर्णां कण्टकैस्तीक्ष्णैरारोप्यन्ते च शाल्मलीम् ॥ १० ॥

काककङ्कश्रृगालाद्यैर्भक्ष्यन्तेऽत्यन्तनिर्दयैः ।
कार्यन्ते तरणं रीणा, वैतरण्याःसुराधमैः ॥ ११ ॥

यस्य जिह्वाशतं वक्त्रे, यो जीवेच्छरदां शतम् ।
सोऽपि वक्तुं क्षमो न स्यादशर्म नरकेषु यत् ॥ १२ ॥

कूटमानतुलावन्तो, मिथ्याभाषणतत्पराः ।
मायाविनो जना यान्ति, तैरश्चं जन्म निश्चितम् ॥ १३ ॥

यादृशं नरके दुःखं, तिर्यक्ष्वपि च तादृशम् ।
यतो वाहनदोहाद्या, व्यापदोऽत्र सुदुस्तराः ॥ १४ ॥

क्षुत्तृष्णाबाधिता दीनाः, पारवश्यमुपागताः ।
वहन्ति पशवो भारं, पृष्ठकण्ठसमर्प्पितम् ॥ १५ ॥

केचनादाहदोषेण, दाहदोषेण केचन ।
केचिदङ्कुशघातेन, कशाघातेन केचन ॥ १६ ॥

केचिद्वधेन बन्धेन, निरोधेन च केचन ।
कर्णपुच्छच्छविच्छेदनाशावेधादिभिस्तथा ॥ १७ ॥

अपारदुःखसंसारमध्यमग्ना दिवानिशम् ।
साक्षादेवेह दृश्यन्ते, तिर्य्यञ्चो वञ्चिताःशुभैः ॥ १८ ॥

सामान्यदानदातारस्तुच्छकोपादिकिल्बिषाः।
लभन्ते मानुषं जन्म, जन्मिनो मध्यमैर्गुणैः ॥ १९ ॥

रौद्रदारिद्र्यतस्तत्र, मृतभावातिशायिनः ।
केचित्कथञ्चिज्जीवन्ति, मानवा मानवर्ज्जिताः ॥ २० ॥

केचिन्निष्ठुरकुष्ठेन, सुष्ठु कष्टां दशां गताः ।
अन्ये ज्वरातिसारादिरोगोरगविषातुराः ॥ २१ ॥

परकर्म्मकराः केचिन्मलिनाननलोचनाः ।
दृश्यन्ते क्लेशजलधौ, मग्ना नग्ना अनादृताः ॥ २२ ॥

अन्ये स्कन्धसमारूढप्रौढभारा दृढापदः ।
जीवन्त्यतिजघन्येन, कर्मणा कर्म्मणोज्झिताः ॥ २३ ॥

ज्वलज्ज्वलनसम्पर्ककर्कशैर्विरहानलैः ।
केचित्तापितसर्वाङ्गा, ग्लायन्ति गलितोद्यमाः ॥ २४ ॥

अकामनिर्ज्जरादिभ्यः, केचन स्युः सुरा अपि ।
तत्रापि न सुखख्यातिः, काचिदस्ति सतां मता ॥ २५ ॥

वितुद्यमानहृदया, ईर्ष्याशल्यैर्दुरुद्धरैः ।
विषादवह्नावह्नाय, निपतन्त्यत्र केचन ॥ २६ ॥

कण्ठलोठितवादित्रा, हठतोऽकुण्ठतापराः ।
रङ्गस्थानेऽवतार्यन्ते, दीर्यमाणाङ्गिका इव ॥ २७ ॥

स्तम्बेरमतुरङ्गादिवाहनाकारधारिणः ।
दयाबाह्यं च वाह्यन्ते, केऽपि सृण्यादिघट्टनैः ॥ २८ ॥

चण्डालाकृतयः केचिच्चण्डदण्डैर्निपीडिताः ।
स्वप्नेऽप्यलब्धसंचाराः, पुरन्दरसभादिषु ॥ २९ ॥

स्वर्गाच्च्युतिं विलीनं च, गर्भजम्बाललोलनम् ।
पश्यन्तो यत्र भिद्यन्ते, तद्वज्रतनवः सुराः ॥ ३० ॥

यथेह लवणाम्भोभिः, पूरितो लवणोदधिः ।
शारीरमानसैर्दुःखैरसङ्ख्येयैस्तथा भवः ॥ ३१ ॥

किञ्चित्स्वप्नाप्तधनवन्न तथ्यमिह किंचन ।
असारं राज्यवाज्यादि, तुषकण्डनवत्तथा ॥ ३२ ॥

तडिदाडम्बराकारं, सर्वमत्यन्तमस्थिरम् ।
मनोविनोदफलदं, बालधूलीगृहादिवत् ॥ ३३ ॥

यश्च कश्चन कस्यापि, जायते सुखविभ्रमः ।
मधुदिग्धासिधाराग्रग्रासवन्नैष सुन्दरः ॥ ३४ ॥

अत एव विरज्यन्ते, नीरजोज्ज्वलमानसाः ।
रोगादिव भुजङ्गाद्वा, संसारावासतोऽमुतः ॥ ३५ ॥

यतन्ते च सदानन्दसुधानीरधयेऽधिकम् ।
परमब्रह्मसंज्ञाय, पदाय विगतापदे ॥ ३६ ॥

स्मरज्वरंज्वरा मुख्या, दोषा भवभुवोऽत्र ये ।
सर्व्वथा ते न सन्त्येव, यत्र तत् परमं पदम् ॥ ३७ ॥

सर्व्वकल्याणसंयोगः, सर्व्वमङ्गलसंगमः ।
सर्व्वोपादेयसीमा च, यतस्तन्मृग्यते बुधैः ॥ ३८ ॥

यथाऽमृतरसास्वादी, नान्यत्र रमते जनः ।
तथा मुक्तिसुखाभिज्ञो, रज्यते न सुखान्तरे ॥ ३९ ॥

तीर्ण्णप्रायभवाम्भोधिर्धूतसम्मोहकश्मलः ।
कश्चिदेव महाभागो, भवेत्सिद्धिसुखोन्मुखः ॥ ४० ॥

चौराकुलपथप्राप्तो, यादृशो दुर्ग्गसंग्रहः ।
गम्भीरसलिलेऽम्भोधौ, द्वीपाप्तिरथवा यथा ॥ ४१ ॥

महाशैलगुहायां वा, ज्वलद्रश्मिर्मणिर्यथा ।
विवेको निर्म्मलस्तद्वत्पुण्यभाजां विजृम्भते ॥ ४२ ॥

क्रियाभिर्ज्ञानमूलाभिर्मोक्षोऽक्षेपेण सिध्यति ।
ताः पुनर्देवतापूजागुरुसेवादयो मताः ॥ ४३ ॥

विशुद्धकेवलालोकविलोकितजगत्त्रयः ।
प्रातिहार्य्यमहापूजाजनितासमविस्मयः ॥ ४४ ॥

समस्तजगतामेकं, मौलिमाणिक्यमुज्ज्वलम् ।
अर्हन्नेव सतां देवो, देवतागुणभूषितः ॥ ४५ ॥

गुरुर्गृहीतशास्त्रार्थः, परां निःसङ्गतां गतः ।
मार्तण्डमण्डलसमो, भव्याम्भोजविकाशने ॥ ४६ ॥

गुणानां पालनं चैव, तथा वृद्धिश्च जायते ।
यस्मात्सदैव स गुरुर्भवकान्तारतायकः ॥ ४७ ॥

स पुनर्जायते तावदाचारात्सज्जनश्रुतेः ।
आत्मबोधविशेषाच्च, पुण्याच्चेत्याह सर्ववित् ॥ ४८ ॥

अक्षुद्रता दया दाक्ष्यं, क्षमा चाक्षविनिग्रहः ।
न्यायानुवृत्तिरनघा, यत्नश्च श्रुतशीलयोः ॥ ४९ ॥

समानधर्म्मवात्सल्यं, यतिधर्म्मादरः परः ।
इत्यादिः कुशलारम्भो, मुक्तिमार्ग्गतया मतः ॥ ५० ॥

मोक्षोपदेशपञ्चाशदेषा भाव्या मुमुक्षुभि ।
स्यान्मुनीन्द्रमुनीशेष्टं, येन मुक्तौ स्थिरं मनः ॥ ५१ ॥

श्रीमद्राजशेखराचार्यकृता

## ॥ दानषट्त्रिंशिका ॥

दातुर्वारिधरस्य मूर्द्धनि तडिद्गाङ्गेयशृङ्गारणा,
वृक्षेभ्यः फलपुष्पदायिनि मधौ मत्तालिबन्दिश्रुतिः ।
भीतत्रातरि वृत्तिदातरि गिरौ पुजा झरैश्चामरैः,
सत्कारोऽयमचेतनेष्वपि विधेः किं दातृषु ज्ञातृषु ? ॥ १ ॥

पित्रोर्वत्सलता गुरोर्व्रतभृतः शिक्षाप्रसादः प्रभोः,
सद्वृत्तं सुतकल्पभृत्यसुहृदां तत्तत्क्रियाभिग्रहाः ।
छन्दोज्योतिषतर्कलक्षणकथौचित्यं चिरं धार्यते,
सर्वं सत्पुरुषैः क्षणादपि पराग् दत्तं तु नेत्यद्भुतम् ॥ २ ॥

आरोहन्ति सुखासनान्यपटवो नागान् हर्म्यांस्तज्जुष-
स्ताम्बूलाद्युपभुञ्जते नटविटाः खादन्ति हस्त्यादयः ।
प्रासादे चटकादयोऽपि निवसन्त्येते न पात्रं स्तुतेः,
स स्तुत्यो भुवने प्रयच्छति कृती लोकाय यः कामितम् ॥ ३ ॥

स्फातिं बन्धुसरांसि यान्तु परितः कीर्त्तिश्रवन्त्यः स्फुरन्
तूच्चैर्माद्यतु दीनदुर्द्दरकुलं विद्वन्मयूरैः सह ।

म्लायन्त्याशु जवासका: खलजना: स्वर्णाम्बुदानोद्यते,
सत्पाथोमुचि विस्मयोऽयमिह मे मालिन्यगर्जी न यत् ॥ ४ ॥

तुङ्गा: सत्कुलविन्ध्यजा: सुगतय: सद्भावनावल्लकी
सक्ता:श्रीसहचारिणो बहुविधग्रन्थार्थभोज्योर्जिता: ।
गुर्वाधोरणशिक्षिता: शमगुडामिथ्यात्त्वदौ:स्थ्ये कले:,
प्राकारौ दलयन्त्युपासकगजाश्चित्रं मदान्धा न यत् ॥ ५ ॥

एकेनापि खरादयो भुजभृता रामेण निष्कन्दिता,
एकेनापि हनूमता विदलिता नक्तंचराणां चमू: ।
एकेनापि धनञ्जयेन पृतना दौर्योधनी चूर्णिता,
दात्रा तत्त्वविदा कलिर्बलवतैकेनापि निर्जीयते ॥ ६ ॥

किं वज्राकर एव दन्तनिवहो ? जिह्वाऽस्य किं देवता ?,
दृक्किं कल्पलता ? स्मितं किमु सुधा ? किं कल्पवृक्ष: कर: ? ।
किं चिन्तामणयो नखा: ? किमु मुखं चन्द्र: ? स्वर: शान्तिकं ?,
दृष्टेष्वर्थिजनस्य येष्विति मतिर्नन्दन्तु ते दानिन: ॥ ७ ॥

दत्ता भूर्बलिना धनं रविभुवा दैलेपिणा धर्मिणा,
राज्यं लक्ष्मणबान्धवेन करणं जीमूतकेतोस्तुका ।
एवं विक्रमसातवाहनमुखैर्दातार एते ततो,
मन्ये दानमपि प्रदातृ यदमी तद्दत्तकीर्त्या स्थिरा: ॥ ८ ॥

रुद्रोऽद्रिं जलधिं हरिर्दिविषदो दूरं विहाय:श्रिता:,
भोगीन्द्रा: प्रबला अपि प्रथमत: पातालमूले स्थिता ।
लीना पद्महदे सरोजनिलया मन्येऽर्थिसार्थाद् ह्रिया,
दीनोद्धारपरा: कलाविह खले सत्पुरुषा: केवलम् ॥ ९ ॥

प्राय: सत्यपि वैभवे सुरजन: स्वार्थी न दत्ते धनं,
तीर्थान्नोद्धरति क्वचिन्न हरति व्याधीन् न हन्त्यापदम् ।

अस्त्वात्मंभरिभिर्जनैर्युगलिभिर्धन्यास्तु केचिन्नराः,
सर्वाङ्गीणपरोपकारयशसा ये द्योतयन्ते जगत् ॥ १० ॥

दाता ध्यायति विष्टपं कियदिदं ? तत्रापि भागास्त्रयस्-
तत्राल्पा वसुधाऽम्बुधिर्यदवधिस्तत्रापि खण्डान्यहो ।
तत्रैकत्र वसामि तद्गिरिसरित्कान्ताररुद्धं ततः,
का शक्तिः ? किमुपाददे ? किमु ददे ? यद्दातृशब्दो मयि ?॥ ११ ॥

दत्ता सत्पुरुषाय यद्यपि मया तुष्टेन सेवाभरात्,
पुत्री श्रीर्विनयं नयं सुवचनं दानं विवेकं विना ।
काऽस्याः श्रीविनयादयश्च धिषणासाध्याः कुतः सा विना,
ब्राह्मीं ? तेन सखीयमस्त्विति युते ते तत्र धर्म्मो व्यधात् ॥ १२ ॥

प्राग्दारिद्र्यलिपिं भनक्ति लिखितां दैवेन भालेऽर्थिनां,
प्रत्यक्षानिव दर्शयत्यतिगतान् प्राच्यांनुदारान् कवीन् ।
धत्ते दुष्टयुगेऽपि शिष्टयुगतां लक्ष्मीं प्रकृत्याचला-
माचन्द्रं स्थिरतां नयत्ययमहो दानेन सिद्धः कृती ॥ १३ ॥

आदौ पात्ररतिस्ततः कृशदया निर्लोभता निर्मला,
धर्म्मश्रीरथ कीर्त्तिरिन्दुकुमुदाहङ्कारसर्वंकषा ।
स्वर्भोगर्द्धिरथानघा नृपरमा चारित्रलक्ष्मीरथा-
कृष्टामुक्तिरुपैत्यहो वितरणं स्त्रीवश्यसिद्धौषधम् ॥ १४ ॥

यो बभ्राम ससंभ्रमप्रणतभूपालेन्द्रपृष्ठस्थले,
विश्वं वात्सरिकप्रदत्तिसुधिया प्रोज्जीवयामास यः ।
यः साध्वाद्यनवद्यसंघशिरसि क्रीडोचितः सोऽर्हतः,
पाणिः स्याद्यदनुग्रहाद् गृहिकराधस्तां स्तुमो दातृताम् ॥ १५ ॥

औदार्यं कनकासनं सुवसनान्यक्रौर्यलज्जर्जुताः,
श्रद्धाचन्दनलेपनं सुविनयन्यायौ मणीकुण्डले ।

मुक्तावल्लरिरौचिती वितरणं कोटीरमेवं श्रियं,
देवीं गेहगतां कृती महति यस्तस्य स्थिरा सा रसात् ॥ १६ ॥

लक्ष्मीर्मे सुकृतेन यद्यपि गृहे न्यस्ता तथाऽप्येतया,
नानास्थाननिवासशीलमनवं दुर्म्मोचमित्यग्रयधीः ।
सत्रार्हद्गृहबिम्बपुस्तकवसत्युद्यापनाद्यैरिदं,
तस्याः पुष्यति वश्यबीजमपरं भावानुवृत्तेर्न हि ॥ १७ ॥

सङ्घाम्मोधिविवर्द्धनः शुभकरः सद्वंशपूर्वाचलो
द्भिन्नःसज्जनकैरवप्रमदनः सौम्यस्तमःस्तोमहा ।
सम्प्रीतार्थिचकोरकः सुतसुहृन्नक्षत्रतारागृहो,
दातेन्दुर्न पुनः क्षयी न च जडो नान्तः कुरङ्गोऽद्भुतम् ॥ १८ ॥

आर्द्रो दानजलैः करो निखिलमप्यङ्गं सुधासिन्धुगं,
वाक् सारस्वतदुग्धवार्द्धिविविधप्रोल्लेखकल्लोलभाग् ।
धीः कारुण्यसुधासरः सुखलहर्यालिङ्गनव्यापृता,
सन्नेवं शिशिरस्ततो हृदि कृतो लोकस्य तापच्छिदे ॥ १९ ॥

मूकः पूज्यसदस्युदारवचनो जल्पेषु दुर्वादिनां,
पूज्यानां क्रुधि भीलुकः परचमूद्दृष्टौ प्रकृष्टायुधः ।
द्यूतादिव्यसनक्षणेषु कृपणः पात्रेषु दानेश्वरः,
पश्चाद्भोजनकर्म्मणि प्रथमकः कार्ये सतां कोऽपि ना (पुमान्)॥ २० ॥

दानाद्दिक्पति भारतीहरिहरिप्रेष्ठा ग्रहग्रामपूः,
पातालोदकगोत्रदैवतमुनिक्ष्मापाललोकप्रिये ।
पुण्याढ्ये स्वपरप्रभुत्त्वकरणोद्युक्ते प्रवेशः क्व मे,
ध्यात्वेदं तदसूयकस्य सदने दारिद्र्यमालीयते ॥ २१ ॥

विद्वद्भ्योऽजनि वाग्वशा परभवे विद्याविचारो घनः,
सारासारविनिश्चयोऽथ करुणा धर्म्मस्ततः श्रीरियम् ।

इत्यादृत्य कृतज्ञतां सुमतिभिर्दानेश्वरैरन्वहं,
युक्तं यद्विदुषामुपासनकृते श्रीःकर्म्मकारीकृता ॥ २२ ॥

विश्वाश्वासकरो घनोऽपि तडिता गोधां मुधा बाधते,
दत्तेऽर्कः कुमुदाय न श्रियमहो पद्माय नेन्दुर्द्विषे ।
क्षुद्राङ्गाय जनाय नो वितरति प्रायः फलं पादपो,
दाता सत्पुरुषः परं परहिते बद्धप्रयत्नः समम् ॥ २३ ॥

तर्कव्याकरणादिशास्त्रनिवहस्याचार्यवृन्दारकै-
र्धर्म्मार्थं धनिभिर्विशालमतिभिर्भोज्यादिसद्वस्तुनः ।
तल्लाभेन तदर्थिभिः प्रमुदितैः सम्यक् तदीयस्तुते-
स्तन्निन्दोत्थितपातकस्य तु खलैः सत्रं कृतं स्पर्द्धया ॥ २४ ॥

अर्हच्चक्रभृतां सुरेन्द्रनिधयः षट्खण्डराज्यं वशे,
सौरीणामपि तत्तदर्थनिचयाः कर्णस्य सौरो वरः ।
जीमूतस्य कराग्रगः सुरतरुर्देवो विशालापते
र्दानं तैःसुकरं कलौ कृशधनान् सर्वस्वदातृन् स्तुमः ॥ २५ ॥

युद्धाहारकरप्रपीडनजपन्यासाक्षरस्थापना
स्थैर्यारोपकरोऽसि दैवतशतावासः सुपर्वाऽपभीः ।
तद् धर्मार्थिगलार्द्दने परवधूस्पर्शे परार्थग्रहे,
घाते च प्रगुणो जिनार्चनदयादानेषु पाणे ! स्फुर ॥ २६ ॥

पीठं सत्पुरुषस्य दक्षिणकरः प्राचीनपुण्योदयो,
मन्त्री तत्र महाश्रियं हिमवतः पद्मादवातीतरत् ।
न्यासैर्दानमयैर्विशेषसफलीकारं च तत्र व्यधाद्,
जातं कामिकतीर्थमित्यत इतस्तद्यात्रिकैः सेव्यते ॥ २७ ॥

अङ्घ्री तीर्थपथाग्रगौ सुकृतिनौ दारिद्र्यसर्वंकषौ,
पाणी धन्यतमौ जगत्प्रियवचाः कण्ठो भुजौ धूर्धुरौ ।

ईदृग्भाग्यभराभिराममलिपिभृद्धालं तदेषां क्रमात्,
पूजा माङ्गलिकेऽर्हतो दृशि जनैः सङ्घेशितुस्तन्यते ॥ २८ ॥

आदौ पाणिसरोरुहेषु गुणिनां पश्चात्तु देवालये,
नाभेयप्रभुनेमिशैलशिरसोर्मेरौ तथेन्द्रासने ।
मौलित्वेन जिनोत्तमाङ्गशिखरे छत्रत्रयत्वेन च,
न्यस्ताऽथामलसारके सुकृतिना लक्ष्मीर्ध्वजायां ततः ॥ २९ ॥

नास्तिक्याभिधदुर्गभूमिबलिना मिथ्यात्वकोशेशिना,
कार्पण्यादिभटोद्भटेन कलिना निर्लोठ्यमानं कृशम् ।
धर्म्मं स्वामिनमुन्नतिं नयति यो दानादिशस्त्रः स्फुरन्,
सङ्घानीकयुतो जयी स उचितं सङ्घाधिपः पूज्यते ॥ ३० ॥

जीवो जीवनबन्दिमोक्षणतपःसत्योक्तिशील़क्षमा-
वैरोच्छेदनदानसत्त्वधिषणापूज्यत्वविख्यातिभिः ।
संघेशो जिनधर्म्मतेजन भवत्सम्भावनार्हत्पद-
स्फूर्ज्जिष्यत्सुकृतप्रभावविभवानत्र व्यनक्त्यंशतः ॥ ३१ ॥

कर्पूरागुरुकुङ्कुमद्रुतिसुमश्रीखण्डगन्धोर्मिभि-
र्गेयस्तोत्रचरित्ररासललितैर्वाद्यारवैर्दन्तिभिः ।
अर्हद्बिम्बगृहातपत्रचमरस्नात्रार्हणानाटकै
स्तीर्थेस्वर्गमिहैव विन्दति वुधोऽमुत्रापि सोऽप्याप्स्यते ॥ ३२ ॥

स्वर्गङ्गा नवकुण्डमानसजलं दिव्यं च तच्चन्दनं,
पुष्पं हेम च मौक्तिकं च वसनं रम्भादिसङ्गीतकम् ।
सङ्कल्पेन समानय प्रभुजनोपास्त्यै मृदुर्ध्याय मा,
पापं चञ्चलताफलं चिनु मनः सद्ध्यानमेवं सताम् ॥ ३३ ॥

सेवां मोहवशाद् व्यलम्बयमहं कार्पण्यभङ्गं प्रभो-
र्भृत्यः किंकरकः कराङ्गुलिदलच्छेदी सहागांसि मे ।

अप्राप्ते त्वयि दैन्यमित्यतनुम त्रायस्व सुश्रावकाः,
किं विज्ञीप्सव इत्यमी जिनपतिं प्रत्यास्यकोशं व्यधुः ॥ ३४ ॥

श्रीमद्धर्षपुरीयगच्छतिलकश्रीसूरिवंशेगुरु-
र्विद्वत्पर्षदि राजशेखर इति प्रख्यातिमायाति यः ।
तेनेदं नवदेशनार्थिहृदयानन्दाय सारं मितं,
प्रोक्तं सङ्घमहोत्सवप्रकरणं सुश्रावकश्रीकरम् ॥ ३५ ॥

लक्ष्मीः सत्पात्रलाभादभृत सुभगतां मर्त्यजन्मद्रुमोऽयं,
साफल्यं प्राप दृष्टः सुगुरुमुखजुषामाशिषां सत्यभावः ।
मज्जन् कार्पण्यपङ्के सुचिरमतिजरन्नुद्धृतो दानधर्म्म-
स्तन्वद्भिस्तीर्थयात्रामहमिह विहितः को न लब्धप्रतिष्ठः ? ॥ ३६ ॥

## ॥ धर्मोपदेशः ॥

ॐ मित्यक्षरमक्षरद्युतिधरं त्रैलोक्यगर्भं परं
ब्रह्माकारमखण्डबिन्दुममलं नव्यार्द्धचन्द्रोर्ध्वगम् ।
मौलौ यद्दधदर्कबिम्बरुचिरं, ज्योतिस्तमस्तोमभित्
पञ्चानां परमेष्ठिनामपि पदं, ध्यायामि हृत्पङ्कजे ॥ १ ॥

ॐ शश्वज्जगतो हिताय परमानन्दाय चिन्मूर्त्तये,
शान्तायामिततेजसे भगवते सर्वोत्तमश्रीमते ।
कारुण्यामृतसिन्धुवृद्धिविधवे विज्ञानसद्वेधसे,
देवेन्द्रव्रजवन्दिताय विभवे, पार्श्वाय नित्यं नमः ॥ २ ॥

नत्वा सर्वसतो जनांस्त्रिजगतीलोकोपकारे रतान्,
विज्ञप्तिं विदधामि चारुमनसा तेषां पुरस्तादिमाम् ।
काव्यं मे प्रथयन्तु शुद्धमतयो ! धर्मोपदेशाभिधं,
सूते रत्नमिहाकरस्तु भुवने तन्वन्ति तज्ज्ञा जनाः ॥ ३ ॥

नरत्वं संप्राप्य स्मर हृदि सुदेवं भज गुरुं,
तथा सम्यग् धर्मं कुरु भवसहस्रेऽप्यसुलभम् ।
परीक्ष्यैतद्रत्नत्रयमिह महार्हं शुचिधिया,
तपोऽहिंसाशीलश्रुतकथितभावैर्वरगुणैः ॥ ४ ॥

न सकलेष्वपि योनिषु संसृतौ, चतुरशीतिकलक्षमितेष्वपि ।
मनुजयोनिमपास्य भवत्यहो जिनवरोदितधर्मसमर्थता ॥ ५ ॥

मरुद्दन्ती दन्तिष्वमरतरुरुच्चैस्तरुकुले,
गवां वर्गे स्वर्गोद्युमणिरिह मुख्यो द्युतिमताम् ।
सुरेष्विन्द्रः श्रीमत्यमरसरिदब्धेर्युवतिषु
प्रशस्तोऽसौ तद्वद् भवततिषु चोक्तो नरभवः ॥ ६ ॥

संसाराब्धावपारे मदमकरकुले दुःकषायाद्रिकूटे,
मोहावर्त्तातिभीमे वृजिनगुरुभरान्मज्जतां प्राणभाजाम् ।
पुण्याल्लभ्यं कदाचिज्जनिमरणजराक्लेशवीच्यर्दिताना-,
मार्ये देशेऽन्ववाये कथमपि भवति द्वीपतुल्यं नृजन्म ॥ ७ ॥

धर्मं शुद्धं कृपाढ्यं विनयपरिचितिं, क्षान्तिमक्षौघदान्तिं,
संतोषं साधुसङ्गं व्यसनविमुखतां सत्त्वमर्हत्सु भक्तिम् ।
निन्दात्यागं विरागं सकलभवसुखात् चात्मतत्त्वावबोधं
श्रीमज्जैनोपदेशं प्रकुरुत इति यः सोऽक्षयं सौख्यमेति ॥ ८ ॥

अखण्डमैश्वर्यमनल्पमायुर्वपुश्च नीरुक् पटुता सुलक्ष्मीः ।
कुटुम्बसंपत् सुकुलप्रसूतिः कृपालतायाः कुसुमान्यमूनि ॥ ९ ॥

अर्काऽस्तान्न यथेह वासररुचिः क्ष्वेडादनाज्जीवितं,
नैवाच्छं नवनीतमम्बुमथनात् बीजोद्गमश्चोषरात् !
ज्वालाजालसमन्विताऽनलकणव्यूहाद्यथा नाम्बुजं,
धर्मात् प्राणिवधोद्भवादपि तथा श्रेयो न संभाव्यते ॥ १० ॥

आत्मानं त्वं हंस्यघो स्वेष्टसिद्धौ भावी घातः कर्मणोऽतस्तदैव ।
उप्तं बीजं येन पुंसा हि यादृग् नूनं लूनं तेन कालेन तादृग् ॥११॥

आत्मा संसृतिजातियोनिषु गतः स्वजातिधर्माश्रितः,
सर्वोऽप्येव जिजीविषुर्भवति वै नो मर्त्तुकामः क्वचित् ।
अत्राऽर्हन् प्रतिभूर्यदा न मनुषे पृच्छ स्वमेव त्वकं,
हस्तस्थस्य हि कङ्कणस्य वद किं यद्दर्पणालोकनम् ॥ १२ ॥

आप्तैर्जुष्टं दयाख्यं भविजनहृदयोर्व्यां सदुप्तं हि बीजं,
सम्यक्त्वाम्भःप्रसेकात् तत इह समभूत् पत्त्रितोयः सुसेव्यः ।
धर्मो गीर्वाणवृक्षस्त्रिभुवनजनताभीप्सितार्थप्रदाता,
शाखा यस्याभिदीर्घा वितरणसुतपःशीलभावाभिधानाः ॥ १३ ॥

इह जगज्जनतावशकारकं शृणु सखे ! कथयामि तवौषधम् ।
विनयमेकमनल्पगुणं भजेः सकलदोषदवानलसन्निभम् ॥ १४ ॥

इष्टार्थान् विनयस्तनोति हि यथा-योग्यं सदार्थार्थिषु,
प्रीतिस्फीतिकरः सदोन्नतिधरः कामार्थिनां कामदः ।
त्रैवर्ग्यं फलवत्करोति नृभवे धर्मार्थिनां धर्मदः
सत्स्थानेषु नियोजितः पुनरसौ मोक्षार्थिनां मोक्षदः ॥ १५ ॥

ईर्ष्याद्रुच्छेदपर्शुर्मदकुलकरटित्रासने पञ्चवक्त्रो,
दुर्ध्यानध्वान्तसूर्यः कलहकलुषताशैलसंघातवज्रम् ।
अन्तः संशुद्धिहेतुः प्रबलतरकषायाभ्रवृन्दाशुगाभः,
सेव्यः सद्भिः सदाऽसौ विनय इति गुणग्रामसंपन्निधानम् ॥ १६ ॥

ईप्सुर्मोक्षमनल्पसौख्यसदनं यः स्यात् स चारित्रभाक्,
चारित्रं न भवेदृतेऽत्र विमलं सद्दर्शनादेव हि ।
सद्दृष्टेर्वरकारणं च गदितं सज्ज्ञानमाप्तैर्जनै
स्तल्लभ्यं सुगुरोर्गुरुर्विनयतस्तद्दायकः स्यात् खलु ॥ १७ ॥

उक्ता क्षमा सकलसंयमसारभूता धैर्यं विधाय विहितापि जिनाधिराजैः
तां धत्त सत्यमनसा बहुभिः किमन्यैः
कष्टप्रदैस्तनुतनुत्वकरैस्तपोभिः?१८

उदारार्हच्छैलात् सुकृतजलवाहैः समवहत्
महासिन्धुः क्षान्तिर्मलमपहरन्ती मलवताम् ।
तया तावच्छान्तिं नय किल कषायानलवलं
तपोऽरण्यं पुण्यं फलति शिवसौख्यं तव तदा ॥ १९ ॥

उत्तीर्णा गुरुकर्मभारकलिता अप्याशु जन्मोदधिं
शान्तिं नावमुपेत्य सद्गुणवतीं कैवल्यमोक्षाध्वगाम् ।
संप्रत्येव तरन्ति चात्र बहवश्चाग्रे तरिष्यन्त्यथो,
सन्तस्तेन मुमुक्षवश्च मुनयस्तामाश्रयन्ते दृढम् ॥ २० ॥

उर्ध्वं मेरोः शिरसि न यथा पङ्गुरारोढुमीशो,
जेतुं वादे सुरपतिगुरुं नैडमुको यथाऽलम् ।
धर्तुं पूर्वागमकमखिलं नाल्पमेधा यथैव,
प्राप्तुं मोक्षं मुनिरपि तथैवाऽक्षमो न क्षमः स्यात् ॥ २१ ॥

ऋजुः क्षान्त्या युक्तो भवति मृदुरप्यत्र पुरुषः,
स निर्लोभोऽपि स्यात्तपसि निरतः संयमधनः ।
सदा ब्रूते सत्यं तत इह गुणाढ्यः शुचिरपि,
प्रगृह्याऽऽकिञ्चन्यव्रतमपि सुशीलो व्रजति शम् ॥ २२ ॥

ऋषिवरा न हृषीकगणं निजं विषयवर्गकुमार्गविहारिणम्
विदधते किल तत्र स संचरन्, विविधदुःखगणं तनुतेऽङ्गिनाम् ॥ २३ ॥

ऋवर्णोऽयं यादृग् भवति किल वक्राकृतिधर,
स्तथैवैतानक्षानतिकुटिलभावान् विगणय ।

क्षिपन्त्येते जीवं विषयविषमारण्यकुपथे
न वाऽश्वाः स्वारोहे धृतदृढकुशिक्षाहितयुजः ॥ २४ ॥

ऋतवर्गलसाक्षराणि वक्त्रात् दशनस्थानबलेन संचरन्ति ।
प्रबलेन तथा मनोबलेन प्रचलन्ति विषयेषु चेन्द्रियाणि ॥ २५ ॥

एते ते विरसाः प्रतुच्छचटुलाः कौटिल्यमन्तः श्रिता-
श्चेतोलिसिमलावहाः भयङ्कराः पोद्यत्प्रबन्धान्विताः ।
नार्हा विश्वसितुं कदापि विषयाः सज्ज्ञानभाजां नृणां,
जम्बूवज्जलबिन्दुवज्जलजवज्जम्बालवज्ज्वालवत् ॥ २६ ॥

एणो दुःखी श्रवणविषयाद्रूपलोभात् पतङ्गो,
मीनो जिह्वारसवशगतो गन्धलुब्धो द्विरेफः ।
स्पर्शाऽऽकृष्टः शिरसि च गजोऽपष्टकष्टप्रवेत्ता,
हीत्येकस्मात् करणपिशुनात् जन्तुरार्त्तः समैः किम् ? ॥ २७ ॥

एता एणीदृशोऽस्मिन् विषयभटगणे प्रौढसेनाधिपत्यं,
बिभ्रत्योऽनेकचेष्टा मदननरपतेर्भुरिलब्धप्रसादाः ।
हावैर्भावैर्विलासैस्तव करणनरान् संविधास्यन्ति दासान्,
तस्मात्तान् शीलशाले प्रकटजडधियो रक्ष नूनं वराकान् ॥ २८ ॥

एतां स्फूर्तिमियर्ति सर्वकरणग्रामाभिरामां मुहू,
रामां सुन्दरवाटिकामिव सदा संप्राप्य चेतःकपिः ।
सद्वक्षोजफलां सुकोकिलरवां पाण्यंह्रिसत्पल्लवां,
भ्राजत्कायलतां सुपर्णकुसुमालङ्कारवस्त्रावृताम् ॥ २९ ॥

एकं तावदुपायमक्षकुटिलारातिप्रदान्तौ शृणु,
त्वं तत्प्रेरकमीश्वरं बलकरं पूर्वं मनोनामकम् ।
विज्ञानेन महौजसा छलवता गाढं समाक्रामयेः,
पश्चाद् भग्नबलस्त्वदीयचरणे स्थाताऽक्षसङ्घः स्थिरम् ॥ ३० ॥

ऐ ऐ न तृप्तोऽक्षगण: कदाचित् भोगैर्भवेद्रोगकरैर्विपाके ।
कण्डूयनै रक्तविकारजातै: संसेव्यमानैरिव पामनोऽङ्गी ॥ ३१ ॥

ऐश्वर्यमाश्चर्यकरं ब्रवीमि जम्बुमुनीन्द्रस्य सदा महर्द्धे: ।
येनाऽक्षधाटी स्वपुरप्रदेशात् शीलौजसा निर्विषयीकृताऽभूत् ॥ ३२ ॥

ओघै: शीलमयै: कृपावरसरिद्योगादगाधो हि य:,
क्षान्तिर्यस्य सुपालिरुज्ज्वलजलं ज्ञानं गुणा जन्तव: ।
यस्मिन् भाति विवेकवारिजकुलं सद्भाववीच्यन्वितं,
तं सत्यद्रुमवेष्टितं भज सदा संतोषनीराश्रयम् ॥ ३३ ॥

औचित्यं नगरं गृहं ह्युपशम: सद्भावना योषिता,
पुत्राश्चारुतपांस्यमात्य उदित: सत्याह्व आनन्दकृत् ।
प्रौढा संयमवाहिनी परिकरो यस्यास्ति चैतादृश:,
संतोषस्य नराधिपस्य वसतौ वासं कुरु श्रेयसे ॥ ३४ ॥

अङ्गी मिथ्यान्धकारावृतविमलतरज्ञेयभावप्रकाशो,
हेयोपादेयवस्तुप्रकटनसुपटु: स्यान्न तावच्च शीघ्रम् ।
तावत् तृष्णाहिमान्याऽर्दितसकलमति: कम्पवान् रारटीति,
श्रीमान् संतोषसूर्य: स्फुरति हि हृदयैन्द्र्यद्रिमौ(मो)लौ न यावत् ॥३५॥

असत्यत: पातकमत्र नाऽन्यत् क्षान्ते: परं नैव तपोऽपि किंचित् ।
परोपकारान्न च पुण्यमन्यत् संतोषत: सौख्यमिहास्ति नान्यत् ॥ ३६ ॥

कदाचित् पीयूषं यदि भुजगवक्त्रात् प्रभवति,
प्रतीचीदिग्गर्भादुदयति कदाचित् दिनमणि: ।
रज:पुञ्जोत्पीलात् द्रवति यदि तैलं क्वचिदपि,
प्रसङ्गान्नासाधोस्तदपि च गुणाप्ति: सुघटते ॥ ३७ ॥

कारुण्यं तनुते नयं च मनुते धत्ते प्रियत्वं सतां,
धर्माधर्मपरीक्षणं प्रकुरुते भिन्ते तमोऽन्तर्गतम् ।

सूते कीर्तिमखण्डितां च रमते संतोषपोषे सदा,
दुःखं संहरते सुखं च लभते साधोर्जनः संगमात् ॥ ३८ ॥

खनति व्यसनद्रुमस्य मूलं, हरति भ्रान्तिमशान्तिमुच्छिनत्ति ।
मुनिसंगतिरारुणद्ध्यशर्माखनिरुद्यद्गुणसन्ततेरिहाऽसौ ॥ ३९ ॥

गच्छत्यन्यं गमयति पुनर्मार्गमर्हत्प्रणीतं,
संसाराब्धिं तरति तरसा तारयत्यन्यलोकम् ।
धर्मं जानात्यभयदमलं ज्ञापयत्यात्मबुद्ध्या,
गु(सिं)सिक्षान्तिव्रतनियमनिधिः सेवनीयः स साधुः ॥ ४० ॥

घट्येका यदि साधुसंगतिमतिः स्यात्सा नृजन्माखिलं,
पुण्यं चात्र करोति पापहरणान्म्लानिं प्रहृत्य स्फुटम् ।
लोहं कोटिपलप्रमाणमनलज्वालाऽभितप्तं क्षितौ,
कोटीवेधरसच्छटेव सकलं सम्यक् सुवर्णं क्षणात् ॥ ४१ ॥

न संयमाचारतपोव्रतानि न ध्यानविज्ञानजिनार्चनानि ।
न धर्मकर्माणि जनस्तु सम्यक् सङ्गं हि साधोरनवाप्य वेत्ति ॥ ४२ ॥

ङस्यैकस्य स्थानकं च स्वरूपं भिन्नाभिन्नोच्चारणे कारणं च ।
शास्ता शास्ति प्रक्रियायां हि साधुः शब्दे धात्वादेशवाक्यागमेषु ॥४३॥

चौर्यं द्यूतं जीवमांसादनं च, वेश्यासेवा मद्यपानं तथैव ।
आ(क्षे) खेटाऽन्यस्त्रीप्रसङ्गौ च नूनं, कष्टान्येतान्यङ्गभाजां हि सप्त ४४॥

चतुर ! चेतसि नाम विचारय प्रथमतो व्यसनस्य दुरोदरम् ।
सकलदुर्नयदुर्गतिकारणं कुरु ततो व्यसनस्य निवारणम् ॥ ४५ ॥

छलान्वेषी द्यूतात् कठिनहृदयः स्याद् गतदयो,
विधत्ते पापर्द्धिं पललरसलोभो मधुरतः ।
ततश्चाज्ञोऽन्यस्त्रीं भजति गणिकां च स्मरभरात्,
धनार्थी चौर्यार्त्तो भवति बहुदुःखी व्यसनतः ॥ ४६ ॥

जनाधिपः पाण्डुसुतः सबन्धुर्वनेऽचरत् द्यूतरसाद् गतश्रीः ।
नलः स्वकीयामबलामपास्य, प्रभुत्वहीनोऽन्यनृपं सिषेवे ॥ ४७ ॥

झषस्तु मूढो मरणं प्रयाति, पलाग्रहात् कण्टकविद्धतालुः ।
जीवं विनाश्यामिषमत्ति जानन्, मुहुर्मुहुर्मृत्युमुपैति चाङ्गी ॥ ४८ ॥

झटित्युदरपूर्त्तये तरललोलया लालितः,
करोति हि पलाशनं मनसि मोदमुच्चैर्वहन् ।
न चार्थपरिमर्शनं प्रकुरुतेऽस्य मूढो जनो,
ऽयमद्मि बलतोऽधुना किल मांसं पुरो घत्स्यति (जक्ष्यति) ॥ ४९ ॥

झम्पायां कष्टशैलस्य पातितो हि मुहुर्मुहुः ।
बको मांसाऽशनेनैव वेदनाभाग् भवेऽभवत् ॥ ५० ॥

झम्पापातः प्रदत्ते सकृदिह मरणं प्राणिनां सोऽपि सम्यक्
भुक्तः क्ष्वेडस्त्वरितमसुहृत् तादृशो रज्जुपाशः ।
जाग्रज्ज्वालज्वलनसदने संप्रवेशोऽपि तद्वत्,
मांसाहारः सकृदपि कृतः स्यान् मुहुर्मृत्युदाता ॥ ५१ ॥

न विज्ञानं ज्ञानं न वरगुणगानं जिनपते,
न च ध्यानं स्थानं नहि शुभकलानां कथमपि ।
प्रधानं सन्मानं भवति च न दानं मतिमतां,
निदानं दुःखानामहह मधुपानं रचयतः ॥ ५२ ॥

ञवर्णो यथा (ञवर्णोऽस्वरः) प्राक्स्थजेनाऽस्वरेण,
ज्ञभावं विकारं भजेत् शब्दशास्त्रे ।
अभिज्ञोऽपि ना मद्यपानेन नूनं, भवेच्चाऽनभिज्ञो ह्युपादेयहेये ॥ ५३ ॥

टीकन्ते न कदाचिदेव जगति क्षीबाः स्वकीयं हितं,
मत्ता वृष्णिसुता विवेकरहिता जघ्नुर्हठाद् यं पुरा ।
पाराशर्यमुनिर्ददाह स च तान् यद् द्वारिकायां स्थितान्,
मुत्वा विष्णुबलौ मदव्यसनकं तस्माद् द्रुतं तत्त्यज ॥ ५४ ॥

टङ्कारेण भ्रुयुगेष्वासनस्य प्रेमाबद्धैर्गोलकैर्दृग्प्रचारैः ।
पक्ष्मश्रेण्युद्दाममूर्वीभवेन प्राणान् हन्ति प्राणभाजां हि वेश्या ॥ ५५ ॥

टलति धनविहिनात् पूर्वमित्रादपि द्राक्
सधनमधमजातिम्लानिमन्दत्वभाजम् ।
भजति परमभक्त्याऽऽकृष्टचित्तं विधाय,
त्यज बुध ! गणिकां तां दुष्टकष्टैकपात्रम् ॥ ५६ ॥

ठगिता नन्दिषेणाद्या वेश्यया सविलासया ।
ऋद्धिसिद्धिसुलब्ध्याढ्याः का कथाऽन्यस्य कथ्यते ॥ ५७ ॥

ठं धर्मेण धनेन ठं च तपसा मत्या च कीर्त्या च ठं,
शौचेनापि तथैव ठं च सततं सत्कर्मणा ठं पुनः ।
आत्मानं यदि कर्तुमिच्छसि सखे ! ठं श्रेयसा ठं श्रिया,
नीचाचारनिबन्धनं कुरु तदा पण्याङ्गनासेवनम् ॥ ५८ ॥

डयितुं नैव शक्नोति, परस्त्रीप्रेमपाशके ।
प्रविष्टोऽयं मनःपक्षी विषयशृङ्खलार्दितः ॥ ५९ ॥

डाकिन्येव परस्त्रियेह जगति, प्रोत्पाद्यते डामरं,
प्रेमार्द्रैरवलोकनैः सुविषमैः क्रूरैस्तु मन्त्रैरिव ।
भव्यात्मन् ! शृणु सादरस्तव मनोडिम्भस्य रक्षाकरं,
यन्त्रं चारु निधेहि तावदनिशं श्रीब्रह्मचर्याभिधम् ॥ ६० ॥

ढक्कां दीर्घापकीर्तेः स जगति विपुलां वादयामास वेगात्,
मूले लज्जालताया ददिरधममतिः पर्शुघातं प्रचण्डम् ।
धर्मारामे दवाग्निं सुकृतजलरुहः कन्दमेवोच्चखान,
प्रत्यूहव्यूहगेहं परयुवतिरतासेवनं यश्चकार ॥ ६१ ॥

णकारवर्णस्य भवेदशक्यं यथा समुच्चारणमस्तनक्रैः ।
तथैव शीलव्रतवर्जितैस्तु, नियन्त्रणं चैव सदेन्द्रियाणाम् ॥ ६२ ॥

नैर्ऋताधिपतिकीचकमुञ्जाः संचितप्रकटपातकपुञ्जाः ।
लेभिरेऽन्ययुवतीजनसङ्गप्रोल्लसद्व्यसनतो व्यसनानि ॥ ६३ ॥

त्यज परकान्ताकारागारं स्मर निजचेतसि मारविकारम् ।
यदि सर्वं परिहर्तुं नारं, कुरु कुरु पररमणीपरिहारम् ॥ ६४ ॥

थूत्कुर्वन्ति समे जगत्त्रयजना वृत्तेऽभिधाने तथा,
पुंसश्चापगुणत्वमुत्तमगुणव्राता प्रयान्ति क्षणात् ।
यस्मिन्नाचरिते कुकर्मणि भजेत् म्लानिं कुलं निर्मलं,
प्रोद्यद् दुःखमिहापरत्र भवति प्रेम त्वर्यजान्यस्त्रियाम् ॥ ६५ ॥

दलयति दयां दूरे दुष्टा लतामिव दन्तिनी,
ग्रसति सकलं पुण्यं व्याली नृणामिव जीवितम् ।
सृजति कुगतेः सङ्गं दूती प्रियेव नवस्त्रिया,
जहिहि मृगयां तामश्लाध्यां खनिर्विपदां हि या ॥ ६६ ॥

दशरथः क्षितिभृत्सुमहारथः समकरोत् मृगयाव्यसनार्दितः ।
किल कुकर्म भवद्वयदूषितं (दुःखकृत्) श्रवणतापसघातनपातकम् ॥६७

दारिद्र्यं दुःकुलत्वं कुचरितमनुजैः संगतिर्दुर्भगत्वं,
दासत्वं दीनभावस्त्वपटुकरणता दारकस्त्रीवियोगः ।
देहे दौर्बल्यकौब्ज्यं मरणभयमलं सर्वदाऽप्रीतिभावो,
दुष्टान्याक्षेटकद्रुर्विकिरति कुफलान्यङ्गभाजाममूनि ॥ ६८ ॥

धत्ते यस्य समर्जनाय बहुशः क्लेशानुपायान् जनो,
धैर्यं चेतसि संनिधाय च महत् संत्यज्य मृत्योर्भयम् ।
यत्नाद्रक्षति 'सङ्कटेऽतिविकटे प्राणाधिकं प्रीतितो,
हर्ता तस्य धनस्य योऽस्त्यघकरस्तस्मान्नरो नाऽपरः ॥ ६९ ॥

धर्मो नश्यति तत्क्षणादिह परद्रव्यापहर्तुर्नरात्,
शिष्टोऽनिष्टजनादिव प्रकुपितात् स्वीयान् गुणान् रक्षितुम् ।

निःशेषं विमलं कुलं च भवति म्लानं ततश्चैकत-
श्चैकस्मादिव दूषितादहिलतापर्णात् सुपर्णोच्चयम् ॥ ७० ॥

धनाभिधः प्राण इहास्ति बाह्यः स चान्तरप्राणबलप्रदाता ।
तस्याप्रहारे बलवर्जिताः स्युः प्राणाः समेता धनवर्जितस्य ॥ ७१ ॥

नरोऽदत्तग्राहव्यसनविषमोद्यद्विषभृतो,
मुखाविष्टो दष्टो भवति विकलात्मा द्रुततरम् ।
ततो लोभोद्वेगप्रबलविषमूर्च्छाकुलमनाः,
पतत्येवाधोऽधो मुहुरिव भवाब्धौ प्रवितते ॥ ७२ ॥

पद्मा व्याघुट्य पश्चाद्वलति परिगता प्रेमपूर्वं स्मरन्ती,
शुष्कापि द्राक् विहस्य प्रसरति जगतीमण्डपे कीर्तिवीरुत् ।
गाम्भीर्यौदार्यमुख्यप्रगुणगुणगणाराम उल्लासभावं,
धत्ते धर्मोऽपि दार्ढ्यं हृदि भजति नरः सत्त्वमेकं स्थिरं चेत् ॥ ७३ ॥

पराक्रमं सत्त्वमयं हि येषां, तेषां कुतः स्यात् परतो बिभीतिः ?!
कर्मद्विषः सत्त्वबलान्मुमुक्षुः क्षणान्निहत्यैत्यखिलान् विभुत्वम् ॥ ७४ ॥

परमसुखनिमग्नाः सज्जनाः पुण्यभाजो
जगति किल कदाचित् पूर्वदुष्कर्मयोगात् ।
अतिविपदि विषण्णा अप्यखण्डावृत्तास्ते
न जहुरहह सत्त्वं श्रीहरिश्चन्द्रमुख्याः ॥ ७५ ॥

परोपकृतिभाजनं भवति सत्त्ववान् सज्जनो,
न वक्ति कथमप्यसौ वचनमप्यलीकं मुखात् ।
दधाति परमं तपो विमलशीलधर्मं पुन-
र्गुणेषुसकलेष्वतो जगति सत्त्वमेवाऽधिकम् ॥ ७६ ॥

फलति चारुतपःशिखरी शिवं, सकलसंसृतिसौख्यसुपुष्पितः।
व्रतसरांस्यपि पुष्करपूर्णतां दधति सत्त्वघनाघनवर्षणात् ॥ ७७ ॥

बीजं धर्माङ्घ्रिपस्य प्रशमनरपतेः पत्तनं वासयोग्यं,
स्थानं रत्नत्रयस्योद्धतभवजलधौ यानमात्रं पवित्रम् ।
मोक्षश्रीकेलिगेहं सुकृतकजजलं श्रेयसां सन्निदानं,
विज्ञानध्यानवारांनिधिनिभमुदितं सेवनं श्रीजिनानाम् ॥ ७८ ॥

बाल्यस्थं चापि वृत्तं स्मृतमिह हरते हृद्गतं बालभावं,
तारुण्यं चातनोति स्फुटतरपटुताधामकारुण्यमुच्चैः ।
मर्त्याऽमर्त्याऽसुरेषूत्तमगुणगुरुतावृद्धिकृद् वृद्धभावः
श्लाघ्यं येषामवस्थात्रितयमपि मुहुस्तान् जिनेन्द्रान् भजध्वम् ॥ ७९ ॥

बद्धः सेतुर्भवाब्धौ सुखतरणकृते मोक्षसौधाधिरोहे,
क्लृप्तः सोपानमार्गः किल कुग(म)तिपुरे वर्त्म रुद्धं समन्तात् ।
आहूता सर्वसंपन्निजवपुषि गुणाः स्थापिताः स्थैर्यभाजो,
येनार्हद्भक्तियुक्तिः विधिवदिह यथाशक्ति पुंसा कृताऽस्ति ॥ ८० ॥

भज भज भगवन्तं भासिताऽनेकभावं
निजहृदयकजान्तर्वर्तिनं वीक्ष्य सम्यक् ।
जननमरणहीनं स्वं विधातुं यदीच्छेः
भवभयगदभङ्गे सिद्धनिष्णातवैद्यम् ॥ ८१ ॥

भ्रष्टं लभन्ते पुनरत्र केचित् केचिन्नवीनं समुपार्जयन्ति ।
सद्दर्शनं स्वं स्थिरयन्ति केचित् भव्या जनाः श्रीजिनराजभक्तेः ॥ ८२

मलतनयसवित्रीं व्याधिवीरुद्धरित्रीं
कुनयवनकुरङ्गीं दुर्यशोऽम्भोजभृङ्गीम् ।
कलहकलभरेवां पापभूमीशसेवां
व्यसनलशुनकन्दां दूरतो मुञ्च निन्दाम् ॥ ८३ ॥

माया यस्याः सवित्री प्रकुटिलहृदया चण्डकोपोऽस्ति तातः
सर्वस्योद्वेगकर्ता कुपथगतिरतो मत्सरो यद्विवोढा ।

यत्पुत्रौ कामलोभौ मदभरकलुषौ सद्म मोहः प्रसिद्धं,
ब्रह्मत्वं यास्यसि द्राक् स्पृशसि यदि सखे ! तां हि निन्दानिषादीम् ॥ ८४ ॥

मा मात्सर्यवशात् कुरुष्व रसने ! निन्दारसास्वादनं,
यत्पृष्ठामिषभक्षणं परपरीवादं जिनैर्गर्हितम् ।
जानीहि व्यसनं दुष्टमुदितं(मनिशं) त्याज्यं विपाके कटु,
त्वं चैतत् कुरुषे तवोपवसतेर्दुखं मुखं चैष्यति ॥ ८५ ॥

मधुरवचनवक्ता स्याज्जनः सर्वमान्यः,
कथयति नहि कश्चित्तस्य दोषान् सतोऽपि ।
प्रवितरति हि वित्तं कोकिलः किन्नु कस्माद् ?
अपहरति च जल्पन् वायसः कस्य किं भोः ? ॥ ८६ ॥

मा निन्दामदिराऽऽस्वादव्यसनावेष्टितो भव ।
तत् त्यक्तुं चेदशक्तोऽसि कुरुष्व स्वात्मनिन्दनम् ॥ ८७ ॥

यत्कर्मारिनिषदनं निगदितं ध्यायन्ति यद्यौगिनो,
नान्यद्येन समं तपः स्पृहयति प्राज्ञस्तु यस्मै सदा ।
यस्मात् केवलमेति यस्य महिमा श्रेष्ठस्तु यस्मिन्नभीः,
तच्छश्वत्सुखसंचयैकसदनं नित्यं सदा योगिनः ॥ ८८ ॥

यस्योद्यद्वरभावनाभरमहाकादम्बिनीजून्मभू-
र्यः संसारनिदाघदावशमनो यः पापपङ्कापहः ।
पिण्डस्थादिविचिन्तिताद्भुततरोद्बोधस्फुरद्गर्जितो,
वैराग्यामृतमुक् स वर्षति सतां क्षेत्रे दया शस्यके ॥ ८९ ॥

यदि हि जगति रागद्वेषदस्युप्रदुष्टौ
तव हृदयनिकाय्यस्याऽन्तराले प्रविष्टो ।
त्वमपि सुभट ! तावत् श्लाघ्यवैराग्यखड्गं
सपदि परिगृहाण द्राक् ततो यास्यतस्तौ ॥ ९० ॥

यादृक् सन्ध्याभ्ररागः क्षणसुभगतरो ह्याशुनाशिस्वभावो,
दर्भाग्रस्थोदबिन्दुः प्रपतनसहजः स्यात् समीरावधूतः ।
शश्वत् स्वप्नेद्रजालाश्रितमिव सकलं रूपमायुःकुटुम्बं,
सद्यःपात्यस्ति पिण्डोऽप्यशुचिरिति ततो धेहि वैराग्यमत्र ॥ ९१ ॥

यात्यायुश्चुलुकस्थितोदकमिव च्छिद्रच्युतैर्बिन्दुभिः,
श्वासोच्छ्वासविवर्तनैरहरहः, संक्षीयते यौवनम् ।
कालो व्याल इव प्रसर्पति पुनः पृष्ठे ग्रहीतुं छलात्,
तस्मान्निर्भयमाश्रय द्रुततरं वैराग्यरङ्गालयम् ॥ ९२ ॥

यावन्नीरुक् शरीरं प्रचुरबलयुतं शक्तिमानिन्द्रियौघः,
डाकिन्या दुष्टया द्राक् तव किल जरया स्पृष्टमेतन्न यावत् ।
आयुर्यावद् दवीयः स्फुरति च सकला स्फूर्त्तिरत्युज्ज्वलाऽस्मिं-
स्तावद् वैराग्यरङ्गं भज भज भविक ! श्रेयसां सन्निधानम् ॥ ९३ ॥

रागस्थानं रमण्या इह किल रमणः स्वार्थकारी हि यावत्,
पुत्रः पित्रोरभीष्टो भवति च विनयी स्वार्थतस्तौ च तस्य ।
स्वार्थाभावात् स्वजातिर्झटिति विघटयत्येव सङ्गं समन्तात्
तस्मात् स्वाभीष्टसिद्ध्यै सृजति हि मतिमान् चारुवैराग्यरङ्गम् ॥ ९४ ॥

रात्रौ प्रसुप्तमनुजः किल यत्प्रपश्येत्
तज्जाग्रतस्तु सकलं विफलं हि वस्तु ।
इत्थं विचारय निवारय मोहमाशु
द्रव्ये कुटुम्बसदने कुरु भो विरागम् ॥ ९५ ॥

रङ्कैकः क्षुधया पुरे च सकले भ्रान्त्वाऽग्रहीद् भैक्षकं,
तद्भुक्त्वा स्वकपालकं च शिरसि प्रस्थाप्य सुप्तो भृशम् ।
राजाहं तु रथाश्वापत्तिकगजै राज्यं च मे संकुलम्,
स्वप्नं वीक्ष्य यदेति बुध्यति तदाऽपश्यन्निजाऽऽद्यां स्थितिम् ॥ ९६ ॥

लक्ष्मीवान् पुरुषस्तु सज्जनशतैः संसेवितः सर्वतो,
रुप्यस्वर्णमनोज्ञमौक्तिकमणिद्रव्यैरनेकैर्युतः ।
निःस्वः कोऽपि शयान एकसमये तं संस्मरन्निद्रितो,
ऽपश्यत् स्वात्मनि तद्दशां पुनरसौ जाग्रत् त्वभूत् दुर्गतः ॥ ९७ ॥

वन्ध्यैका सुतचिन्तया कवलिता कृच्छ्रेण निद्रां गता,
स्वप्ने पुत्रमजीजनत् शुभतरं शुश्राव गीतध्वनिम् ।
आशाभिश्च समं सुतः स ववृधे तुष्टा ततो मानसे,
जातं जाग्रदवस्थितौ किल सुखात्तस्यास्तु दुःखं महत् ॥ ९८ ॥

शब्दाद्यैर्विषयैः प्रियैरिह यदा रागः समुत्पाद्यते,
बालस्य स्वयमप्रियैरपि तदा द्वेषस्तु तैरेव हि ।
तौ यावत्तव जाग्रतो यदि हृदि त्वं नाऽसि वैराग्यभाक्,
तावेवाशु बभूवतुर्यदि कृशौ देहं कृशं मा कृथाः ॥ ९९ ॥

शमाम्भःकासारं शिवयुवतिहारं वरगुणं
क्षमागारं सारं सजलजलधारं मतिभुवः ।
अपारं संसारं यदि लघु तितीर्षुः कुरु तदा
स्वसत्साक्षात्कारमनुभवविचारं निजहृदि ॥ १०० ॥

षट्कं त्रिकं षोडशकं भयानां द्वेषस्य रागस्य महाद्विषस्ते ।
निहत्य पूर्वं बलमाशु राजन् ! कुरुष्व राज्यं निजराजधान्याम् ॥ १०१ ॥

खेलन्ते निखिलाः खलाः बहुबलाः जाग्रच्छला निस्तुलाः,
रागाद्याः स्ववशं विधाय च मनः संखेलयन्त्यप्यमी ।
मा भूश्चेतन ! तादृशस्तदनुगो नो सन्ति ते त्वद्गुणा
स्त्वं (त्वेतेभ्यः) तेभ्यः पृथगेव चिन्मयतया ह्यानन्दसान्द्रोऽसि यत्।१०२

स्वरूपं विशुद्धात्मनश्चैतदुक्तं लसज्ज्ञानदृक्तत्त्वशुद्धोपयोगम् ।
न जानाति मिथ्यात्वमोहात्तदात्मा मृगो नाभिगन्धं यथा कायसंस्थम् १०३

समभ्येति रूपं यदात्मा स्वकीयं
स्थिरं निर्मलं केवलं निस्तुलं तत् ।
न कर्ता न हर्ता न पुण्यं न पापं
विधत्ते च किञ्चिच्छिवो निष्क्रियोऽयम् ॥ १०४ ॥

सहर्षं सतर्षं सवादं समादं सशोकं विशोकं सयोगं वियोगम् ।
अनात्मज्ञमात्मानमाच्छन्नबोधं विजानीह्यशुद्धं परत्वाभ्युपेतम् ॥ १०५ ॥

हरत्याशु कर्माणि पूर्वार्जितानि श्रितः स्वीययाद्धर्या महाशक्तियुक्तः ।
वियुक्तस्तयासौ पुनः स्यात् स कर्ता न कर्ता न हर्ता स्थिरश्चेत् स्वभावे १०६

लभेत स्थिरीभूय तत्र स्थितिं चे-
त्तदातस्य मोहः क्षयं याति शीघ्रम्
भवेज् ज्ञप्तिदृष्ट्योः समस्तोऽपि लाभो
ह्यदम्भो निधेः कुम्भ आरम्भहीनः ॥ १०७ ॥

क्षणेन क्षयं सर्वकर्माणि नीत्वा तदा सर्वदा क्षीणमोहः सयोगी ।
भवेद्वल्लभः केवलज्ञानलक्ष्म्याः क्रमान्मोक्षसौख्यामृताऽऽस्वादतृप्तः॥१०८

क्षरत्येष नो कर्हिचित् स्वीयभावात्
विधत्ते सदाभ्यासयोगं स्वतत्त्वे ।
स चात्मा न लिप्येत पङ्के भवाख्ये,
भवेन्निर्मलो वल्लभो नित्यलक्ष्म्याः ॥ १०९ ॥

इति विमलरसाढ्यो मातृकावर्णपद्यै-
र्विरचितमिह काव्यं चारु धर्मोपदेशम् ।
प्रपठति वरबुद्ध्या यः पुमानर्थशुद्धं,
स भवति कविलक्ष्म्या वल्लभः सज्जनानाम् ॥ ११० ॥

श्री विमलाचार्यविरचिता

# ।। संवेगद्रुमकन्दली ।।

दूरीभूतभवार्त्तिभिः प्रविदलन्मोहान्धकारोदयै-
र्नासावंशनिवेशितेक्षणयुगैर्यद्वीक्ष्यते योगिभिः ।
तत्पारे परतेजसां च तमसां प्राप्तप्रतिष्ठं परं
दुर्लक्ष्यं परमात्मसंज्ञममलं ज्योतिर्जयत्यक्षयम् ॥ १ ॥

रागद्वेषमदाभिमानमदनक्रोधादिभिर्वैरिभि-
र्व्याप्तं सर्वमिदं चराचरमिति प्रायो जगज्जित्वरैः ।
इत्यन्तःकरणप्रमत्तकरिणः सोल्लुण्ठमुच्छिन्दतो,
धर्मारामममसौ नियन्त्रणकुटी पञ्चाशदारभ्यते ॥ २ ॥

चेतः ! किन्न वृथालजालगुपिले बद्ध्वा भवेऽस्मिन् रतिं
सामग्रीं विफलीकरोषि सुचिराल्लब्ध्वा विशुद्धामिमाम् ।
क्षान्तिं मार्दवमार्जवं च शुचितां मुक्तिं तपः संयमं
सत्यं निर्धनताममैथुनमिमं धर्मं कुरुष्वादरात् ॥ ३ ॥

येनान्धीकृतमानसो न मनुते प्रायः कुलीनोऽपि सन्
कृत्याकृत्यविवेकमेत्यधमवल्लोके परित्याज्यताम् ।
धर्मं नो गणयत्यतिप्रियमपि द्वेष्टि स्वयं खिद्यते
स क्षान्तिक्षुरिकाधरेण हृदय ! क्रोधो विजेयस्त्वया ॥ ४ ॥

आत्मानं परितापयत्यनुकलं जन्मान्तरेष्वप्यलं
दत्ते वैरपरम्परां परिजनस्योद्वेगमापादयेत् ।
धत्ते सद्गतिमार्गरोधनविधौ गन्धद्वीपत्वं ततः,
क्रोधस्येत्थमरे ! रिपोः क्षणमपि स्थातुं कथं दीयते ? ॥ ५ ॥

एष्यद्दुर्गतिपातभीत इव यं कृत्वा स्वयं कम्पते
यद्भीतैरिव मांसशोणितरसैः कायः परित्यज्यते ।

खानिर्दुःखगणस्य निर्मलगुणम्लान्येकहेतुर्मनः
क्षान्त्या हन्त विलक्षतां निजरिपुः क्रोधो हठान्नीयताम् ॥ ६ ॥

भ्राम्यत्यूर्ध्वमुखः क्षमो नमयितुं पूज्येऽपि नो कन्धरा-
मन्तःक्षिप्तकुशीलतावशतनुः प्राणी यदध्यासितः ।
तं मानं विपदां निधानमयशोराशेर्निदानं सदा
मुक्त्वा मार्दवमादरेण महता चेतः ! समभ्यस्यताम् ॥ ७ ॥

विश्वस्तानपि वञ्चयत्यनुदिनं मित्रे गुरौ बन्धुषु
प्रायेण च्छलमीक्षते क्षणमपि द्रोहं विना दुःस्थितः ।
जागर्त्ति स्वपिति प्रतारणधिया यां सेवयन्निस्त्रपो
मायायाः प्रतिकूलमार्जवमरे तस्याः समासेव्यताम् ॥ ८ ॥

तृष्णावल्लीरियं नवैव विधिनाप्येतेन निष्पादिता
छेत्तुं प्रक्रमिता किमप्यतितरां या केवलं वर्द्धते ।
तल्लोभस्य विजृम्भितं स सकलक्लेशप्रसूतिस्ततो
मुक्तिर्मुक्तिवधूसमागमविधौ दूती समाराध्यताम् ॥ ९ ॥

तीर्थं तीर्थमरे परिभ्रमसि किं खेदाय दत्वा मनः ?
स्नानाद्बाह्यमलोऽप्यपैति न पुनर्भावानुबन्धः क्षयम् ।
आत्मा चैष कलङ्कितोऽन्तरमलैः शुद्धिं ततः किं भजे-
च्छौचं तत्तदहो कुरुष्व कुरुते तेषां यदुच्छेदनम् ॥ १० ॥

निस्तीर्णा बहवस्तरन्ति बहवो भव्यास्तरिष्यन्त्यपि
क्लेशाम्भोधिमगाधमप्यतितरां चीर्णेन येन ध्रुवम् ।
बाह्याभ्यन्तरभेदभिन्नमचिरात्संसारकारागृह-
क्रूरद्वारकपाटभेदि तदरे स्फीतं तपस्तप्यताम् ॥ ११ ॥

आत्मन्निच्छसि हन्त शाश्वतपुरीमार्गे विहर्तुं यदि
भ्रातः ! संयमवर्मणा कुरु तदा रक्षाविधिं सर्वतः ।

नो चेदिन्द्रियतस्करैस्तव हठात्तीक्ष्णाग्रभूरिस्फुर-
च्चिन्ताभल्लिशतैर्विभिद्य हृदयं ग्राह्यो विवेको मणिः ॥ १२ ॥

पुण्यानां प्रकटप्रवासपटहः प्रस्थानसन्मङ्गलं
माहात्म्यस्य यदत्र मन्त्र इव यत्कीर्त्तेः समुच्चाटने ।
आत्मापि स्वयमेव लज्जत इव प्रायो यदुच्चारणे
तन्मुञ्चानृतमादृतः कुरु सखे ! सत्येन सत्यं मुखे ॥ १३ ॥

कः कस्येह न को न कस्य किमिह स्वस्याथ किं चापर-
स्येत्थं चित्त ! भवस्वरूपमखिलं सञ्चिन्त्य मायामयम् ।
स्वर्णं लेष्टुमथो प्रियं रिपुमथो वेश्मान्यरण्यान्यथो
स्त्रैणानीह तृणान्यथो समदृशा पश्यन् भवाकिञ्चनः ॥ १४ ॥

यन्मुक्तः किल चक्षुषेव रहितः प्राणी न विभ्राजते
सर्वाङ्गं सुभगोऽपि हि व्रतविधेर्धर्मस्य यज्जीवितम् ।
धीराणामपि देवदानवनृणां यत्सर्वथा दुष्करं
तत्संसारलतालवित्रममलं रे ब्रह्मचर्यं भज ॥ १५ ॥

दिक्षु भ्राम्यसि यासि पारमुदधेर्दैन्यं समालम्बसे
सेवामिच्छसि गच्छसि प्रतिगृहं बद्धाञ्जलिर्याचसे ।
किं किं नास्य कृते करोषि वपुषो रे जीव ! लोकान्तर-
प्रस्थाने तु पदान्तरेऽपि भवता सार्द्धं न तद्यास्यति ॥ १६ ॥

लोकेभ्यः श्रृणुमः प्रतिक्षणमिमां संसारनिःसारतां
निःसन्देहमथात्मनाप्यहरहः प्रत्यक्षमीक्षामहे ।
किन्त्वेकान्तनितान्तसौख्यफलदे संवेगतुङ्गद्रुमे
नारोढुं क्षमसे दृढं निगडितो जीवः स्वकैः कर्मभिः ॥ १७ ॥

रे रे मानस ! निन्दितेषु विबुधैः कामेषु बद्ध्वाग्रहं
किं किम्पाकफलेष्विवान्तविरसेष्वेतेषु धत्से रतिम् ? ।

संहृत्याशु बहिर्भ्रमं कुरु किमप्यालोच्य तन्नो पुन-
र्येनास्मिन् जगति प्रकामकटुभिः कष्टैरुपद्रूयसे ॥ १८ ॥

हंहो मानस ! कथ्यतां मम पुरः पृच्छामि सप्रश्रयं
रे निर्लक्षण ! शिक्षिता कुत इयं निःसीमनिर्लज्जता ? ।
अस्य स्वार्थपरायणस्य वपुषः कृत्येषु मूढादरा-
दात्मायं सहजोऽपि निर्दय ! यतः खेदाय सङ्कल्प्यते ॥ १९ ॥

भूयो भूयोऽपि रे रे गतभय ! भवता भ्राम्यता भीमभीमे
संसारेऽस्मिन् विसोढाः कति कथय महावेदनाः कर्मदोषात् ? ।
जानानोऽप्येतदेवं प्रतिदिवसमहो तन्निदानेषु कस्मा-
दात्मन्नेकान्तमूढः कलयसि विषयेष्वेव सौख्याभिमानम् ॥ २० ॥

अभ्यस्तैः किमु पुस्तकैः किमथवा चेष्टाभिरेकान्ततः
कष्टाभिः किमु देवतादिविषयैः पूजाप्रणामादिभिः ।
चेतश्चेदिदमर्कतूलतरलं शक्येत रोद्धुं बलात्
कामेभ्यः करपङ्कजे ननु तदा सौख्यानि सर्वाण्यपि ॥ २१ ॥

संप्राप्ताः शतशः श्रियः सरभसं भुक्तानि सार्द्धं सुर-
स्त्रीभिः कामसुखानि तान्यपि मुहुर्भ्राम्यद्भिरस्मिन् भवे ।
किन्त्वालोचय निर्विकल्पकधिया भूत्वापि यन्नो भवेत्
तच्चेतः ! कथमुच्यते किल सुखं दुःखं तदेकान्ततः ॥ २२ ॥

एकं वक्रविलोकितेन वचनेनान्यं परं विभ्रमै-
र्भ्रूभङ्गस्तनदर्शनप्रभृतिभिर्व्यामोहयन्ति स्त्रियः ।
इत्येवं कुटिलासु कृत्रिमकृतस्नेहासु तास्वप्यलं
किं रे चित्त ! रतिं करोषि विमुखां सिद्ध्यङ्गनासङ्गमात् ॥ २३ ॥

आत्मन्यभ्यर्णभावं भज किमपि सखे ! शिक्षयामि क्षणं त्वां
स्वार्थभ्रंशेन कस्मादनवरतमहो मूर्खतामातनोषि ।

चेतस्त्वां तेषु तेषु भ्रमयति सततं पापकृत्येषु शश्व-
द्भूयोभूयोऽपि येषामहह स भविता दुःसहो दुर्विपाकः ॥ २४ ॥

आत्मन् ! मोहतमस्तिरस्कृतमते कृत्वा पुरस्त्वामहो
धूर्त्ताः सन्ततमिन्द्रियादय इमे पुष्णन्त्यभीष्टं निजम् ।
मूढ ! त्वं पुनरेक एव नरके सोढासि बाढं दृढं
छेदाच्छोटनपाटनादि तदरे वाचां न यद्गोचरम् ॥ २५ ॥

उन्मादादवमत्य रे श्रृणिमिव श्रीमद्गुरूणां वचो
लज्जा वीरुदिव द्विपेन भवता निर्मूलमुन्मूलिता ।
इत्युत्तीर्णमहो विचारशरणेरेतत्तथाप्युच्यसे
भ्रातर्मानसवेदनीयमचिराद्दुश्चेष्टितानां फलम् ॥ २६ ॥

अन्यो जीवः शरीराद्भ्रमति स च भवे पुण्यपापे च भुङ्क्ते
कोऽहं दर्शी तदस्मिन्निति हृदय ! कुरु त्वं यथेष्टं विकल्पान् ।
किन्तु ज्ञातव्यमग्रे शठ ! हठवचनैः सर्वमुच्चारयद्भ्यः
पाश्चात्त्यं चेष्टितं रे व्यपघृण ! परमाधार्मिकेभ्यस्त्वयेदम् ॥ २७ ॥

चेतः ! किं सानुरागं युवतिषु सहसा मानुरागं कुरुष्व
ज्ञात्वा स्वार्थैकनिष्ठं स्वजनपरिजनभ्रातृपुत्राद्यशेषम् ।
आमृष्टस्याष्टसङ्ख्यैरनुदिवसमहाकर्दमैः कर्मरूपै-
र्वाञ्छा स्वाभाविकं चेत्प्रकटयितुममुष्यात्मनः स्वच्छभावम् ॥ २८ ॥

आत्मन्नत्राणमार्त्तं दिशि दिशि तरले चक्षुषी विक्षिपन्तं
प्रत्यक्षेणेक्षसे रे जनमिममखिलं यान्तमास्ये यमस्य ।
तत्किं मोहान्ध ! हित्वा विषमिव विषयान् मुक्तनिःशेषसङ्गः
शृङ्गे भूमिंधरस्य क्वचिदथ विपिने तप्यसे नोर्ध्वबाहुः ॥ २९ ॥

ज्ञात्वा सत्वरगत्वरं जगदिदं मोक्षैकबद्धस्पृहा-
धन्याः केऽपि धनानि सन्त्यपि तृणानीव त्यजन्ति क्षणात् ।

चेतस्त्वं तु हताश ! यन्न भविता यन्नास्ति यन्नाभव-
द्वाञ्छां तन्दुलमत्स्यवद्वितनुषे तत्रापि कस्ते भ्रमः ॥ ३० ॥

उत्तानाम्बुजपत्रबिन्दुतरलां संसारभङ्गीमिमां
रे पश्यन्नपि नैव पश्यति भवानान्ध्यं तवालौकिकम् ।
कल्याणाय किल स्पृहा यदि गिरिप्रास्तप्रतिष्ठस्तदा
मुञ्चात्मन् ! भवचेष्टितान्यपि गिरिप्रास्तप्रतिष्ठो भव ॥ ३१ ॥

भ्रान्त्वास्मिन् बहुयोनिलक्षगहने संसारवारांनिधौ
मानुष्यं भवता सुरत्नमिव रे दुष्प्रापमासादितम् ।
तन्निकृत्रिमधर्मकर्मकनकेनायोज्यते यद्यहो
त्रैलोक्येऽपि करोति कः किल तदा तस्येह मूल्यं जनः ॥ ३२ ॥

वातोद्धूतपलालचञ्चल ! सखे ! चेतश्चिरेण त्वया
भ्रान्तं कुत्र न कुत्र लम्पट ! सुखप्रत्याशया सर्वतः ।
वाञ्छा वर्द्धत एव केवलमरे तत्सर्वथा शिक्षये
दाक्षिण्येन ममापि निर्वृतिकरं सन्तोषसौख्यं भज ॥ ३३ ॥

सोऽयं मोहमहाग्रहस्य महिमा मार्गादतीतो गिरा-
माश्चर्यं जननान्तरेष्वपि हठादापाद्य चान्ध्यं धियः ।
दुःखं सौख्यमिति प्रियं रिपुमिति ग्राह्यांश्च हेयानिति
श्रेयो विघ्नमिति प्रवर्त्तयति यो जीवं स्वकीयेच्छया ॥ ३४ ॥

एते दुःखमया इमे विषमया एते हि मायामया
एतेभ्योऽपि किमस्ति निन्दितमथैतेभ्यो विरूपं किमु ।
इत्थं रे विषयेषु लोलुपतया तैस्तैः प्रकारैः सखे !
चेतः ! किं विनिवार्यमाणमपि धिग् बद्धस्पृहं धावसि ॥ ३५ ॥

त्वद्वश्योऽयमचेतनः सुखमयो दुःखं समासादये-
ज्जीवः संसृतिवर्त्मनीह गहने विज्ञाप्यसे त्वं ततः ।

दृष्टा हन्त नरामरादिगतयस्तत्सर्वथा साम्प्रतं
तत्किञ्चित्कुरु मुक्तिसङ्गममपि प्राप्नोति यस्मादयम् ॥ ३६ ॥

किं धात्रा सह सख्यमस्ति भवतः किं वा किमप्यौषधं ?
सिद्धं मृत्युजराविनाश्यधिगतं भ्रातः ! कुतश्चित्त्वया ? ।
आत्मन् ! मोक्षसुखे पराङ्मुख ! सखे ! स त्वं हृषीकैर्जितो
येन स्थैर्यनिषण्णबुद्धिरधिकं निश्चिन्तवच्चेष्टसे ॥ ३७ ॥

किं मोहः किमयं भ्रमः किमथवोन्मादः प्रमादोऽथवा
जाड्यं किन्नु विपर्ययः किमथवा किं वाज्ञतेयं तव ।
स्निग्धं बन्धुमिवान्तिकस्थमसकृन्मृत्युं न येनेक्षसे
नित्यं मूढधियां गुरो ! स्वपिषि रे स्वास्थ्येन रात्रिंदिवम् ॥ ३८ ॥

अद्येदं श्व इदं तथा परुदिदं कृत्यं परारि त्विदं
चेतश्चिन्तयसीत्थमेव सततं निर्व्याकुलं रे स्फुटम् ।
तत्कालं विलसन्मनोरथलताकान्तारदावानलो
यस्मिन् दण्डधरः स्मरिष्यति सखे ! कोऽप्यस्ति सोऽपि क्षणः ३९ ॥

सत्यं हारीणि हंहो हृदय ! मृगदृशां विभ्रमादभ्रभूरि-
भ्रूभङ्गोज्जृम्भमाणस्मरललितजुषामत्र लीलायितानि ।
आमुक्तेर्मुक्तबाहुस्तदपि गतघृणः प्राणिनां जीवितानि
क्रीडन्नप्येष कालः कवलयति बलात्किन्तु दूराद्विकृष्य ॥ ४० ॥

या एवं स्फारतारद्युतिभरविशदोदारहाराभिराम-
प्रोद्दामाभोगतुङ्गस्तनकलशजुषो मोहयन्ति स्म चेतः ।
ता एवैतर्हि मात्रं सकलमपि जराजर्जरं धारयन्त्यो
विद्वेषायेति मत्वा कथमिव कुरुषे तात्त्विकीं तासु बुद्धिम् ॥ ४१ ॥

हंहो लज्जाविहीन ! प्रतिदिवसमिदं शिक्षयामो भवन्तं
मा गाः स्त्रीणां समीपं हतकहृदय ! रे ता हि मायासरस्यः ।

तासामालोक्य रूपं मृग इव तृषितः सस्पृहं धावसि त्वं
तृष्णासन्तापवृद्ध्यै तव तु तदधिकं कारणं मूढ ! किञ्चित् ॥ ४२ ॥

तैस्तैः कस्तूरिकाद्यैः स्तबकितमपि यद्याति दौर्गन्ध्यमारा-
न्निष्टा यस्येह विष्टा कृमिकुलमथवा भूरिभस्माथवापि ।
कृत्वा धर्मस्य बाधामनुदिवसमरे वञ्चनाभिः परेषा-
मात्मन्! कोऽयं विमोहस्तव तदपि वपुः पाल्यते यत्त्वयेत्थम् ॥ ४३ ॥

यैः सार्द्धं विप्रयोगः क्षणमपि मरणस्यैव कोऽपि प्रकारः
कृत्याकृत्यं न किञ्चिद्विगणयति कृते हन्त येषां विमूढः ।
प्रेमार्द्रा अप्यमी रे गतवति भवति प्रेक्षतां प्रेतभर्त्तुः
क्षिप्त्वा त्वत्कायमेनं हुतभुजि सुजनाः किं स्मरिष्यन्त्यपि त्वाम् ? ४४

मायाभ्यासे गुरुस्ते समभवदिह रे कोऽत्र संसारचक्रे
भ्रान्त्वा भ्रान्त्वा किमस्मिन्नियमितरपरित्यागतः शिक्षितैका ।
यत्प्राणेभ्योऽप्यभीष्टान्नियतिकवलितान् वीक्ष्य गाढं रुदित्वा
चेतः ! प्रोन्मुक्तकण्ठं पुनरपि कुरुषे स्वानि लीलायितानि ॥ ४५ ॥

त्वत्तः कोऽपि न मूढधीरिह जने जानामि चेतः ! सखे !
येनास्याक्षकुटुम्बकस्य सहसा विश्वासमागच्छसि ।
एतस्मिन् प्रतिबिम्बिते हि विषयग्रामो यथा दर्पणे
भानुस्तापयते परं ननु तथा त्वां मूर्ख ! दुःखातिथे ! ॥ ४६ ॥

श्रुत्वा श्रुत्वा गुरुभ्यः स्वयमपि च तथा वीक्ष्य वीक्ष्यातिभीमं
संसारं दुःखसारं किमपि भयवशः सर्वथा प्रार्थयामि ।
चेतः ! कृत्वा प्रसादं परिहर सकलानेव मिथ्याविकल्पान्
भ्रातर्भृत्यस्तवाहं विरम विरम रे भङ्गुराद्भोगसङ्गात् ॥ ४७ ॥

चेतस्त्वं सहचारि मे त्वदनुगः सौख्यानि दुःखानि वा
सर्वत्रापि सहाम्यहं तदपि रे दाक्षिण्यतो भण्यसे ।

लब्धं मानुषजन्म दुर्लभमिह प्राप्तं च जैनं मतं
हा हा हारयसे कथं हतमते ! निर्लज्ज ! निर्लक्षण ! ॥ ४८ ॥

संहृत्येन्द्रियवर्गमर्गलमिमं रुद्ध्वा च बाह्यान्तरं
व्यापारं गिरिकन्दरेषु यदि रे ज्योतिः परं ध्यायसि ।
चेतः कोऽपि तदा तवाशु स भवत्यानन्दसौख्योदयः
संसारे भ्रमता न यः क्वचिदपि स्वप्नेऽपि संवादितः ॥ ४९ ॥

संसारोऽयमसारवस्तुविसरः को वेत्ति कच्चित्पुन-
र्मानुष्यं भविता कदापि सुगुरुर्लभ्योऽपि वा कर्हिचित् ।
दुर्वारप्रसराः कृतान्तसुभटा मर्त्तव्यमेव ध्रुवं
तत् त्वं स्वान्त ! नितान्तकान्तमपरं प्रेक्षस्व तत्त्वान्तरम् ॥ ५० ॥

श्रीचक्रेश्वरसूरिमानससरोहंसः समुत्साहितः
सत्यं सज्जनदुःखकैरवरवेः श्राद्धस्य वाचा रवेः ।
आचार्यो विमलाभिधः समकृत श्रीब्रह्मचन्द्रापर-
ख्याताभिख्य इमां मनो रमयितुं सद्वृत्तपञ्चाशतम् ॥ ५१ ॥

आकाङ्क्षा यदि मोक्षवर्त्मनि मतिः सन्तोषसौख्ये यदि
प्रद्वेषो विषयेषु यद्यथ रतिर्नीरागतायां यदि ।
तच्छुद्धां विधुतोऽपि कोमलतरामप्यब्जगर्भादिमां
संवेगद्रुमकन्दलीं पठत भो बद्धो भवद्भ्योऽञ्जलिः ॥ ५२ ॥

श्रीमद्जिनवल्लभसूरिगुम्फिता

## ॥ धर्मशिक्षा ॥

नत्वा भक्तिनताङ्गकोऽहमभयं नष्टाभिमानक्रुधं,
विज्ञं वर्द्धितशोणिमक्रमनखं वर्ण्यं सतामिष्टदम् ।
विद्याचक्रविभुं जिनेन्द्रमसकृल्लब्ध्वाऽस्य पादं भवे,
वेद्यं ज्ञानवतां विमर्शविशदं धर्म्यं पदं प्रस्तुवे ॥ १ ॥

भो भो भव्या ! भवाब्धौ निरवधिविधुरे बम्भ्रमद्भिर्भवद्भि-
र्दृष्टान्तैश्चोल्लकाद्यैर्दशभिरसुलभं प्रापि कृच्छ्रान्नरत्वम् ।
तच्चेत्क्षेत्रादिसामग्र्यपि समधिगता दुर्लभैवेति सम्यग्,
मत्वा माहाकुलीनाः कुरुत कुशलतां धर्मकर्मस्वजस्त्रम् ॥ २ ॥

भक्तिश्चैत्येषु सक्तिस्तपसि गुणिजने रक्तिरर्थे विरक्तिः,
प्रीतिस्तत्त्वे प्रतीतिः शुभगुरुषु भवाद् भीतिरुद्धात्मनीतिः ।
क्षान्तिर्दान्तिः स्वशान्तिर्मु[सु]खहतिरबलावान्तिरभ्रान्तिरासे,
ज्ञीप्सा दित्सा विधित्सा श्रुत-धन-विनयेष्वस्त्रु (स्तु ?)धीः पुस्तके च

व्यपोहति विपद्भरं हरति रोगमस्यत्यघं,
करोति रतिमेधय-त्यतुलकीर्ति[तः] श्रीगुणान् ।
तनोति सुरसम्पदं वितरति क्रमान्मुक्ततां,
जिनेन्द्रबहुमानतः फलति चैत्यभक्तिर्न किम् ? ॥ ४ ॥

तद्गेहे प्रस्नुतस्तन्यभिलषति मुदा कामधेनुः प्रवेष्टुं,
चिन्तारत्नं तदीयं श्रयति करमभिप्रैति तं कल्पशाखी ।
स्वःश्रीस्तत्सङ्गमाय स्पृहयति यतते कीर्तिकान्ता तमाप्तुं,
तं क्षिप्रं मोक्षलक्ष्मीरभिसरति रतिर्यस्य चैत्यार्चनादौ ॥ ५ ॥

चक्रे तीर्थकरैः स्वयं निजगदे तैरेव तीर्थेश्वरैः,
श्रीहेतुर्भवहारि दारितरुजं सन्निर्जराकारणम् ।

सद्यो विघ्नहरं हृषीकदमनं माङ्गल्यमिष्टार्थकृद्,
देवाकर्षणकारि दुष्टदलनं त्रैलोक्यलक्ष्मीप्रदम् ॥ ६ ॥

इत्यादिप्रथितप्रभावमवनी-विख्यातसङ्ख्याविदां,
मुख्यैः ख्यापितमाशु शाश्वतसुख-श्रीक्लृप्तपाणिग्रहम् ।
आशंसादिविमुक्तमुक्तविधिना श्रद्धाविशुद्धाशयैः,
शक्तिव्यक्तिसुभक्तिरक्तिभिरभिध्येयं विधेयं तपः ॥ ७ ॥

ज्ञानादित्रयवाञ्जनो गुणिजन-स्तत्सङ्गमात्सम्भवेत्,
स्नेहस्तेषु स तत्त्वतो गुणिगुणै-कात्म्याद् गुणेष्वेव यत् ।
तस्मात्सर्वगसद्गुणानुमननं तस्माच्च सद्दर्शनं,
यस्मात्सर्वशुभं गुणिव्यतिकरः कार्यः सदार्यैस्ततः ॥ ८ ॥

स स्नातश्चन्द्रिकाभिः स च किल मृगतृष्णाजलैरेव तृप्तः,
खाब्जैर्मालां स धत्ते शिरसि स शशशृङ्गीयचापं बिभर्त्ति ।
मथ्नात्येष स्थवीयः स्थलतलसिकता-स्तैलहेतोर्य उज्झन्,
सङ्गं ज्ञानक्रियावद्गुणिभिरपि परं धर्ममिच्छेच्छिवाय ॥ ९ ॥

त्वग्भेदच्छेदखेद-व्यसनपरिभवा-प्रीति भीतिप्रमीति-
क्लेशाविश्वासहेतुं प्रशमदमदया-वल्लरीधूमकेतुम् ।
अर्थं निःशेषदोषा-ङ्कुरभरजननप्रावृषेण्याम्बु धूत्वा,
लूत्वा लोभप्ररोहं सुगतिपथरथं धत्त सन्तोषपोषम् ॥ १० ॥

निद्रामुद्रां विनैव स्फुटमपरमचैतन्यबीजं जनानां,
लक्ष्मीतृष्णौघभावः प्रकटमपटलः सन्निपातोऽत्रिदोषः ।
किञ्च क्षीराब्धिवासि-न्यभजदियमपां सर्पणान्नीचगत्वं,
कल्लोलेभ्यश्चलत्वं स्मृतिमतिहरणं कालकूटच्छटाभ्यः ॥ ११ ॥

जीवा भूरिभिदा अजीवविधयः पञ्चैव पुण्याश्रवौ,
भिन्नौ षड्गुणसप्तधा प्रकृतयः पापे द्व्यशीतिः स्मृताः ।

भेदान् संवरबन्धयोः पृथगथा-ऽऽहुः सप्तपञ्चाशतं,
मोक्षो देशविनिर्जरेति च नव श्रद्धत्त तत्त्वानि भोः ! ॥ १२ ॥

सर्वज्ञोक्तमिति प्रमाघटितमित्यक्षोभ्यमन्यैरिति,
न्यायस्थानमिति स्फुटक्रममिति स्याद्वादधीभागिति ।
युक्त्या युक्तमिति प्रतीतिपदमि-त्यक्षुण्णलक्ष्मेति सत्,
सप्त द्वे नव चेत्यवेत्त बहुधा तत्त्वं विवक्षावशात् ॥ १३ ॥

सम्यग्ज्ञानगरीयसां सुवर्चसां चारित्रवृन्दीयसां,
तर्कन्यायपटीयसां शुचिगुणप्राग्भारबृंहीयसाम् ।
विद्यामन्त्रमहीयसां सुमनसां भव्यव्रजप्रेयसां,
धत्तोच्चैस्तपसां विकाशियशसां सम्यग्गुरूणां गिरः ॥ १४ ॥

मुक्तौ गन्तरि मोहहन्तरि सदा शास्त्रस्थितौ रन्तरि,
ध्यानध्यातरि धर्मधातरि वर-व्याख्यातरि त्रातरि ।
विद्वद्भर्तरि शीलधर्त्तरि तमः-स्तोमं तिरस्कर्तरि,
द्वेषच्छेत्तरि रागभेत्तरि गुरौ भक्ताः स्थ वाग्वेत्तरि ॥ १५ ॥

प्रोत्सर्पद्दर्पसर्पन्मृतिजननजरा-राक्षसे नोकषाये,
क्रूरोरुश्वापदौघे विषमतमकषा-येद्धदावाग्निदुर्गे ।
मोहान्धा भोगतृष्णा-ऽऽतुरतरलदृशो भूरि बम्भ्रम्यमाणा-
स्त्राणाय प्राणभाजो भववनगहने क्लेशमेवाश्रयन्ते ॥ १६ ॥

सुखी दुःखी रङ्को नृपतिरथ निःस्वो धनपतिः,
प्रभुर्दासः शत्रुः प्रियसुहृदबुद्धिर्विशदधीः ।
भ्रमत्यभ्यावृत्त्या चतसृषु गतिष्वेवमसुमान्,
हहा ! ! संसारेऽस्मिन् नट इव महामोहनिहतः ॥ १७ ॥

सख्यं साप्तपदीनमुत्तमगुणा-भ्यासः परोपक्रिया,
सत्कारो गुरुदेवताऽतिथियति-ष्वायत्यनुप्रेक्षणम् ।

स्वश्लाघापरिवर्जनं जनमनः-प्रेयस्त्वमक्षुद्रता,
सप्रेमप्रथमाभिभाषणमिति प्रायेण नीतिः सताम् ॥ १८ ॥

तथ्यापथ्यायथार्थस्फुटमितमधुरोदारसारोद्य[ता वाक्]ते वा,
क्वे (?)[चे]तश्च क्षोभलोभस्मयभयमदनद्रोहमोहप्रमुक्तम् ।
कार्यं देहं च गेहं व्रतनियमशमौचित्यगाम्भीर्यधैर्य-
स्थैर्यौदार्यार्यचर्याविनयनयदया दाक्ष्यदाक्षिण्यलक्ष्म्या ॥ १९ ॥

प्रीत्या भीत्या च सर्वं सहति किल स[दा]वो (?)ऽप्यश्नुतेऽचेष्टमेवं,
कार्यं कुर्यात् क्षमी य-न्न तदिह कुपितः स्पष्टमेतज्जनेऽपि ।
तस्माद[त्यु]प्युग्ररोग-द्विषि मिषति रिपौ सर्वशास्त्रोदितायां,
सर्वाभीष्टार्थलाभप्रभवकृति सदाऽर्थत्ति तद्यत् (अर्थयते यत् ?) क्षमायाम्

दशविधयतिधर्मस्यादिमं क्षान्तिरङ्गं,
विमलगुणमणीनां रोहिणाद्रिः क्षमैव ।
तदिति कुशलवल्लिप्रोल्लसल्लास्यलीला,
कुसुमसमयमुच्चैर्धत्त रोषप्रमोषम् ॥ २१ ॥

विद्याकन्दासिदण्डः कुगतिसुरगृह-प्रोल्लसत्केतुदण्डः,
प्रद्वेषश्लेषहेतुः सुगतिजलधिनि-स्तारविस्तीर्णसेतुः ।
शस्त्रं सत्सङ्गरज्वा व्यसनकुलगृहं रागयागाग्र्ययज्ञा,
हारिष्टं शिष्टतायाः करणवशगता तद्दमेऽतो यतध्वम् ॥ २२ ॥

प्रेङ्खद्वज्राग्रभिन्नोत्कटकरटिघटाकुम्भकीलालकुल्या,
वेगव्यस्तक्रकुद्युद्भटभटपटलीलूनचक्राम्बुजानि ।
क्रुद्धोद्धावत्कबन्धव्यतिकरविफलायस्तशस्त्राण्यभीक्ष्णं,
भूयांसः प्रापुरत्र क्षयमिति करणैः कार्यमाणा रणानि ॥ २३ ॥

मानः सन्मानविघ्नः स्फुटमविनयकृत्-क्रोधयोधः प्रबोध-
ध्वंसी वैरानुबन्धी प्रणयविमथनी सव्यपाया च माया ।

लोभः सङ्क्षोभहेतु-र्व्यसनशतमहा-धामकामोऽपि वामो,
व्यामोहायेति जित्वा-ऽन्तरमरिविसरं स्वस्य शान्तिं कुरुध्वम्॥ २४ ॥

कान्ता कान्ताऽपि तापं विरहदहनजं हन्त ! ! चित्ते विधत्ते,
क्रीडा व्रीडा मुनीनां मनसि मनसिजो-द्दामलीलाऽपि हीला ।
गात्रं पात्रं विचित्र-प्रकृतिकृतसमा-योगरोगव्रजानां,
सोऽहं मोहं निहन्तुं तदपि कथमपि प्रेमरक्तो न शक्तः ॥ २५ ॥

अर्थे निःसीम्नि पाथःप्लवजवजयिनि प्रेम्णि कान्ताकटाक्ष-
प्रक्षेपस्थेम्नि धाम्नि क्षयपवनचले स्थाम्नि विद्युद्विलोले ।
जीवातौ वातवेगा-हतकमलदल-प्रान्तलग्नोदबिन्दु-
व्यालोले देहभाजा-मिह भवविपिने सौख्यवाञ्छा वृथैव ॥ २६ ॥

उद्धावत्क्रोधगृध्रे-ऽधिकपरुषरवो-त्तालतृष्णाशृगाली-
शालिन्युद्यन्मनोभू-ललितकिलकिला-रावरागोग्रभूते ।
ईर्ष्याऽमर्षादिदंष्ट्रो-त्कटकलहमुख-द्वेषवेतालरौद्रे,
हा ! ! संसारश्मशाने भृशभयजनने न्यूषुषां क्वास्तु भद्रम् ?॥ २७ ॥

चक्षुर्दिक्षु क्षिपन्ती क्षपयति झगिति प्रेक्षकाक्षीणि साक्षा-
ल्लीलालोलालसाङ्गी जगति वितनुते-ऽनङ्गसङ्गाङ्गभङ्गान् ।
खेदस्वेदप्रभेदान् प्रथयति दवथु-स्तम्भसंरम्भगर्भान्,
बाला व्यालावलीव भ्रमयति भुवनं चेतसा चिन्तिताऽपि ॥ २८ ॥

नाभीतोऽपि च नीचता कुचतटात् काठिन्यमन्वर्थतो, ।
वामानां बत तुच्छता परिचयाल्लग्नावलग्ना ध्रुवम् ॥ २९ ॥

रागद्वेषप्रमोदा-रतिरतिभयशुग्-जन्मचिन्ताजुगुप्सा-
मिथ्यात्वाज्ञानहास्या-विरति मद[न]नि-द्राविषादान्तरायाः ।
संसारावर्त्तगर्त्त-व्यतिकरजनका देहिनां यस्य नैते,
दोषा अष्टादशाऽऽप्तः स इह तदुदिते क्वास्तु शङ्काऽवकाशः ?॥ ३० ॥

विद्वत्प्रेयसि सद्गरीयसि परा-नन्दाश्रयस्थेयसि,
स्फीतश्रेयसि नाशितैनसि सदा सम्यग्गुणज्यायसि ।
सज्ज्ञानौकसि धर्मवेधसि हुता-विद्याविता नैधसि,
कोऽनन्तौजसि तारतेजसि जिने सन्देग्धि वृन्दीयसि ॥ ३१ ॥

उद्यद्दारिद्र्य[रुद्वर्ग]रुंद्व(?)मसितपरशुर्दुर्गदुर्गत्युदार-
द्वारस्फारापिधानं विषयविषधरग्रासगृध्य[:खगेन्द्रः]श्वगेन्द्रः ।
क्रुद्ध्यद्दुर्बोधयोधप्रतिभटपटलीमोहरोहत्प्ररोह-
प्रेङ्खत्तीक्ष्णक्षुरप्रप्रमदमदकरिक्रूरकुप्यन्मृगारिः ॥ ३२ ॥

सर्पत्कन्दर्पपांशुप्रकरखरमरुत्त्वङ्गदुत्तुङ्गदंश-
क्ष्माभृद्दम्भोलिऋद्धिरनुपशमदवोद्दाहवर्षाम्बुवाहः ।
मिथ्यात्वापथ्यतथ्यस्फुरदमृतरसः प्रोल्लसल्लोभवल्लि-
च्छेदच्छेकासिपत्रं श्रुतमिह तदिति ज्ञाप्यमध्याप्यमाप्य ॥ ३३ ॥

तेने तेन सुधांशुधामधवलं विश्वक् स्वकीयं यशो,
दौर्भाग्यद्रुरभाजि तेन ममृदे दारिद्र्यमुद्रा द्रुतम् ।
चक्रे केशवशक्ति[चक्रि]कमला तूर्णं स्वहस्तोदरे,
पात्रत्राकृतमत्र येन विधिना स्वं स्वं नयोपार्जितम् ॥ ३४ ॥

प्रोल्लासे गुणवल्लिभिः प्रन (?)[प्रस]सृते कीर्त्या त्रिलोकाङ्गणे,
सौख्यैरुच्चकृषे श्रिया प्रववृधे बुद्ध्या जजृम्भे भृशम् ।
स्वर्लक्ष्म्या ददृशे सतर्षमभितो वीक्षाम्बभूवे शिव-
प्रेयस्या विधिदानदातुरसकृत् कैर्वा न लिल्ये ? शुभैः ॥ ३५ ॥

प्राहुर्दाहकमेव पावकमिव प्रायोऽविनीतं जनं,
प्राप्नोत्येष कदाचनापि न खलु स्वेष्टार्थसिद्धिं क्वचित् ।
तस्मादीहितदानकल्पविटपि-न्युल्लासिनिःश्रेयस-
श्रीसम्बन्धविधानधाम्नि विनये यत्नं विदध्याद् बुधः ॥ ३६ ॥

मूलं धर्मद्रुमस्य द्युपतिनरपति-श्रीलताकल्पकन्दः,
सौदर्याह्वानविद्या निखिलसुखनिधि-र्वश्यतायोगचूर्णः ।
सिद्धाज्ञामन्त्रयन्त्रा-धिगममणिमहा-रोहणाद्रिःसमस्तं,
[सा]र्थं प्रत्यर्थितन्त्रं त्रिजगति विनयः किं न किं साधु धत्ते ?॥ ३७॥

संसारार्णवनौर्विपद्वनदवः कोपाग्निपाथोनिधि-
र्मिथ्यावासविसारिवारिदमरुन्मोहान्धकारांशुमान् ।
तीव्रव्याधिलताशितासिरखिलान्तस्तापसर्पत्सुधा-
सारः पुस्तकलेखनं भुवि नृणां सज्ज्ञानदानप्रपा ॥ ३८ ॥

मिथ्यात्वोदन्वदौर्वे व्यसनशतमहा-श्वापदे शोकशङ्का-
ऽऽतङ्काद्या एव ग[व]र्त्ते मृतिजननजरा-ऽपारविस्तारिवारि ।
आधिव्याधिप्रबन्धोद्धुरतिमिमकरे घोरसंसारसिन्धौ,
पुंसां पोतायमानं ददति कृतधियः पुस्तकज्ञानदानम् ॥ ३९ ॥

शिक्षा भव्यनृणां गणाय मयका-ऽनर्थप्रदैनस्तरुं,
दग्धुं वह्निरभाणि येयमनया वर्त्तेत योऽमत्सरः ।
नम्यं चक्रभृतां जिनत्वमपि स-ल्लब्धार्थपादःपरं,
रन्ताऽसौ शिवसुन्दरीस्तनतटे रुन्द्रे नरः सादरम् ॥ ४० ॥

पू.श्री ज्योतिर्विजयकृतम्

# ॥ तत्त्वामृतम् ॥

देवदेवं जिनं नत्वा भवोद्भवविनाशकम् ।
वक्ष्येऽहं देशनां काञ्चिद् मतिहीनोऽपि भक्तितः ॥ १ ॥

संसारे पर्यटन् जन्तुर्बहुयोनिसमाकुले ।
शारीरं मानसं दुःखं प्राप्नोति बत दारुणम् ॥ २ ॥

आर्तध्यानरतो मूढो न करोत्यात्मनो हितम् ।
तेनाऽसौ सुमहाक्लेशं परत्रेह च गच्छति ॥ ३ ॥

ज्ञानभावनया जीवो लभते हितमात्मनः ।
विनयाचारसम्पन्नो विषयेषु पराङ्मुखः ॥ ४ ॥

आत्मानं भावयेन्नित्यं ज्ञानेन विनयेन च ।
मा पुनर्म्रियमाणस्य पश्चात्तापो भविष्यति ॥ ५ ॥

तथा हि सत्तपः कार्यं ज्ञानसद्भावभावितैः ।
यथा विमलतां याति चेतोरत्नं सुदुर्लभम् ॥ ६ ॥

नृजन्मनः फलं सारं यदेतज्ज्ञानसेवनम् ।
अनिगूहितवीर्यस्य संयमस्य च धारणम् ॥ ७ ॥

ज्ञान-ध्यानो-पवासैश्च परीषहजयैस्तथा ।
शील-संयमयोगैश्च स्वात्मानं भावयेत् सदा ॥ ८ ॥

ज्ञानाभ्यासः सदा कार्यो ध्यानेना-ऽध्ययनेन च ।
तपसो रक्षणं चैव यदीच्छेद्धितमात्मनः ॥ ९ ॥

ज्ञानादिर्यस्य सूर्यः स्याद् नित्यमुद्द्योतकारकः ।
तस्य निर्मलतां याति पञ्चेन्द्रियदिगाननम् ॥ १० ॥

एतद्ध्यानफलं नाम यच्चारित्रोद्यमः सदा ।
क्रियते पापनिर्मुक्तैः साधुसेवापरायणैः ॥ ११ ॥

सर्वं द्वन्द्वं परित्यज्य निभृतेनान्तरात्मना ।
ज्ञानामृतं सदा पेयं चित्ताह्लादनमुत्तमम् ॥ १२ ॥

ज्ञानं नाम महारत्नं यन्न प्राप्तं कदाचन ।
संसारे भ्रमता भीमे नानादुःखविधायिनि ॥ १३ ॥

अधुना तत् त्वया प्राप्तं सम्यग्दर्शनसंयुतम् ।
प्रमादं मा पुनः कार्षीर्विषयास्वादलालसः ॥ १४ ॥

आत्मानं सततं रक्षेद् ज्ञान-ध्यान-तपोबलैः ।
प्रमादिनोऽस्य जीवस्य शीलरत्नं विलुप्यते ॥ १५ ॥

शीलरत्नं हृतं यस्य मोहध्वान्तमुपेयुषः ।
नानादुःखशताकीर्णे नरके पतनं ध्रुवम् ॥ १६ ॥

यावत्स्वास्थ्यं शरीरस्य यावच्चेन्द्रियसम्पंदः ।
तावद् युक्तं तपः कर्तुं वार्धक्ये केवलं श्रमः ॥ १७ ॥

शुद्धे तपसि सद्वीर्ये ज्ञाने कर्मपरिक्षये ।
उपयोगं धनं पात्रे यस्य याति स पण्डितः ॥ १८ ॥

गुरुशुश्रूषया जन्म चित्तं सद्ध्यानचिन्तया ।
श्रुतं यम-शमे याति विनियोगं स पुण्यभाक् ॥ १९ ॥

छित्त्वा स्नेहमयान् पाशान् भित्त्वा मोहमहार्गलम् ।
सच्चारित्रसमायुक्ताः शूरा मोक्षपथे स्थिताः ॥ २० ॥

कर्मणा मोहनीयेन मोहितं सकलं जगत् ।
धन्या मोहं समुत्सार्य तपस्यन्ति महाधियः ॥ २१ ॥

अहो ! मोहस्य माहात्म्यं विद्वांसो येऽपि मानवाः ।
मुह्यन्ति तेऽपि संसारे कामा-ऽर्थरतितत्पराः ॥ २२ ॥

कामः क्रोधस्तथा लोभो रागो द्वेषश्च मत्सरः ।
मदो माया तथा मोहः कन्दर्पो दर्प एव च ॥ २३ ॥

एते हि रिपवो घोरा धर्मसर्वस्वहारिणः ।
एतैर्बम्भ्रम्यते जीवः संसारे बहुदुःखदे ॥ २४ ॥

राग-द्वेषमयो जीवः काम-क्रोधवशं गतः ।
लोभ-मोह-मदाविष्टः संसारे संसरत्यसौ ॥ २५ ॥

सम्यक्त्वज्ञानसंपन्नो जैनभक्तो जितेन्द्रियः ।
लोभ-मोह-मदैस्त्यक्तो मोक्षभागी न संशयः ॥ २६ ॥

कामः क्रोधस्तथा मोहस्त्रयोऽप्येते महाद्विषः ।
एते न निर्जिता यावत्तावत्सौख्यं कुतो नृणाम् ? ॥ २७ ॥

नास्ति कामसमो व्याधिर्नास्ति मोहसमो रिपुः ।
नास्ति क्रोधसमो वह्निर्नास्ति ज्ञानसमं सुखम् ॥ २८ ॥

कषायविषयार्तानां देहिनां नास्ति निर्वृतिः ।
तेषां च विरमे सौख्यं जायते परमाद्भुतम् ॥ २९ ॥

कषाय-विषयै रोगैरात्मानं पीडितं सदा ।
चिकित्सतां प्रयत्नेन जिनवाक्सारभेषजैः ॥ ३० ॥

विषयोरगदष्टस्य कषायविषमोहिनः ।
संयमो हि महामन्त्रस्त्राता सर्वत्र देहिनः ॥ ३१ ॥

कषायकलुषो जीवो रागरञ्जितमानसः ।
चतुर्गतिभवाम्भोधौ भिन्ननौरिव सीदति ॥ ३२ ॥

कषायवशगो जीवः कर्म बध्नाति दारुणम् ।
तेनासौ क्लेशमाप्नोति भवकोटिषु दुस्तरम् ॥ ३३ ॥

कषाय-विषयैश्चित्तं मिथ्यात्वेन च संयुतम् ।
संसारबीजतां याति न याति मोक्षबीजताम् ॥ ३४ ॥

कषायविजये सौख्यमिन्द्रियाणां च निग्रहे ।
जायते परमोत्कृष्टमात्मनो भवभेदि यत् ॥ ३५ ॥

कषायान् शत्रुवत् पश्येद् विषयान् विषवत्तथा ।
मोहं च परमं व्याधिमेवमूचुर्विचक्षणाः ॥ ३६ ॥

कषाय-विषयैश्चौरैर्धर्मरत्नं विलुप्यते ।
वैराग्यखड्गधाराभिः शूराः कुर्वन्ति रक्षणम् ॥ ३७ ॥

कषायकर्षणं कृत्वा विषयाणामसेवनम् ।
एतद्धि मानवाः ! पथ्यं सम्यग्दर्शनमुत्तमम् ॥ ३८ ॥

कषायातपतप्तानां विषयामयमोहिनाम् ।
संयोगाऽयोगखिन्नानां सम्यक्त्वं परमं हितम् ॥ ३९ ॥

वरं नरकवासोऽपि सम्यक्त्वेन समायुतः ।
न तु सम्यक्त्वहीनस्य निवासो दिवि राजते ॥ ४० ॥

सम्यक्त्वेन हि युक्तस्य ध्रुवं निर्वाणसङ्गमः ।
मिथ्यादृशोऽस्य जीवस्य संसारे भ्रमणं सदा ॥ ४१ ॥

सम्यक्त्वं परमं रत्नं शङ्कादिमलवर्जितम् ।
संसारदुःखदारिद्र्यं नाशयेत् सुविनिश्चितम् ॥ ४२ ॥

पण्डितोऽसौ विनीतोऽसौ धर्मज्ञः प्रियदर्शनः ।
यः सदाचारसम्पन्नः सम्यक्त्वदृढमानसः ॥ ४३ ॥

जरा-मरणरोगाणां सम्यक्त्व-ज्ञानभेषजैः ।
शमनं कुरुते यस्तु स वै वैद्योऽभिधीयते ॥ ४४ ॥

जन्मान्तरार्जितं कर्म सम्यक्त्व-ज्ञान-संयमैः ।
निराकर्तुं सदा युक्तमपूर्वस्य निरोधनम् ॥ ४५ ॥

सम्यक्त्वं भावयेत् क्षिप्रं सज्ज्ञानं चरणं तथा ।
कृच्छ्रात् सुचरितं प्राप्तं नृत्वं याति निरर्थकम् ॥ ४६ ॥

अतीतेनापि कालेन यन्न प्राप्तं कदाचन ।
तदिदानीं त्वया प्राप्तं सम्यग्दर्शनमुत्तमम् ॥ ४७ ॥

उत्तमे जन्मनि प्राप्ते चारित्रं कुरु यत्नतः ।
सद्धर्मे च परां भक्तिं शमे च परमां रतिम् ॥ ४८ ॥

अनादिकालं जीवेन प्राप्तं दुःखं पुनः पुनः ।
मिथ्यामोहपरीतेन कषायवशवर्तिना ॥ ४९ ॥

सम्यक्त्वादित्यसंभिन्नं कर्मध्वान्तं विनश्यति ।
आसन्नभव्यसत्त्वानां काललब्ध्यादिसन्निधौ ॥ ५० ॥

सम्यक्त्वभावशुद्धेन विषयासङ्गवर्जिना ।
कषायविरतेनैव भवदुःखं विहन्यते ॥ ५१ ॥

संसारध्वंसनं प्राप्य सम्यक्त्वं नाशयन्ति ये ।
वमन्ति तेऽमृतं पीत्वा सर्वव्याधिहरं पुनः ॥ ५२ ॥

मिथ्यात्वं परमं बीजं संसारस्य दुरात्मनः ।
तस्मात्तदेव मोक्तव्यं मोक्षसौख्यं जिघृक्षुणा ॥ ५३ ॥

आत्मतत्त्वं न जानन्ति मिथ्यामोहेन मोहिताः ।
मनुजा येन मानस्था विप्रलब्धाः कुशासनैः ॥ ५४ ॥

दुःखाच्च भीरवोऽप्येते सुधर्मं नहि कुर्वते ।
कर्मणा मोहनीयेन मोहिता बहवो जनाः ॥ ५५ ॥

कथं न रमते चित्तं धर्मेऽनेकसुखप्रदे ।
जीवानां दुःखभीरूणां प्रायो मिथ्यादृशो यतः ॥ ५६ ॥

दुःखं न शक्यते सोढुं पूर्वकर्मार्जितं नरैः ।
तस्मात् कुरुत सद्धर्मं येन तत्कर्म नश्यति ॥ ५७ ॥

सुकृतं तु भवेद् यस्य तेन यान्ति परिक्षयम् ।
दुःखोत्पादनभूतानि दुष्कर्माणि समन्ततः ॥ ५८ ॥

धर्म एव सदा कार्यो मुक्त्वा व्यापारमन्यतः ।
यः करोति परं सौख्यं यावन्निर्वाणसङ्गमम् ॥ ५९ ॥

क्षणे हि समतिक्रान्ते सद्धर्मपरिवर्जिते ।
आत्मानं मुषितं मन्ये कषायेन्द्रियतस्करैः ॥ ६० ॥

धर्मकार्ये मतिस्तावद् यावदायुर्दृढं तव ।
आयुःकर्मणि संक्षीणे पश्चात्त्वं किं करिष्यसि ? ॥ ६१ ॥

धर्ममाचर यत्नेन मा भव त्वं मृतोपमः ।
सद्धर्मचेतसां पुंसां जीवितं सफलं भवेत् ॥ ६२ ॥

मृता नैव मृतास्तेऽत्र ये नरा धर्मकारिणः ।
जीवन्तोऽपि मृतास्ते वै ये नराः पापकारिणः ॥ ६३ ॥

धर्मामृतं सदा पेयं दुःखातङ्कविनाशनम् ।
यस्मिन् पीते परं सौख्यं जीवानां जायते सदा ॥ ६४ ॥

स धर्मो यो दयायुक्तः सर्वप्राणिहितप्रदः ।
स एवोत्तारणे शक्तो भवाम्भोधेः सुदुस्तरात् ॥ ६५ ॥

यदा कण्ठगतप्राणो जीवोऽसौ परिवर्तते ।
नाऽन्यः कश्चित्तदा त्राता मुक्त्वा धर्मं जिनोदितम् ॥ ६६ ॥

अल्पायुषा नरेणेह धर्मकर्माऽविजानता ।
न ज्ञायते कदा मृत्युर्भविष्यति न संशयः ॥ ६७ ॥

आयुर्यस्यापि दैवज्ञैः परिज्ञाते हि जातके ।
तस्यापि क्षीयते सद्यो निमित्तान्तरसङ्गतः ॥ ६८ ॥

जिनैर्निगदितं धर्मं सर्वसौख्यमहानिधिम् ।
ये न तत्प्रतिपद्यन्ते तेषां जन्म निरर्थकम् ॥ ६९ ॥

हितं कर्म परित्यज्य पापकर्मसु रज्यते ।
तेन वै दह्यते चेतः शोचनीयो भविष्यति ॥ ७० ॥

यदि नामाऽप्रियं दुःखं सुखं च यदि वा प्रियम् ।
ततः कुरुत सद्धर्मं जिनानां जितजन्मनाम् ॥ ७१ ॥

विशुद्धादेव सङ्कल्पाद् धर्मः सद्भिरुपार्ज्यते ।
स्वल्पेनैव प्रयासेन चित्रमेतदहो ! परम् ॥ ७२ ॥

धर्म एव सदा त्राता जीवानां दुःखसङ्कटात् ।
तस्मात् कुरुत भो यत्नं तत्राऽनन्तसुखप्रदे ॥ ७३ ॥

यत्त्वया न कृतो धर्मः सदा मोक्षसुखावहः ।
प्रसन्नमनसा येन तेन दुःखी भवानिह ॥ ७४ ॥

यत्त्वया क्रियते कर्म विषयान्धेन दारुणम् ।
उदये तस्य संप्राप्ते कस्ते त्राता भविष्यति ? ॥ ७५ ॥

भुक्त्वाऽप्यनन्तशो भोगान् देवलोके यथेप्सितान् ।
यो हि तृप्तिं न संप्राप्तः स किं प्राप्स्यति साम्प्रतम् ॥ ७६ ॥

वरं हालाहलं भुक्तं विषं तद्भवनाशनम् ।
न तु भोगविषं भुक्तमनन्तभवदुःखदम् ॥ ७७ ॥

इन्द्रियप्रभवं सौख्यं सुखाभासं न तत्सुखम् ।
तच्च कर्मविबन्धाय दुःखदानैकपण्डितम् ॥ ७८ ॥

अक्षाश्वान् निश्चलान् धत्स्व विषयोत्पथगामिनः ।
वैराग्यप्रग्रहाकृष्टान् सन्मार्गे विनियोजय ॥ ७९ ॥

अक्षाण्येव स्वकीयानि शत्रवो दुःखहेतवः ।
विषयेषु प्रवृत्तानि कषायवशवर्तिनः ॥ ८० ॥

इन्द्रियाणां यदा छन्दे वर्तते मोहसङ्गतः ।
तदात्मैव भवेच्छत्रुरात्मनो दुःखबन्धकः ॥ ८१ ॥

इन्द्रियाणि प्रवर्तन्ते विषयेषु निरन्तरम् ।
सज्ज्ञानभावनासक्ता वारयन्ति हि ते रताः ॥ ८२ ॥

इन्द्रियेच्छारुजामज्ञः कुरुते यो ह्यपक्रमम् ।
तमेव मन्यते सौख्यं किं नु कष्टमतः परम् ॥ ८३ ॥

आत्माभिलाषरागाणां यः श्रमः क्रियते बुधैः ।
तदेव परमं तत्त्वमित्यूचुर्ब्रह्मवेदिनः ॥ ८४ ॥

इन्द्रियाणां शमेनाऽलं राग-द्वेषजयेन च ।
आत्मानं योजयेत् सम्यक् संसृतिच्छेदकारणम् ॥ ८५ ॥

इन्द्रियाणि वशे यस्य यस्य दुष्टं न मानसम् ।
आत्मा धर्मरतो यस्य सफलं तस्य जीवितम् ॥ ८६ ॥

परनिन्दासु ये मूका निजश्लाघापराङ्मुखाः ।
ईदृशैर्ये गुणैर्युक्ताः पूज्याः सर्वत्र विष्टपे ॥ ८७ ॥

प्राणनाशेऽपि संप्राप्ते वर्जनीयानि साधुना ।
परलोकविरुद्धानि येनात्मा सुखमश्नुते ॥ ८८ ॥

संमानयति भूतानि यः सदा विनयान्वितः ।
स प्रियः सर्वलोकेऽस्मिन् नापमानं समश्नुते ॥ ८९ ॥

किम्पाकस्य फलं भक्ष्यं कदाचिदपि धीमता ।
विषयास्तु न भोक्तव्या यद्यपि स्युः सुपेशलाः ॥ ९० ॥

स्त्रीणां सम्पर्कजं सौख्यं वर्णयन्त्यबुधा जनाः ।
विचार्यमाणमेतद्धि दुःखानां बीजमुत्तमम् ॥ ९१ ॥

स्मराग्निना प्रदग्धानि शरीराणि शरीरिभिः ।
शमाम्भसा ह्यसिक्तानि निर्वृत्तिं नैव भेजिरे ॥ ९२ ॥

अग्निना तु प्रदग्धानां शमोऽस्तीति यतोऽत्र वै ।
स्मरवह्निप्रदग्धानां शमो नास्ति भवेष्वपि ॥ ९३ ॥

मदनोऽस्ति महाव्याधिर्दुश्चिकित्स्यः सदा बुधैः ।
संसारवर्धनोऽत्यर्थं दुःखोत्पादनतत्परः ॥ ९४ ॥

यावद्यस्य हि कामाग्निर्हृदये प्रज्वलत्यलम् ।
आश्रयन्ति हि कर्माणि तावत्तस्य निरन्तरम् ॥ ९५ ॥

कामाऽहिदृढदष्टस्य तीव्रा भवति वेदना ।
यया सुमोहितो जन्तुः संसारे परिवर्तते ॥ ९६ ॥

दुःखानामाकरो यस्तु संसारस्य च वर्धनः ।
स एष मदनो नाम नराणां स्मृतिसूदनः ॥ ९७ ॥

संकल्पाण्डात् समुद्भूतः कामसर्पोऽतिदारुणः ।
राग-द्वेषद्विजिह्वोऽसौ वशीकर्तुं न शक्यते ॥ ९८ ॥

दुष्टा चेयमनङ्गेच्छा सेयं संसारवर्द्धनी ।
दुःखस्योत्पादने शक्ता शक्ता वित्तस्य नाशने ॥ ९९ ॥

अहो ! ते धिषणाहीना ये स्मरस्य वशं गताः ।
कृत्वा कल्मषमात्मानं पातयन्ति भवार्णवे ॥ १०० ॥

स्मरेणाऽतीवरौद्रेण नरकावर्तपातिना ।
अहो ! खलीकृतो लोको धर्मामृतपराङ्मुखः ॥ १०१ ॥

स्मरेण स्मरणादेव वैरं दैवनियोगतः ।
हृदये निहितं शल्यं प्राणिनां तापकारकम् ॥ १०२ ॥

तस्मात् कुरुत सद्वृत्तं जिनमार्गरताः सदा ।
येन शतखण्डशो याति स्मरशल्यं सुदुर्धरम् ॥ १०३ ॥

चित्तसंदूषणः कामस्तथा सद्गतिनाशनः ।
सद्वृत्तध्वंसनश्चासौ कामोऽनर्थपरम्परा ॥ १०४ ॥

दोषाणामाकरः कामो गुणानां च विनाशकृत् ।
पापस्य च निजो बन्धुरापदां चैव संङ्गमः ॥ १०५ ॥

पिशाचेनेव कामेन च्छलितं सकलं जगत् ।
बम्भ्रमीति परायत्तं भवाब्धौ तन्निरन्तरम् ॥ १०६ ॥

वैराग्यभावनामन्त्रैस्तं निवार्य महाबलम् ।
स्वच्छन्दवृत्तयो धीराः सिद्धिसौख्यं प्रपेदिरे ॥ १०७ ॥

कामी त्यजति सद्वृत्तं गुरोर्वाणीं ह्रियं तथा ।
गुणानां समुदायं च चेतःस्वास्थ्यं तथैव च ॥ १०८ ॥

तस्मात् कामः सदा हेयो मोक्षसौख्यं जिघृक्षुभिः ।
संसारं च परित्यक्तुं वाञ्छद्भिर्यतिसत्तमैः ॥ १०९ ॥

कामार्थौ वैरिणौ नित्यं विशुद्धध्यानरोधिनौ ।
संत्यजतां महाक्रूरौ सुखं संजायते नृणाम् ॥ ११० ॥

कामदाहो वरं सोढुं न तु शीलस्य खण्डनम् ।
शीलखण्डनशीलानां नरके पतनं ध्रुवम् ॥ १११ ॥

कामभोगः सदा नैव स्वल्पकामेन शाम्यति ।
सेवनाच्च महत्पापं नरकावर्तपातनम् ॥ ११२ ॥

सुतीव्रेणापि कामेन स्वल्पकालं तु वेदनाः ।
खण्डनेन तु शीलस्य भवकोटिषु वेदनाः ॥ ११३ ॥

नियतं प्रशमं याति कामदाहः सुदारुणः ।
ज्ञानोपयोगसामर्थ्याद् विषं मन्त्रपदैर्यथा ॥ ११४ ॥

असेवनमनङ्गस्य शमाय परमं स्मृतम् ।
सेवनाच्च परा वृद्धिः शमस्तु न कदाचन ॥ ११५ ॥

उपवासोऽवमौदर्यं रसानां त्यजनं तथा ।
स्नानस्याऽसेवनं चैव ताम्बूलस्य च वर्जनम् ॥ ११६ ॥

असेवेच्छानिरोधस्तु ज्ञानस्य स्मरणं तथा ।
एते हि निर्जयोपाया मदनस्य महारिपोः ॥ ११७ ॥

काममिच्छानिरोधेन क्रोधं च क्षमया भृशम् ।
जयेन्मानं मृदुत्वेन मोहं सज्ज्ञानसेवया ॥ ११८ ॥

तस्मिन्नुपशमं प्राप्ते युक्तं सद्वृत्तधारणम् ।
तृष्णां सुदूरतस्त्यक्त्वा विषाक्तमिव भोजनम् ॥ ११९ ॥

कर्मणां शोधनं श्रेष्ठं ब्रह्मचर्यं सुरक्षितम् ।
सारभूतं चरित्रस्य देवैरपि सुपूजितम् ॥ १२० ॥

या चैषा प्रमदा भाति लावण्यजलवाहिनी ।
सैषा वैतरणी घोरा दुःखोर्मिशतसङ्कुला ॥ १२१ ॥

संसारस्य च बीजानि दुःखानां राशयः पराः ।
पापस्य च निधानानि निर्मिताः केन योषितः ? ॥ १२२ ॥

इयं सा मदनज्वाला वह्नेरेव समुद्भवा ।
नराणां यत्र हूयन्ते यौवनानि धनानि च ॥ १२३ ॥

नरकावर्तपातिन्यः स्वर्गमार्गदृढाऽर्गलाः ।
अनर्थानां विधायिन्यो योषितः केन निर्मिताः ? ॥ १२४ ॥

कृमिजालशताकीर्णे दुर्गन्धमलपूरिते ।
त्वङ्मात्रसंवृते स्त्रीणां काये का रमणीयता ? ॥ १२५ ॥

अहो ! ते सुखितां प्राप्ता ये कामलववर्जिताः ।
सद्वृत्तं विधिनाऽऽपाल्य यास्यन्ति पदमुत्तमम् ॥ १२६ ॥

भोगार्थी यः करोत्यज्ञो निदानं मोहसङ्गतः ।
चूर्णीकरोत्यसौ रत्नमनर्घ्यं सूत्रहेतुना ॥ १२७ ॥

भवभोगशरीरेषु भावनीयः सदा बुधैः ।
निर्वेदः परया बुद्ध्या कर्मारातिजिगीषुभिः ॥ १२८ ॥

यावन्न मृत्युवज्रेण देहशैलो निपात्यते ।
नियुज्यतां मनस्तावत् कर्मारातिपरिक्षये ॥ १२९ ॥

त्यज कामार्थयोः सङ्गं धर्मध्यानं सदा भज ।
छिन्धि स्नेहमयान् पाशान् मानुष्यं प्राप्य दुर्लभम् ॥ १३० ॥

कथं ते भ्रष्टसद्वृत्ता विषयानुपसेवते (न्ते) ।
पञ्चतान्तरिता येषां नरके तीव्रवेदना ॥ १३१ ॥

सद्वृत्ताद् भ्रष्टचित्तानां विषयासङ्गसङ्गिनाम् ।
तेषामिहैव दुःखानि भवन्ति नरकेषु च ॥ १३२ ॥

विषयास्वादलुब्धेन रागद्वेषवशात्मना ।
आत्मा सुवञ्चितस्तेन यः शमं नापि सेवते ॥ १३३ ॥

आत्मना यत्कृतं कर्म भोक्तव्यं तदनेकधा ।
तस्मात् कर्माश्रवं रुद्ध्वा स्वेन्द्रियाणि वशं नय ॥ १३४ ॥

इन्द्रियप्रसरं रुद्ध्वा स्वात्मानं वशमानय ।
येन निर्वाणसौख्यस्य भाजनत्वं प्रपत्स्यसे ॥ १३५ ॥

सम्पन्नेष्वपि भोगेषु महतां नास्ति गृध्नुता ।
अन्येषां गृद्धिरेवाऽस्ति शमस्तु न कदाचन ॥ १३६ ॥

षट्खण्डाधिपतिश्चक्री परित्यज्य वसुन्धराम् ।
तृणवत् सर्वभोगांश्च दीक्षां भागवतीं श्रितः ॥ १३७ ॥

कृमितुल्यैः किमस्माभिर्भोक्तव्यं वस्तु सुन्दरम् ।
येनात्र गृहपङ्केषु सीदामः किमनर्थकम् ? ॥ १३८ ॥

येन ते जनितं दुःखं भवाम्भोधौ सुदुस्तरम् ।
तं कर्मारातिमत्युग्रं विजेतुं किं न वाञ्छसि ? ॥ १३९ ॥

अब्रह्मचारिणो नित्यं मांसभक्षणतत्पराः ।
शुचित्वं तेऽपि मन्यन्ते किं नु चित्रमतः परम् ? ॥ १४० ॥

येन संक्षीयते कर्म संचयश्च न जायते ।
तदेवात्मविदा कार्यं मोक्षसौख्याभिलाषिणा ॥ १४१ ॥

अनेकशस्त्वया प्राप्ता विविधा भोगसम्पदः ।
अप्सरोगणसङ्कीर्णे दिवि देवविराजिते ॥ १४२ ॥

पुनश्च नरके रौद्रे रौरवेऽत्यन्तभीतिदे ।
नानाप्रकारदुःखौघे संस्थितोऽसि विधेर्वशात् ॥ १४३ ॥

तप्ततैलकभल्लीषु पच्यमानेन यत्त्वया ।
संप्राप्तं परमं दुःखं तद्वक्तुं नैव पार्यते ॥ १४४ ॥

नानायन्त्रेषु रौद्रेषु पीड्यमानेन वह्निना ।
दुःसहा वेदना प्राप्ता पूर्वकर्मनियोगतः ॥ १४५ ॥

विण्मूत्रपूरिते भीमे पूति-श्लेष्म-वसाकुले ।
भूयो गर्भगृहे मातुर्दैवाद्यातोऽसि संस्थितिम् ॥ १४६ ॥

तिर्यग्गतौ च यद्दुखं प्राप्तं छेदन-भेदनैः ।
न शक्तस्तत्पुमान् वक्तुं जिह्वाकोटिशतैरपि ॥ १४७ ॥

संसृतौ नास्ति तत्सौख्यं यन्न प्राप्तमनेकधा ।
देव-मानव-तिर्यक्षु भ्रमता जन्तुनाऽनिशम् ॥ १४८ ॥

चतुर्गतिनिबन्धेऽस्मिन् संसारेऽत्यन्तभीतिदे ।
सुख-दुःखान्यवाप्तानि भ्रमता विधियोगतः ॥ १४९ ॥

एवं चिरमिदं कष्टं ज्ञात्वाऽत्यन्तविनश्वरम् ।
कथं न यासि वैराग्यं ? धिगस्तु तव जीवितम् ॥ १५० ॥

जीवितं विद्युता तुल्यं संयोगाः स्वप्नसन्निभाः ।
सन्ध्यारागसमः स्नेहः शरीरं तृणबिन्दुवत् ॥ १५१ ॥

इन्द्रचापसमा भोगाः सम्पदो जलदोपमाः ।
यौवनं जलरेखेव सर्वमेतदशाश्वतम् ॥ १५२ ॥

समानवयसो दृष्ट्वा मृत्युना स्ववशीकृतान् ।
कथं चैतत्समो नास्ति मनागपि हितात्मनः ॥ १५३ ॥

सर्वाऽशुचिमये काये नश्वरे व्याधिपीडिते ।
को हि विद्वान् रतिं गच्छेद् यस्याऽस्ति श्रुतसङ्गमः ॥ १५४ ॥

चिरं सुपोषितः कायो भोजनाच्छादनादिभिः ।
विकृतिं याति सोऽप्यन्ते काऽऽस्था बाह्येषु वस्तुषु ? ॥ १५५ ॥

नायातो बन्धुभिः सार्धं न गतो बन्धुभिः समम् ।
वृथैव स्वजनैः स्नेहो जनानां मूढचेतसाम् ॥ १५६ ॥

जातेनाऽवश्यमर्तव्यं प्राणिना प्राणधारिणा ।
अतः कुरुत मा शोकं मृते बन्धुजने बुधाः ! ॥ १५७ ॥

आत्मकार्यं परित्यज्य परकार्येषु यो रतः ।
ममत्वरतचेताः स स्वहिताद् भ्रंशमेष्यति ॥ १५८ ॥

स्वहितं तु भवेज्ज्ञानं चारित्रं दर्शनं तथा ।
तपःसंरक्षणं चैव सर्वविद्भिस्तदुच्यते ॥ १५९ ॥

वियोगान् विविधान् दृष्ट्वा द्रव्याणां च परिक्षयम् ।
तथापि निर्घृणं चेतः सुखास्वादनलम्पटम् ॥ १६० ॥

सुखसंभोगसंमूढा विषयास्वादलम्पटाः ।
स्वहिताद् भ्रंशमागत्य गृहवासं सिषेविरे ॥ १६१ ॥

यथा च जायते सम्यक् चेतःशुद्धिः सुनिर्मला ।
तथा ज्ञानविदा कार्यं प्रयत्नेनापि भूरिणा ॥ १६२ ॥

विशुद्धं मानसं यस्य रागादिमलवर्जितम् ।
संसाराग्र्यं फलं तस्य सकलं समुपस्थितम् ॥ १६३ ॥

संसारध्वंसने हृष्टिं धृतिमिन्द्रियनिग्रहे ।
कषायविजये यत्नं नाऽभव्यो लब्धुमर्हति ॥ १६४ ॥

एतदेव परं ब्रह्म न विदन्तीह मोहिनः ।
यदेतच्चित्तनैर्मल्यं रागद्वेषादिवर्जितम् ॥ १६५ ॥

तथाऽनुष्ठेयमेतद्धि पण्डितेन हितैषिणा ।
यथा न विक्रियां याति मनोऽत्यर्थं विपत्स्वपि ॥ १६६ ॥

धन्यास्ते मानवा लोके ये प्राप्याऽप्यापदान्तरम् ।
विकृतिं नैव गच्छन्ति यतस्ते साधुमानसाः ॥ १६७ ॥

संक्लेशो न हि कर्तव्यः संक्लेशो बन्धकारणम् ।
संक्लेशपरिणामेन जीवो दुःखस्य भाजनम् ॥ १६८ ॥

संक्लेशपरिणामेन जीवः प्राप्नोति भूरिशः ।
सुमहाकर्मसम्बन्धं भवकोटिसुदुःखदम् ॥ १६९ ॥

चित्तरत्नमसंक्लिष्टं महतामुत्तमं धनम् ।
येन संप्राप्यते स्थानं जरा-मरणवर्जितम् ॥ १७० ॥

सम्पत्तौ विस्मिता नैव विपत्तौ नैव दुःखिताः ।
महतां लक्षणं ह्येतद् तनुद्रव्यसमागमात् ॥ १७१ ॥

आपत्सु संपतन्तीषु पूर्वकर्मनियोगतः ।
धैर्यमेव परं त्राणं न युक्तमनुशोचनम् ॥ १७२ ॥

विशुद्धपरिणामेन शान्तिर्भवति सर्वतः ।
संक्लिष्टेन तु चित्तेन नास्ति शान्तिर्भवेष्वपि ॥ १७३ ॥

संक्लिष्टचेतसां पुंसां संसारो याति वृद्धिताम् ।
विशुद्धा चेतसो वृत्तिः सम्पत्ति-वृत्तिदायिनी ॥ १७४ ॥

यदा चित्तविशुद्धिः स्यादापदः सम्पदस्तदा ।
समास्तत्त्वविदां पुंसां सर्वं हि महतां महत् ॥ १७५ ॥

परोऽप्युत्पथमापन्नो निषेद्धुं युक्त एव सः ।
किं पुनः स्वमनोऽत्यर्थं विषयोत्पथयायि यत् ॥ १७६ ॥

अज्ञानाद् यदि वा मोहाद् यत्कृतं कर्म कुत्सितम् ।
व्यावर्तयेन्मनस्तस्मात् पुनस्तन्न समाचरेत् ॥ १७७ ॥

अचिरेणैव कालेन फलं प्राप्स्यसि दुर्मते ! ।
विपाकेऽतीवतिक्तस्य कर्मणो यत्त्वया कृतम् ॥ १७८ ॥

स्वल्पेनैव हि कालेन फलं प्राप्स्यसि यत्कृतम् ।
शशवदात्मकर्णाभ्यां गोपयन् स्वं मनागपि ॥ १७९ ॥

वर्धमानाऽहितं कर्म अज्ञानाद्यो न शोधयेत् ।
प्रभूतदुःखसंग्रस्तः स पश्चात् परितप्यते ॥ १८० ॥

सुखभावकृते मूढाः किं न कुर्वन्ति मानवाः ।
येन संतापमायान्ति जन्मकोटिशतेष्वपि ॥ १८१ ॥

परं च वञ्चयामीति ये हि मायां प्रयुञ्जते ।
इहाऽन्यत्र च लोके वै तैरात्मा वञ्चितः सदा ॥ १८२ ॥

पञ्चताऽऽसन्नतां प्राप्ता न कृतं सुकृतार्जनम् ।
सुमानुष्ये हि संप्राप्ते हा ! गतं जन्म निष्फलम् ॥ १८३ ॥

कर्मपाशविमोक्षाय यत्नो यस्य न देहिनः ।
स संसारमहागुप्तौ बद्धः संतिष्ठते सदा ॥ १८४ ॥

गृहचारकवासेऽस्मिन् विषयामिषलोभिताः ।
सीदन्ति नरशार्दूला बद्धा बान्धवबन्धनैः ॥ १८५ ॥

गर्भवासेऽपि यद्दुःखं प्राप्तमत्रैव जन्मनि ।
अधुना विस्मृतं किं ते येनात्मानं न बुध्यसे ? ॥ १८६ ॥

चतुरशीतिलक्षेषु योनीनां भ्रमता त्वया ।
प्राप्तानि दुःखशल्यानि नानाकाराणि मोहिना ॥ १८७ ॥

कथं नोद्विजसे मूढ ! दुःखात् संसृतिसंभवात् ।
येन त्वं विषयासक्तो लोभेनाऽसि वशीकृतः ॥ १८८ ॥

यत्त्वयोपार्जितं कर्म भवकोटिषु पुष्कलम् ।
तच्छेत्तुं नैव शक्नोषि गतं ते जन्म निष्फलम् ॥ १८९ ॥

अज्ञानी क्षपयेत् कर्म यज्जन्मशतकोटिभिः ।
तज्ज्ञानी तु त्रिगुप्तात्मा निहन्त्यन्तर्मुहूर्तके ॥ १९० ॥

जीवितेनापि किं तेन कृता यत्र न निर्जरा ।
कर्मणां संवरो वाऽपि संसाराऽसारकारिणाम् ॥ १९१ ॥

स जातो येन जातेनाऽपक्वानां पाचनं कृतम् ।
कर्मणां पाकघोराणां विबुधेन महात्मना ॥ १९२ ॥

रोषे रोषं परं कृत्वा माने मानं विधाय च ।
सङ्गे सङ्गं परित्यज्य स्वात्माधीनं सुखं कुरु ॥ १९३ ॥

परिग्रहे महाद्वेषो मुक्तौ च रतिरुत्तमा ।
सद्ध्याने चित्तमेकाग्रं रौद्रार्ते नैव संस्थितम् ॥ १९४ ॥

धर्मस्य संचये यत्नं कर्मणां च परिक्षये ।
साधूनां चेष्टिते चित्तं सर्वदा पापनाशने ॥ १९५ ॥

मानस्तम्भं दृढं भङ्क्त्वा लोभाद्रिं प्रविदार्य च ।
मायावल्लीं समुत्पाट्य क्रोधशत्रुं निहत्य च ॥ १९६ ॥

यथाख्यातं हितं प्राप्य चारित्रं ध्यानतत्पराः ।
कर्मणां प्रक्षयं कृत्वा प्रपन्नाः परमं पदम् ॥ १९७ ॥

सङ्गादिरहिता धीरा रागादिमलवर्जिताः ।
शान्ता दान्तास्तपोभूषा मुक्तिकाङ्क्षणतत्पराः ॥ १९८ ॥

मनोवाक्काययोगेषु प्रणिधानपरायणाः ।
वृत्ताढ्या ज्ञानसम्पन्नास्ते पात्रं करुणापराः ॥ १९९ ॥

धृतिभावनया युक्ताः सत्त्वभावनयाऽन्विताः ।
तत्त्वार्थाहितचेतस्कास्ते पात्रं दातुरुत्तमाः ॥ २०० ॥

धृतिभावनया दुःखं सत्त्वभावनया भवम् ।
ज्ञानभावनया कर्म नाशयन्ति न संशयः ॥ २०१ ॥

आग्रहो हि शमे येषां विग्रहः कर्मशत्रुभिः ।
विषयेषु निराशंसा ते पात्रं यतिसत्तमाः ॥ २०२ ॥

निःसङ्गा अपि वृत्ताढ्या निःस्नेहाः सुश्रुतिप्रियाः ।
अभूषाश्च तपोभूषास्ते पात्रं योगिनः सदा ॥ २०३ ॥

यैर्ममत्वं सदा त्यक्तं स्वकायेऽपि मनीषिभिः ।
ते पात्रं संयतात्मानः सर्वसत्त्वहिते रताः ॥ २०४ ॥

परीषहजये शक्तं शक्तं कर्मपरिक्षये ।
ज्ञान-ध्यान-तपोभूषं शुद्धाचारपरायणम् ॥ २०५ ॥

प्रशान्तमानसं सौम्यं प्रशान्तकरणं शुभम् ।
प्रशान्तारिमहामोहं काम-क्रोधनिषूदनम् ॥ २०६ ॥

निन्दा-स्तुतिसमं धीरं शरीरेऽपि च निःस्पृहम् ।
जितेन्द्रियं जितक्रोधं जितलोभमहाभयम् ॥ २०७ ॥

राग-द्वेषविनिर्मुक्तं सिद्धिसङ्गमनोत्सुकम् ।
ज्ञानाभ्यासरतं नित्यं नित्यं च प्रशमे स्थितम् ॥ २०८ ॥

एवंविधं हि यो दृष्ट्वा स्वगृहाङ्गणमागतम् ।
मात्सर्यं कुरुते मोहात् क्रिया तस्य न विंद्यते ॥ २०९ ॥

मायानिरसनं कृत्वा तृष्णां च परित्यज्य ते ।
राग-द्वेषौ समुत्सार्य प्रयाताः पदमक्षयम् ॥ २१० ॥

धीराणां यतयो धीरा ये निराकुलचेतसः ।
कर्मशत्रुमहासैन्यं निर्जयन्ति तपोबलात् ॥ २११ ॥

परीषहजये शूराः शूराश्चेन्द्रियनिग्रहे ।
कषायविजये शूरास्ते शूरा गदिता बुधैः ॥ २१२ ॥

नादत्तेऽभिनवं कर्म सच्चारित्रनिविष्टधीः ।
पुराणं निर्जयेद् बाढं विशुद्धध्यानसङ्गतः ॥ २१३ ॥

संसारावासनिवृत्ताः शिवसौख्यसमुत्सुकाः ।
सद्भिस्ते गदिताः प्राज्ञाः शेषास्त्वर्थस्य वञ्चकाः ॥ २१४ ॥

समतां सर्वभूतेषु यः करोति सुमानसः ।
ममत्वभावनिर्मुक्तो यात्यसौ पदमव्ययम् ॥ २१५ ॥

इन्द्रियाणां जये शूरः कर्मबन्धे च कातरः ।
सत्वार्थाहितचेतस्कः स्वशरीरेऽपि निःस्पृहः ॥ २१६ ॥

परीषहमहारातिबलनिर्दलनक्षमः ।
कषायविजये शूरः स शूर इति कथ्यते ॥ २१७ ॥

संसारध्वंसिनीं चर्यां ये कुर्वन्ति सदा नराः ।
राग-द्वेषहतिं कृत्वा ते यान्ति परमं पदम् ॥ २१८ ॥

मलैस्तु रहिता धीरा मलदिग्धाङ्गयष्टयः ।
ते ब्रह्मचारिणो नित्यं ज्ञानाभ्यासं सिषेविरे ॥ २१९ ॥

ज्ञानभावनया शक्ता निभृतेनान्तरात्मना ।
अप्रमत्तं गुणं प्राप्य लभन्ते हितमात्मनः ॥ २२० ॥

संसारावासभीरूणां त्यक्तान्तर्बाह्यसङ्गिनाम् ।
विषयेभ्यो निवृत्तानां श्लाघ्यं तेषां हि जीवितम् ॥ २२१ ॥

समं शत्रौ च मित्रे च समं मानापमानयोः ।
लाभालाभे समं नित्यं लोष्ठ-काञ्चनयोस्तथा ॥ २२२ ॥

सम्यक्त्वभावनाशुद्धं ज्ञानसेवापरायणम् ।
चारित्रचरणासक्तमक्षीणसुखकाङ्क्षिणम् ॥ २२३ ॥

ईदृशं श्रमणं दृष्ट्वा यो न मन्येत दुष्टधीः ।
नृजन्मनः फलं सारं स हारयति सर्वथा ॥ २२४ ॥

रागादिवर्जकाः सङ्गं परित्यज्य दृढव्रताः ।
धीरा निर्मलचेतस्कास्तपस्यन्ति महाधियः ॥ २२५ ॥

संसारोद्विग्नचित्तानां निःश्रेयससुखैषिणाम् ।
सर्वसङ्गनिवृत्तानां धन्यं तेषां हि जीवितम् ॥ २२६ ॥

सप्तभीस्थानमुक्तानां यत्रास्तमितशायिनाम् ।
त्रिकालयोगयुक्तानां जीवितं सफलं भवेत् ॥ २२७ ॥

आर्त-रौद्रपरित्यागाद् धर्म-शुक्लसमाश्रयात् ।
जीवः प्राप्नोति निर्वाणमनन्तसुखमच्युतम् ॥ २२८ ॥

आत्मानं विनियम्याशु विषयेषु पराङ्मुखः ।
साधयेत् स्वहितं प्राज्ञो ज्ञानाभ्यासरतो यतिः ॥ २२९ ॥

यथा सङ्गपरित्यागस्तथा कर्मविमोचनम् ।
यथा च कर्मणां छेदस्तथाऽऽसन्नं परं पदम् ॥ २३० ॥

यत् परित्यज्य गन्तव्यं तत् स्वकीयं कथं भवेत् ? ।
इत्यालोच्य शरीरेऽपि विद्वानाशां परित्यजेत् ॥ २३१ ॥

नूनं नात्मा प्रियस्तेषां ये रताः सङ्गसंग्रहे ।
प्रियश्चेदपकृत्तुच्छं स्वीकर्तुं नैव शक्यते ॥ २३२ ॥

शरीरमात्रसङ्गेन भवेदारम्भवर्तनम् ।
तदशाश्वतमत्राणं तस्मिन् विद्वान् रतिं त्यजेत् ॥ २३३ ॥

सङ्गात् संजायते गृद्धिर्गृद्धो वाञ्छति सञ्चयम् ।
सञ्चयाद् वर्धते लोभो लोभात्संसृतिवर्धनम् ॥ २३४ ॥

ममत्वाज्जायते लोभो लोभाद् रागश्च जायते ।
रागाच्च जायते द्वेषो द्वेषाद्दुःखपरम्परा ॥ २३५ ॥

निर्ममत्वं परं तत्त्वं निर्ममत्वं परं सुखम् ।
निर्ममत्वं परं बीजं मोक्षस्य कथितं बुधैः ॥ २३६ ॥

निर्ममत्वे सदा सौख्यं संसारस्थितिच्छेदनम् ।
जायते परमोत्कृष्टमात्मनि संस्थिते सति ॥ २३७ ॥

अर्थो मूलमनर्थानामर्थो निर्वृतिनाशनः ।
कषायोत्पादकश्चार्थो दुःखानां च विधायकः ॥ २३८ ॥

आप्तोज्झितानि वित्तानि त्वया सर्वाणि संसृतौ ।
पुनस्तेषु रतिः कष्टा भुक्तवान्त इवौदने ॥ २३९ ॥

को वा वित्तं समादाय परलोकं गतः पुमान् ? ।
येन तृष्णाग्निसंतप्तः कर्म बध्नाति दारुणम् ॥ २४० ॥

तृष्णान्धा नैव पश्यन्ति हितं वा यदि वाऽहितम् ।
सन्तोषाञ्जनमासाद्य पश्यन्ति सुधियो जनाः ॥ २४१ ॥

सन्तोषसारसद्रत्नं समादाय विचक्षणाः ।
भवन्ति सुखिनो नित्यं मोक्षसन्मार्गवर्तिनः ॥ २४२ ॥

तृष्णानलप्रदीप्तानां सुसौख्यं नु कुतो नृणाम् ? ।
दुःखमेव सदा तेषां ये रता धनसञ्चये ॥ २४३ ॥

सन्तुष्टाः सुखिनो नित्यमसन्तुष्टाः सुदुःखिताः ।
उभयोरन्तरं ज्ञात्वा सन्तोषे क्रियतां रतिः ॥ २४४ ॥

द्रव्याशां दूरतस्त्यक्त्वा सन्तोषं कुरु सन्मते ! ।
मा पुनर्दीर्घसंसारे पर्यटिष्यसि निश्चितम् ॥ २४५ ॥

ईश्वरो नाम सन्तोषी यो न प्रार्थयतेऽपरम् ।
प्रार्थना महतामत्र परं दारिद्र्यकारणम् ॥ २४६ ॥

हृदयं दह्यतेऽत्यर्थं तृष्णाग्निपरितापितम् ।
न शक्यं शमनं कर्तुं विना सन्तोषवारिणा ॥ २४७ ॥

यैः सन्तोषोदकं पीतं निर्ममत्वेन वासितम् ।
त्यक्तं तैर्मानसं दुःखं दुर्जनेनेव सौहृदम् ॥ २४८ ॥

यैः सन्तोषामृतं पीतं तृष्णातृड्उपनाशनम् ।
तैः सुनिर्वाणसौख्यस्य कारणं समुपार्जितम् ॥ २४९ ॥

सन्तोषं लोभनाशाय धृतिं चाऽसुखशान्तये ।
ज्ञानं च तपसो वृद्ध्यै धारयन्ति मुनीश्वराः ॥ २५० ॥

ज्ञान-दर्शनसम्पन्न आत्मा चैको ध्रुवो मम ।
शेषा भावाश्च मे बाह्याः सर्वे संयोगलक्षणाः ॥ २५१ ॥

संयोगमूला जीवेन प्राप्ता दुःखपरम्परा ।
तस्मात् संयोगसम्बन्धं त्रिविधेन परित्यजेत् ॥ २५२ ॥

ये हि जीवादयो भावाः सर्वज्ञैर्भाषिताः पुरा ।
अन्यथा च क्रिया तेषामिति चिन्ता निरर्थका ॥ २५३ ॥

यथा च कुरुते जन्तुर्ममत्वं विपरीतधीः ।
तथा हि बन्धमायाति तस्य कर्म समन्ततः ॥ २५४ ॥

अज्ञानावृतचित्तानां रागद्वेषवशात्मनाम् ।
आरम्भेषु प्रवृत्तानां हितं तेषां न भीतवत् ॥ २५५ ॥

परिग्रहपरिष्वङ्गाद् रागो द्वेषश्च जायते ।
रागद्वेषौ महाबन्धकारणं बत कर्मणाम् ॥ २५६ ॥

सर्वसङ्गान् पशून् कृत्वा ध्यानाग्नावाहुतिं क्षिपेत् ।
कर्माणि समिधश्चैव यागोऽयं सुमहाफलः ॥ २५७ ॥

राजसूयसहस्राणि अश्वमेधशतानि च ।
अनन्तभागतुल्यानि न स्युस्तस्य कदाचन ॥ २५८ ॥

सा प्रज्ञा या शमे याति विनियोगपरा हिता ।
शेषा हि निर्दया प्रज्ञा कर्मोपार्जनकारिणी ॥ २५९ ॥

प्रज्ञाङ्गना सदा सेव्या पुरुषेण सुखावहा ।
हेयोपादेयतत्त्वज्ञा या रता सर्वकर्मणि ॥ २६० ॥

दयाङ्गना सदा सेव्या सर्वकामफलप्रदा ।
सेविताऽसौ करोत्याशु मानसं करुणामयम् ॥ २६१ ॥

मैत्र्यङ्गना सदोपास्या हृदयानन्दकारिणी ।
या विधत्ते कृतोपास्तिश्चित्तं विद्वेषवर्जितम् ॥ २६२ ॥

सर्वसत्त्वे दयामैत्रीं यः करोति सुमानसः ।
जयत्यसावरीन् सर्वान् बाह्याभ्यन्तरसंस्थितान् ॥ २६३ ॥

शमं नयति भूतानि यः शक्तो देशनाविधौ ।
द्रव्यादिलब्धियुक्तो यः प्रत्यहं तस्य निर्जरा ॥ २६४ ॥

शमो हि न भवेद् येषां ते नराः पशुसन्निभाः ।
समृद्धा अपि सच्छास्त्रे कामार्थरतिसङ्गिनः ॥ २६५ ॥

कर्मणां ध्वंसने चित्तं रागं मोहारिनाशने ।
द्वेषं कषायवर्गे च नाऽयोग्यो लब्धुमर्हति ॥ २६६ ॥

चित्ते नरक-तिर्यक्षु भ्रमतोऽपि निरन्तरम् ।
जन्तो ! ते विद्यते नैव शमो दुरितबन्धनः ॥ २६७ ॥

मनस्याह्लादिनी सेव्या सर्वकालं सुखप्रदा ।
उपनेया त्वया भद्र ! क्षमा नाम कुलाङ्गना ॥ २६८ ॥

क्षमया क्षीयते कर्म दुःखदं पूर्वसञ्चितम् ।
चित्तं च जायते शुद्धं विद्वेष-भयवर्जितम् ॥ २६९ ॥

प्रज्ञा सूया च मैत्री च समता करुणा क्षमा ।
सम्यक्त्वसहिताः सेव्याः सिद्धिसौधसुखप्रदाः ॥ २७० ॥

भयं याहि भवाद् भीमात् प्रीतिं च जिनशासने ।
शोकं पूर्वकृते पापे यदीच्छेर्हितमात्मनः ॥ २७१ ॥

कुसंसर्गः सदा त्याज्यो दोषाणां प्रविधायकः ।
सगुणोऽपि जनस्तेन लघुतां याति तत्क्षणात् ॥ २७२ ॥

सत्संयोगो बुधैः कार्यः सर्वकालसुखप्रदः ।
तेनैव गुरुतां याति गुणहीनोऽपि मानवः ॥ २७३ ॥

साधूनां खलसङ्गेन चेष्टितं मलिनं भवेत् ।
सैंहिकेयसमासक्त्या भास्वद्भानोरपि क्षयः ॥ २७४ ॥

संसर्गो न हि कर्तव्यः कदाचिदसतां सताम् ।
शुण्डिनीहस्तपयसा वारुणी च विधीयते ॥ २७५ ॥

रागादयो महादोषाः खलास्ते गदिता बुधैः ।
तेषां समाश्रयस्त्याज्यस्तत्त्वविद्भिः सदा नरैः ॥ २७६ ॥

गुणाः सुपूजिता लोके गुणाः कल्याणकारकाः ।
गुणहीना हि लोकेऽस्मिन् महान्तोऽपि मलीमसाः ॥ २७७ ॥

सद्गुणैर्गुरुतां याति कुलहीनोऽपि मानवः ।
निर्गुणः सुकुलाढ्योऽपि लघुतां याति तत्क्षणात् ॥ २७८ ॥

सद्वृत्तः पूज्यते देवैराखण्डलपुरस्सरैः ।
असद्वृत्तस्तु लोकेऽस्मिन् निन्द्यतेऽसौ सुतैरपि ॥ २७९ ॥

चारित्रं तु समादाय ये पुनर्भङ्गमागताः ।
ते साम्राज्यं परित्यज्य दास्यभावं प्रपेदिरे ॥ २८० ॥

शीलसंधारिणां पुसां मनुष्येषु सुरेषु च ।
आत्मा गौरवमायाति परत्रेह च सन्ततम् ॥ २८१ ॥

आपदो हि महाघोरास्तत्त्वसन्धानसङ्गतैः ।
निस्तीर्यन्ते महोत्साहैः शीलरक्षणतत्परैः ॥ २८२ ॥

वरं तत्क्षणतो मृत्युः शीलसंयमधारिणाम् ।
न तु सच्छीलहीनानां कल्पान्तमपि जीवितम् ॥ २८३ ॥

वरं परगृहे भिक्षा याचिता शीलधारिणा ।
न तु सच्छीलभङ्गेन साम्राज्यमपि जीवितम् ॥ २८४ ॥

धनहीनोऽपि शीलाढ्यः पूज्यः सर्वत्र विष्टपे ।
शीलहीनो धनाढ्योऽपि न पूज्यः स्वजनेष्वपि ॥ २८५ ॥

वरं सदैव दारिद्र्यं शीलैश्वर्यसमन्वितम् ।
न तु शीलविहीनानां विभवश्चक्रवर्तिनः ॥ २८६ ॥

धनहीनोऽपि सद्वृत्तो याति निर्वाणनाथताम् ।
चक्रवर्त्यप्यसद्वृत्तो याति दुःखपरम्पराम् ॥ २८७ ॥

सुखा रात्रिर्भवेत्तेषां येषां शीलं सुनिर्मलम् ।
न तु सच्छीलहीनानां दिवसोऽपि सुखावहः ॥ २८८ ॥

देहं दहति कोपाग्निस्तत्क्षणं समुदीरितः ।
वर्धमानः शमं सर्वं चिरकालसमर्जितम् ॥ २८९ ॥

क्रोधेन वर्धते कर्म दारुणं भववर्धनम् ।
शिक्षा च क्षीयते सद्यस्तपश्च समुपार्जितम् ॥ २९० ॥

सुदुष्टमनसा पूर्वं यत्कर्म समुपार्जितम् ।
तद्विपाके भवेदुग्रं कोऽन्येषां क्रोधमुद्वहेत् ? ॥ २९१ ॥

शोध्यमाने तु कर्मर्णे सत्सुखं किं न जायते ।
स्वहितं यः परित्यज्य तापनात्पापमाहरेत् ? ॥ २९२ ॥

छिद्यमान ऋणे यद्वच्चेतसो जायते धृतिः ।
शोध्यमाने तु कर्मर्णे किं विमुक्तिर्न जायते ? ॥ २९३ ॥

शत्रुभावस्थितान् यस्तु करोति वशवर्तिनः ।
प्रज्ञाप्रयोगसामर्थ्यात् स शूरः स च पण्डितः ॥ २९४ ॥

विवादो हि मनुष्याणां धर्मकामार्थनाशकृत् ।
वैराग्यान्धजनेनापि नित्यं चाहितकर्मणा ॥ २९५ ॥

धन्यास्ते मानवा नित्यं ये सदा क्षमया युताः ।
वञ्चयमानाः शठैर्लुब्धैर्विवादं नैव कुर्वते ॥ २९६ ॥

वादेन बहवो नष्टा येऽपि द्रव्यमदोत्कटाः ।
वरमर्थपरित्यागो न विवादः खलैः सह ॥ २९७ ॥

अहङ्कारो हि लोकानां नाशाय न तु वृद्धये ।
यथा विनाशकाले स्यात् प्रदीपस्य शिखोज्ज्वला ॥ २९८ ॥

हीनयोनिषु बम्भ्रम्य चिरकालमनेकधा ।
उच्चगोत्रं सकृत्प्राप्तः कस्ततो मानमुद्वहेत् ? ॥ २९९ ॥

राग-द्वेषौ महाशत्रू मोक्षमार्गमलिम्लुचौ ।
ज्ञान-ध्यान-तपोरत्नं हरतः सुचिरार्जितम् ॥ ३०० ॥

चिरं गतस्य संसारे बहुयोनिसमाकुले ।
प्राप्ता सुदुर्लभा बोधिः शासने जिनभाषिते ॥ ३०१ ॥

अधुना तां समासाद्य संसारच्छेदकारिणीम् ।
प्रमादो नोचितः कर्तुं निमेषमपि धीमता ॥ ३०२ ॥

प्रमादं ये तु कुर्वन्ति मूढा विषयलालसाः ।
नरकेषु च तिर्यक्षु ते भवन्ति चिरं नराः ॥ ३०३ ॥

आत्मा यस्य वशे नास्ति कुतस्तस्य परो जनः ।
आत्माधीनस्य शान्तस्य त्रैलोक्यं वशवर्ति च ॥ ३०४ ॥

आत्माधीनं तु यत्सौख्यं तत्सौख्यं वर्णितं बुधैः ।
पराधीनं तु यत्सौख्यं दुःखमेव न तत्सुखम् ॥ ३०५ ॥

पराधीनं सुखं कष्टं राज्ञामपि महौजसाम् ।
तस्मादेतत्समालोच्य, आत्मायत्तं सुखं कुरु ॥ ३०६ ॥

आत्मायत्तं सुखं लोके परायत्तं न तत्सुखम् ।
एतत् सम्यग्विजानन्तो मुह्यन्ति मानुषाः कथम् ? ॥ ३०७ ॥

निस्सङ्गाज्जायते सौख्यं मोक्षसाधनमुत्तमम् ।
सङ्गाच्च जायते दुःखं संसारस्य निबन्धनम् ॥ ३०८ ॥

पूर्वकर्मविपाकेन बाधायां यच्च शोधनम् ।
तदिदं तु श्वदष्टस्य रजखेड्या हि ताडनम् ॥ ३०९ ॥

अज्ञं हि बाधते दुःखं मानसं न विचक्षणम् ।
पवनैर्डीयते तूलं मेरोः श्रृङ्गं न जातुचित् ॥ ३१० ॥

परं ज्ञानफलं वृत्तं विभूतिर्न गरीयसी ।
तया हि वर्धते कर्म सद्वृत्तेन विमुच्यते ॥ ३११ ॥

संवेगः परमं कार्यं श्रुतस्य गदितं बुधैः ।
तस्माद् ये धनमिच्छन्ति ते त्विच्छन्त्यमृताद् विषम् ॥ ३१२ ॥

श्रुतं वृत्तं यमो येषां धनं परमदुर्लभम् ।
ते नरा धनिनः प्रोक्ताः शेषा निर्धनिनः सदा ॥ ३१३ ॥

को हि तृप्तिं समायातो भोगैर्दुरितबन्धनैः ।
देवो वा देवराजो वा चक्राङ्को वा नराधिपः ॥ ३१४ ॥

दुष्टमन्तर्गतं चित्तं तीर्थस्नानान्न शुध्यति ।
शतशोऽपि जलैर्धौतं मद्यभाण्डमिवाऽशुचि ॥ ३१५ ॥

आत्मा वै सुमहत्तीर्थं यदाऽसौ प्रशमे स्थितः ।
यदाऽसौ प्रशमे नास्ति ततस्तीर्थं निरर्थकम् ॥ ३१६ ॥

शीलव्रते जले स्नात्वा शुद्धिरस्य शरीरिणः ।
न तु स्नातस्य तीर्थेषु सर्वेष्वपि महीतले ॥ ३१७ ॥

रागादिवर्जनं स्नानं ये कुर्वन्ति दयापराः ।
तेषां सुनिर्मलो योगो न तु स्नातस्य वारिणा ॥ ३१८ ॥

आत्मानं स्नापयेन्नित्यं ज्ञाननीरेण चारुणा ।
येन निर्मलतां याति जीवो जन्मान्तरेष्वपि ॥ ३१९ ॥

सर्वाशुचिमये काये शुक्र-शोणितसम्भवे ।
शुचित्वं येऽभिवाञ्छन्ति नष्टास्ते जडचेतसः ॥ ३२० ॥

औदारिके शरीरेऽस्मिन् सप्तधातुमयेऽशुचौ ।
शुचित्वं येऽभिमन्यन्ते पशवस्ते न मानवाः ॥ ३२१ ॥

सत्येन शुध्यते वाणी मनो ज्ञानेन शुध्यति ।
गुरुशुश्रूषया कायः शुद्धिरेषा सनातनी ॥ ३२२ ॥

स्वर्ग-मोक्षोचितं नृत्वं मूढैर्विषयलालसैः ।
कृतं स्वल्पसुखस्यार्थे तिर्यङ्-नरकभाजनम् ॥ ३२३ ॥

सामग्रीं प्राप्य सम्पूर्णां यो विजेतुं निरुद्यमः ।
विषयारिमहासैन्यं तस्य जन्म निरर्थकम् ॥ ३२४ ॥

निरवद्यं वदेद् वाक्यं मधुरं हितमर्थवत् ।
प्राणिनां चेत आह्लादि मिथ्यावादबहिष्कृतम् ॥ ३२५ ॥

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात्तदेव कर्तव्यं किं वाक्येऽपि दरिद्रता ? ॥ ३२६ ॥

व्रतं शीलं तपो दानं संयमो-ऽर्हत्प्रपूजनम् ।
दुःखविच्छित्तये सर्वं प्रोक्तमेतन्न संशयः ॥ ३२७ ॥

तृणतुल्यं परद्रव्यं परं च स्वशरीरवत् ।
पररामां समां मातुः पश्यन् याति परं पदम् ॥ ३२८ ॥

सम्यक्त्वात् समतायोगान्निःसङ्गात् सहनात्तथा ।
कषायविषयाऽसङ्गात् कर्मणां निर्जरा परा ॥ ३२९ ॥

आर्हन्त्यं महिमोपेतं सर्वज्ञं परमेश्वरम् ।
ध्यायेद् देवेन्द्रचन्द्रार्कसभान्तःस्थं स्वयम्भुवम् ॥ ३३० ॥

सर्वातिशयसम्पूर्णं दिव्यलक्षणलक्षितम् ।
सर्वभूतहितं देवं शीलशैलेन्द्रशेखरम् ॥ ३३१ ॥

घातिकर्मविनिर्मुक्तं मोक्षलक्ष्मीकटाक्षितम् ।
अनन्तमहिमायुक्तं त्रयोदशगुणस्थितम् ॥ ३३२ ॥

अनन्तचरितं चारुचारित्रसमुपासितम् ।
विचित्रनयनिर्णीतं विश्वं विश्वैकवत्सलम् ॥ ३३३ ॥

निरुद्धकरणग्रामं निषिद्धविषयद्विषम् ।
ध्वस्तरागादिसन्तानं भवज्वलनवार्मुचम् ॥ ३३४ ॥

दिव्यरूपधरं धीरं विशुद्धज्ञानलोचनम् ।
अपि त्रिदश-योगीन्द्रकल्पनातीतवैभवम् ॥ ३३५ ॥

स्याद्वादपविनिर्घातभिन्नान्यमतभूधरम् ।
ज्ञानामृतपयःपूरैः पवित्रितजगत्त्रयम् ॥ ३३६ ॥

इत्यादिगणनातीतगुणरत्नमहार्णवम् ।
देवदेवं जिनं पार्श्वं वन्दे सर्वार्थसिद्धिदम् ॥ ३३७ ॥

एकषष्टितमे पट्टे विजयसिंहसूरिराट् ।
तपगच्छाधिपो जज्ञे सज्ज्ञानामृतशेवधिः ॥ ३३८ ॥

तस्य ज्ञान-क्रियानिष्ठः सच्चारित्रपवित्रितः ।
संविग्ननभोमार्तण्डः श्रीसत्यविजयोऽन्तिषत् ॥ ३३९ ॥

कर्पूरोज्ज्वलसत्कीर्तिः कर्पूरविजयाभिधः ।
तेषां शिष्योऽभवद् भूरिकीर्तिकर्बुरिताम्बरः ॥ ३४० ॥

श्रीक्षमाविजयो नाम वाचंयमशिरोमणिः ।
तेषां पट्टे पवित्रात्मा बभूव भुवि विश्रुतः ॥ ३४१ ॥

सज्जनानां शिरोत्तंसः श्रीजिनविजयाभिधः ।
तदन्तिषत् पण्डितानां मण्डनो भुवि विश्रुतः ॥ ३४२ ॥

तदन्तिषत् पवित्राङ्गः श्रीमदुत्तमनामभृत् ।
जैनसिद्धान्तपाथोधिमन्थनैकसुराचलः ॥ ३४३ ॥

तत्पट्टपूर्वदिग्नाथः श्रीपद्मविजयाभिधः ।
वर्तते भव्यसत्त्वानां बोधयन् भुवि विश्रुतः ॥ ३४४ ॥

ज्योतिर्विजयशिष्येण गुरूणामुपदेशतः ।
आद्याभ्यासे कृतो ग्रन्थः श्रीतत्त्वामृतनामकः ॥ ३४५ ॥

बाणवेदाष्टचन्द्रे च वत्सरे विक्रमार्कतः ।
माघे श्वेताष्टमीघस्रे कृतोऽणहिल्लपत्तने ॥ ३४६ ॥

पू.आ.श्रीरत्नसिंहसूरिविरचिता

# ॥ आत्मतत्त्वचिन्ताभावनाचूलिका ॥

कल्याणशस्यपाथोदं, दुरितध्वान्तभास्करम् ।
श्रीमत्पार्श्वप्रभुं नत्त्वा, किञ्चिज्जीवस्य दिश्यते ॥ १ ॥

नाहं वक्ता कविर्नैव, सतां नाक्षेपकः क्वचित् ।
अपूर्वं नैव भाषिष्ये, श्रव्यं किञ्चित्तथाऽपि मे ॥ २ ॥

व्युत्पत्तेर्भाजनं काव्यं, रसप्राणस्य मन्दिरम् ।
वक्रोक्तेः परमं धाम, वैदर्भ्या लास्यमण्डपः ॥ ३ ॥

शब्दार्थयोः परो गुम्फः प्रसत्तेस्तु सुधारसः ।
गुरोस्तुल्येन केनाऽपि, दृभ्यते लीलया स्फुटम् ॥ ४ ॥

सर्वमेतद् वृथा मन्ये, तत्त्वबुद्ध्या विवेचयन् ।
यतः कर्तुं भवोच्छेदं, चेतश्चेन्न प्रगल्भते ॥ ५ ॥

संसारानित्यता धन्य !, त्वया स्वतोऽन्यतोऽपि वा ।
दृश्यते ज्ञायते भूयः, श्रूयते चानुभूयते ॥ ६ ॥

भोगदृष्टौ कृतध्यानैरसंपूर्णमनोरथैः ।
जलबुद्बुदसादृश्यं, प्राप्य कैः कैर्न गम्यते ? ॥ ७ ॥

जैनधर्मगुणोपेतां, सामग्रीं प्राप्य निर्मलाम् ।
धर्म्मोद्यमस्तथा कार्यः, प्रमादो न यथा भवेत् ॥ ८ ॥

भावितात्मा क्षणं भूत्वा, स्थित्वैकान्ते समाहितः ।
नाशावंशे दृशौ धृत्वा, भावयार्थं मुहुर्मुहुः ॥ ९ ॥

आयातोऽस्मि कुतः स्थानाद् गन्तव्यं क्व पुनर्मया ।
सुखदुःखविधौ हेतुः, को वा तत्र भविष्यति ? ॥ १० ॥

पुण्यं पापमिहोपात्तं, ध्रुवं परत्र भुज्यते ।
इति मत्वा महाभाग !, प्रमादो नैव युज्यते ॥ ११ ॥

क्वेदं ते मानुषं जन्म, चिन्तितार्थप्रसाधकम् ।
धर्मसाधनसामग्री, क्वाऽसौ सर्वापि हस्तगा ? ॥ १२ ॥

तूर्णं तूर्णं तु धावंस्त्वं, कृत्यकोटिसमाकुलः ।
विस्मृत्य पृष्ठतः कोटीं, पुरः पश्यसि काकिनीम् ॥ १३ ॥

सूरः कातरतां यातो, जैनैरूचे (जघन्यश्च) स उत्तमः ।
एतद्द्वयविहीनस्तु, मध्यमः प्रणिगद्यते ॥ १४ ॥

मिथ्यादृग् श्रावको भाव्यश्चारुचारित्रवान् यतिः ।
जानीहि व्यवहारेण, मध्यमोत्तमहीनकान् ॥ १५ ॥

के के वैराग्यसंवेगौ, नाऽऽख्यान्ति घोषयन्ति च ? ।
व्यङ्ग्यौ तौ बाष्परोमाञ्चैः, पुण्याद् हर्षेऽपि कस्यचित् ॥ १६ ॥

हर्षेऽपि बहुशः स्यातां, नित्यं तौ वा महात्मनः ।
उत्थायोत्थाय तस्यास्यं, द्रष्टव्यं पुण्यमिच्छुभिः ॥ १७ ॥

जानन्तः शतशोऽप्यर्थं, शमादेर्बहवो जनाः ।
यतो वैराग्यसंवेगौ, तमर्थं तु न जानते ॥ १८ ॥

दैवादात्मन्नहं जाने, प्रमादीति यदि स्वकम् ।
तथाप्युद्धर्तुमासेव्यः, सदा स्वान्तेन कन्दलः ॥ १९ ॥

मावधीरय मे वाचं, कुरु किञ्चित्तथाविधम् ।
जन्मान्तरं गतो येन, वत्स वत्स ! न शोचसि ॥ २० ॥

हंहो चित्त ! प्रकटविकटं मोहजालं किमेतत्,
शून्यालापैः प्रलपितमिदं कार्य्यहीनं विजाने ।
स्मारं स्मारं किमिति मुषितं सुप्रसिद्धं यदेतत्,
लोभार्तस्य क्षुदपगमनं दृष्टमात्रे न भोज्ये ॥ २१ ॥

मज्जिह्वायै ततश्चेतो, यच्छादेशं सदाशय ! ।
हित्वा कंडूलतां वक्तुं, मूकत्वं येन सेवते ॥ २२ ॥

भावनां तत्त्वतः कर्तुं, न शक्तश्चेत्तथाप्यहम् ।
रित्नंधान्येषु मन्ये स्वं, यत्तस्यां व्यसनी सदा ॥ २३ ॥

श्री रत्नोपपदाः सिंहाः, सूरयो धर्म्ममङ्गलम् ।
तत्तत् किञ्चित्तथाऽऽचख्युः, प्राप्यते निर्वृतिर्यथा ॥ २४ ॥

पू.आ.श्रीजयशेखरसूरिविरचितः

# ॥ प्रबोधचिन्तामणिः ॥

## प्रथमोऽधिकारः

चिदानन्दमयं वन्दे निःसन्देहमहं महः ।
तमांसि सन्तु सर्व्वाणि तेजांस्यपि जिगाय यत् ॥ १।१ ॥

अपि सर्वविदां वाचो यदञ्चति न गोचरम् ।
स्वात्मानुभववेद्यं तच्चिदानन्दमहः स्तुमः ॥ १।२ ॥

न शक्ता यदसत्कर्तुमाकालमपि संहता ।
कर्माभ्रपटली सूर्यमिव तज्ज्योतिरानुमः ॥ १।३ ॥

अनन्तेष्वपि सिद्धेषु यत्साधारणधारणम् ।
अनुशिष्येव समता मातुराभातु तन्महः ॥ १।४ ॥

दुरेस्तु पापं धर्मोपि यत्र स्पृशति जातुचित् ।
तदुदासीनताजन्मचिन्महः स्पृहयेन्न कः ॥ १।५ ॥

न जाड्यस्य न दाहस्य हेतुतां यत् प्रपद्यते ।
उद्यतौ पुष्पदन्तौ तदर्च्चिरर्चितुमात्मनः ॥ १।६ ॥

दीपस्तमसि शर्वर्य्यां शर्व्वरीशो दिवा रविः ।
भास्वन्तः किं परं ज्योतिर्जयत्यनिशभासुरम् ॥ १।७ ॥

तनुते चिन्महश्चित्रं न कस्याचिन्त्यशक्तिकम् ।
मितात्मस्यितमिष्टे यल्लोकालोकप्रकाशने ॥ १।८ ॥

यदश्नन्तोपि केप्यापुस्तपस्यन्तोपि नापरे ।
यल्लेभिरे क्षणादेके वर्षकोट्यापि केपि न ॥ १।९ ॥

दृश्यसङ्गैरपि प्रोसं सङ्गत्यागेपि नेतरैः ।
अलक्ष्यं बालबुद्धीनां तत् कैवल्यं धिनोतु नः ॥ १।१० ॥

यस्योदये विलीयन्ते कामक्रोधादयः स्वयम् ।
नोपक्रामन्ति तज्ज्योतिः केवलं केऽवलम्बितुम् ॥ १।११ ॥

न नादेन न चक्रैर्न प्राणायामेन नासनैः ।
यस्य स्यान्नवरं लाभः स्वाभाविकसमाधिना ॥ १।१२ ॥

सरस्वतीं नमस्कुर्म्मः कर्मकालुष्यहारिणीम् ।
केनापि नाभिभूतेन ब्रह्मणा योदपाद्यत ॥ १।१३ ॥

मानसे निर्मलेऽस्ताघे विमुक्तविषयान्तरः ।
हंसश्चेत्कुरुते केलिं तत्क्व यातु सरस्वती ॥ १।१४ ॥

सरस्वती स्वतीरस्थानपि तां लम्भयत्यसौ ।
विशुद्धिं यां न दीयेत नदी स्नानशतैरपि ॥ १।१५ ॥

सरस्वतीधियाञ्चध्वं न पाषाणं न निम्नगाम् ।
सा हि योगधियां गम्या सर्वस्रोतोनियन्त्रणे ॥ १।१६ ॥

अज्ञाः स्वगृहसूत्रस्य परतप्तिपरायणाः ।
व्यासाः सर्वे कयास्रोतस्विनीषु तिमितामिताः ॥ १।१७ ॥

आचार्या बोधयन्ति स्वं परबोधकरा न ये ।
भ्रमन्ति ते स्वयंभ्रान्ता लगयन्तः परान्पथि ॥ १।१८ ॥

यावन्न शान्तिमायान्ति बहुदृष्टश्रुता अपि ।
तावच्छ्रुतानां वाहीकास्ते मुक्तानामिव द्विपाः ॥ १।१९ ॥

शीतोष्णौ नात्र भूयिष्टारिष्टौ दृष्टौ सुवृष्टिवत् ।
एवं शान्तो रसो विघ्नबहुलो न रसाः परे ॥ १।२० ॥

यथानलोपला: प्राय: पुष्कला न विधूपला: ।
कषायबहुले लोके तथाऽल्पे शान्तवृत्तय: ॥ १।२१ ॥

सिध्यन्त्ययत्नं नीवारा: शालिर्यत्नेऽपि संशय: ।
रसेष्वन्येषु शान्ते च जानीह्येतन्निदर्शनम् ॥ १।२२ ॥

शृङ्गाराद्या रसा लोके बाह्यैरपि निषेविता: ।
एषा शान्तसुधाकुल्या कुल्यानामपि दुर्लभा ॥ १।२३ ॥

पशुना शिशुनाऽनादिभवाभ्यासादुपासिता: ।
विद्वद्दुर्गं रसं शान्तं स्पर्धते किं रसा: परे ॥ १।२४ ॥

चर्व्यमाणा भृशं सर्वे रसा वैरस्यमाप्नुयु: ।
शान्तस्तु सेवितोऽत्यन्तं मोक्षावधिसुखप्रद: ॥ १।२५ ॥

सत्यं शान्तो रसेन्द्रोऽयं यस्तत्तद्दत्तभावन: ।
न कषायाग्निनोड्डीन: कल्याणश्रेणिकारणम् ॥ १।२६ ॥

बाह्यां दृशं परित्यज्य स्वात्मना स्वं विभावयन् ।
क्रमादुपक्रमी शान्तावस्थामाप्नोति पण्डित: ॥ १।२७ ॥

वनवापीविहाराद्यं बाह्यं वस्तु यदीक्ष्यते ।
तदन्तरङ्गतां नीत्वा यो ध्यायति स तात्त्विक: ॥ १।२८ ॥

कषायकलुष: स्वात्मा यावदिच्छावशंवद: ।
श्रद्धेयाध्यात्मवार्तापि तावन्न क्लिबसूतिवत् ॥ १।२९ ॥

विवेकवीरावष्टम्भाद्दम्भादिभटभञ्जनात् ।
यो जिगीषति तं मोहभूपं स विदुषां वर: ॥ १।३० ॥

ब्राह्मे मुहूर्त्ते यो रात्रेराद्ययामात्ययेऽथवा ।
निद्रातन्द्रे त्यजन्नऽस्वचिन्तक: साधक: स क: ॥ १।३१ ॥

न वादसादरो नावलिप्तो न ख्यातिकामुक: ।
न क्वाप्यौत्सुक्यभूर्नैव यत्तत्स्वोक्तसमर्थक: ॥ १।३२ ॥

न गोष्ठीच्छुर्नान्यदेशवेषभाषादिपृच्छकः ।
न गीतादिप्रियो नाक्षिलोलः स खलु साधकः ॥ १।३३ ॥

आक्रुष्टे याति न द्वेषं स्तुतो भवति नोन्मनाः ।
अबाधितसमाधिस्थः स्वस्थो भवति साधकः ॥ १।३४ ॥

लवलेशमुहूर्त्तादिक्रमाद्यः सङ्गवर्त्यपि ।
निःसङ्गतार्थं यतते विद्वंस्तं विद्धि साधकम् ॥ १।३५ ॥

कोऽहं कुतः समायातः के च मे बन्धवोऽरयः ।
क्व गन्ता किं च पाथेयमेवं ध्यायति सोऽनिशम् ॥ १।३६ ॥

ज्ञाततत्त्वतया वेत्ति लोकवृत्तं विसंस्थुलम् ।
तथापि कुरुते नैव स्वात्मोत्कर्षान्यगर्हणे ॥ १।३७ ॥

योगी शैलाणुवज्जानन्नप्याध्यात्मिकबाह्ययोः ।
धर्मयोरन्तरं भिन्ते व्यवहारं गिरापि न ॥ १।३८ ॥

शृण्वन्नप्येडवद्योगी पश्यन्नप्यन्धवद्ध्रुवम् ।
वक्तापि मूकवद्विद्वानपि बालसमो भवेत् ॥ १।३९ ॥

आदौ लक्ष्ये ततो लक्ष्यं विनापि द्रढयन्मनः ।
नित्याभ्यासी सुखं धीमानुन्मनीभावमश्नुते ॥ १।४० ॥

शान्ते स्वान्ते निजग्राह्यान्निवृत्ते चेन्द्रियव्रजे ।
सुधीरविच्युतः स्थानादात्मन्यात्मानमीक्षते ॥ १।४१ ॥

ध्यानत्रयमतिक्रम्य रूपातीतमुपागतः ।
आत्मा स्वस्थः स्वरूपस्थः प्राप्नोति परमात्मताम् ॥ १।४२ ॥

आत्मासौ द्विविधो ज्ञेयो भव्याभव्यस्वरूपतः ।
भविष्यत्सिद्धिपर्यायो भव्योऽभव्यस्त्ववनीदृशः ॥ १।४३ ॥

सिद्धिगोपि त्रिधा दूरासन्नमध्यमभेदतः ।
योऽपार्धपुद्गलस्यान्ते सेद्धाऽसौ दूरसिद्धिकः ॥ १।४४ ॥

योऽन्तर्मुहूर्त्ततः सिध्यत्ययमासन्नसिद्धिकः ।
आसन्नदूरयोर्मध्ये सिध्यन्मध्यमसिद्धिकः ॥ १४५ ॥

अत्र मध्यमसिद्धयर्हभव्यात्मा कोपि वक्ष्यते ।
इह मोहविवेकादिष्वेकत्वं जात्यपेक्षया ॥ १४६ ॥

अत्रात्मचेतनादीनां यद्दाम्पत्यादिशब्दनम् ।
तत्सर्वं कल्पनामूलं सापि श्रेयस्करी क्वचित् ॥ १४७ ॥

मीनमैनिकयोः पाण्डुपत्रपल्लवयोरपि ।
या मिथः संकथा सूत्रे वद्धा सा किं न बोधये ॥ १४८ ॥

नायकत्वं कषायाणां कर्मणां रिपुसैन्यताम् ।
आदिशन्नागमोऽप्यस्य प्रबन्धस्यैति बीजताम् ॥ १४९ ॥

सारोपा लक्षणा क्वापि क्वापि साध्यावसानिका ।
धौरेयतां प्रपद्येते ग्रन्थस्यास्य समर्थने ॥ १५० ॥

आत्मज्ञानजुषां ज्वराद्यपगमो दूरे जराराक्षसी,
प्रत्यासीदति लब्धिसिद्धिनिवहो ज्ञानं समुन्मीलति ।
आनन्दोऽनुभवेऽपि वागविषयः स्यात्पुण्यपापक्षयो,
मुक्तिर्मुष्टिगतेव केवलमिदं लब्धुं यतध्वं ततः ॥ १५१ ॥

## द्वितीयोऽधिकारः

आत्मा निश्चयतो येन स्वरूपेण प्रकीर्तितः ।
यथा सचेतनोप्येष मायया विवशीकृतः ॥ २।१ ॥

यथाऽतिदूनोदास्ते स्म मायासक्तेऽत्र सन्मतिः ।
यथा स जनयामास माय्यायां मोहमङ्गजम् ॥ २।२ ॥

यथा मायामनोवश्यो नानादुःखान्यसोढ सः ।
यथाविवेकमुत्पाद्य मनस्तं निरवासयत् ॥ २।३ ॥

विवेकेन यथा राज्यं लेभे सर्वज्ञसेवया ।
मोहस्यादेशतः कामस्त्रिलोकीं जितवान् यथा ॥ २।४ ॥

तत्रस्तेन विवेकन यथार्हन्नभ्युपद्यत ।
तदध्यक्षं निजां वीरचर्यां सोऽदर्शयद्यथा ॥ २।५ ॥

पाणौकृत्य दृढप्रेमां कुमारीं संयमश्रियम् ।
यथा जातबलोन्मेषो मोहमेषोऽभ्यषेणयत् ॥ २।६ ॥

यथा मोहतमो हत्वा समरे भानुमानिव ।
मनोमोहक्षयक्षामं विवेकः प्रत्यबोधयत् ॥ २।७ ॥

हुते हुताशे मनसा स्वात्मन्युत्साह्य चेतना ।
यथा जगन्नायकतां निनाय स्वपतिं पुनः ॥ २।८ ॥

तथाहमखिलं वक्ष्ये वृद्धवाक्यानुसारतः ।
बालोऽप्यभ्येति कान्तारं गुरुहस्तावलम्बनात् ॥ २।९ ॥

पद्मनाभार्हतः शिष्यो भावी धर्मरुचिर्मुनिः ।
तद्भाषितदिशा ज्ञेयं स्वरूपं सकलात्मनाम् ॥ २।१० ॥

जम्बूरित्यस्त्ययं द्वीपो यस्य सच्चक्रशालिनः ।
परिधिर्जगती तुम्बं सुमेरुररका दिशः ॥ २।११ ॥

तस्य दक्षिणदिग्भागे क्षेत्रं जयति भारतम् ।
रत्नैघलाभलोभेनेवोदधेः सविधे स्थितम् ॥ २।१२ ॥

तत्रास्या अवसर्पिण्या व्यतिक्रान्तेऽरकत्रये ।
तुर्यारकावसाने श्रीवर्धमानो जिनोऽजनि ॥ २।१३ ॥

सप्तहस्तोच्छ्रयः स्वर्णरुग् यः केशरिणाङ्कितः ।
आघाटस्तम्भवद्भेजे तुर्यपञ्चमकारयोः ॥ २।१४ ॥

तत्पादपद्मनिश्छद्मसेवाभृङ्गोऽभवन्नृपः ।
उल्लासिनागरश्रेणिः श्रेणिको मगधेश्वरः ॥ २।१५ ॥

यस्य राजगृहेशस्य सस्यश्रिय इव प्रजाः ।
सौम्यदृष्टिसुधावृष्टिसिक्ताः पप्रथिरेतराम् ॥ २१६ ॥

यः खड्गकम्बयाऽरातीननभ्यस्तामपि स्वयम् ।
पलायनकलां युद्धशालायामध्यजीगपत् ॥ २१७ ॥

उजःपूरेण पौरेभ्यो विदूरितमनाश्रयम् ।
कृपया स्थापयाञ्चक्रे रथचक्रेऽरिनाम यः ॥ २१८ ॥

नायं हित्वा क्रमं नायं नायमानायमम्बुनि ।
कषाकर्षमृषिं वीक्ष्य नायं सद्भावतश्च्युतः ॥ २१९ ॥

नुवन्नवनवैश्छन्दोगणैर्यज्जैनतागुणम् ।
हरति स्म हरिर्गर्व्वं सर्व्वं स्वर्बन्दिनामपि ॥ २२० ॥

कौमारदारसंबन्धराज्यप्राज्यसुतोद्भवाः ।
तस्यागमात्परिज्ञेया नाधिकारोऽत्र तैर्यतः ॥ २२१ ॥

अर्हद्भत्क्यादिभिः स्थानैस्तीर्थकृन्नामकर्म्म सः ।
बबन्ध कैश्चन स्पष्टं काव्यं कविरिवाक्षरैः ॥ २२२ ॥

वैमानिकेभ्यो न परां याति सम्यक्त्ववान् गतिम् ।
स्वाधीनकल्पवृक्षो हि कदन्नानि भुनक्ति कः ॥ २२३ ॥

तथापि प्रथमं प्राप व्यापद्य नरकं नृपः ।
सम्यक्त्वलाभतः पूर्वं नरकायुर्बबन्ध यत् ॥ २२४ ॥

रोद्धुं शक्या वीचयो वारिराशे, रोद्धुं शक्या अर्जुनस्यापि बाणाः ।
रोद्धुं शक्या विद्युदभ्रात्पतन्ती, रोद्धुं शक्या नो पुनः कर्मरेखा २२५

नरकस्थः सहस्वात्मन् ! स्वकृतानीति भावयन् ।
नात्यन्तवेदनः सोभूद्दुःखान्यनुभवन्नपि ॥ २२६ ॥

चतुरभ्यधिकाशीतिसहस्रशरदत्यये ।
गर्त्तावर्त्तादिव गजो निरयात्स निरेष्यति ॥ २२७ ॥

ज्ञानत्रयं स तद्भव्यं न त्यक्ता निरयन्नपि ।
अमेध्यादप्युपादेयं हेमेतीव स्मरन्नयम् ॥ २।२८ ॥

तदास्यामवसर्प्पिण्यां गतायामिह भारते ।
तदनन्तरजोत्सर्प्पिण्याश्च मुख्ये गतेऽरके ॥ २।२९ ॥

द्वैतीयीकेऽरके लग्ने भस्मीभूते भुवस्तले ।
मेघाः प्रादुर्भविष्यन्ति स्वयं कालानुभावतः ॥ २।३० ॥

प्रबलानलकीलाभिः फुल्लकंशुकतां गता ।
पुष्करावर्त्तवृष्ट्या प्राक् सर्वा निर्वास्यति क्षितिः ॥ २।३१ ॥

क्षीरमेघक्षरत्क्षीरपूरसिक्ताय भूरियम् ।
योक्ष्यते निजवर्णेन तनुरिव तपस्विनः ॥ २।३२ ॥

काले घृतघनस्तत्र स्नेहं संक्रमयिष्यति ।
सलिलैर्मञ्जुलैर्वाक्यैर्नवोढायामिव प्रियः ॥ २।३३ ॥

वसुधाऽसौ सुधाम्भादेवरधाराकराञ्चिता ।
अथ नानाङ्कुरव्याजाद्भविता रोमहर्षिणी ॥ २।३४ ॥

ततो रसघनो नानारसान्निःशेषवस्तुषु ।
गोभिः स्वाभिः कविः काव्येष्विव संयोजिष्यति ॥ २।३५ ॥

भावाः कालानुभावेन शैलवल्लिवनादयः ।
स्वयमेवोद्घटिष्यन्ते निशायामिव तारकाः ॥ २।३६ ॥

तदा कुलकराः सप्त भवितारोऽत्र भारते ।
परार्थप्रगुणा न्यायनिपुणा विलसद्गुणाः ॥ २।३७ ॥

मित्रप्रभः सुभूमश्च सुप्रभश्च स्वयंप्रभः ।
दत्तः सूक्ष्मः सुबन्धुश्च तेषां नामान्यनुक्रमम् ॥ २।३८ ॥

द्वितीयेऽथारके क्षीणे तृतीये च समागते ।
वैताढ्यभूभृदासन्ने शतद्वाराभिधे पुरे ॥ २।३९ ॥

तदन्वयभवो भावी स्वभावसुभगाकृतिः ।
कुलकृत्सुमतिर्नाम मतितर्जितवाक्पतिः ॥ २।४० ॥

तस्य भद्राभिधा भार्या यस्याः सत्त्वकषोपले ।
सद्भिः शीलसुवर्णस्य वर्णिका वर्ण्यते स्थिरा ॥ २।४१ ॥

उध्धृतः श्रेणिकस्यात्मा सीमन्तान्नरकौकसः ।
तस्याः कुरङ्गशावाक्ष्याः कुक्षाववतरिष्यति ॥ २।४२ ॥

गजोक्षसिंहलक्ष्मीस्रक् शशिसूर्या ध्वजो घटः ।
सरोब्धिभवनान्युच्चैरत्नराशिस्तनूनपात् ॥ २।४३ ॥

इमांश्चतुर्दश स्वप्नानस्वप्नार्च्यक्रमा क्रमात् ।
धीरधीरिव सद्विद्याः सा निरीक्षिष्यते तदा ॥ २।४४ ॥

सुमतिः स्वमतेर्योग्यं यावज्जल्पति तत्फलम् ।
तावदेत्यादिमः शक्रस्तां नत्वेति गदिष्यति ॥ २।४५ ॥

यत्परं न परं किञ्चिद्दैवतं भुवनत्रये ।
तं गर्भं विभ्रती कुक्षौ देवैस्त्वं देवि वन्द्यसे ॥ २।४६ ॥

गर्भं चिन्तामणिं विभ्रच्चिन्ताधिकफलप्रदम् ।
रत्नाकरं परिभवत्यहो देवि तवोदरम् ॥ २।४७ ॥

इमं कल्पद्रुमाङ्कुरं दधानोदरकन्दरे ।
त्वं मन्दारायसे स्वामिन्यन्यस्त्रैणे तृणोपमे ॥ २।४८ ॥

अमीषामनुभावेन स्वप्नानां तनुजस्तव ।
सुरासुरेश्वरैः सेव्यः प्रथमोऽर्हन् भविष्यति ॥ २।४९ ॥

इत्युक्त्वा विरते वज्रधरे सा विकसन्मनाः ।
उत्कण्टकवपुर्यष्टिर्गाहिता जाहकायितम् ॥ २।५० ॥

मन्दन्यासपदा पूर्णदोहदाल्पपरिच्छदा ।
वर्धयिष्यति सा गर्भं पथ्याहाराल्पभूषणा ॥ २।५१ ॥

गर्भस्तां वर्धमानोऽपि न विधाता गुरूदराम् ।
या हि यस्याः स्थितिस्तस्या भञ्जको भगवान्न सः ॥ २।५२ ॥

श्रीरास्तां रूपसौभाग्यधीधैर्याद्या गुणा अपि ।
तस्या व्रश्ये प्रभौ कृष्णचित्रकाभेऽवृधंस्तराम् ॥ २।५३ ॥

किञ्चिदभ्यधिके मासनवकेऽतिगतेऽथ सा ।
सविता सुतमद्वैतद्युतिद्योतितदिग्मुखम् ॥ २।५४ ॥

अपि नैरयिकान् स स्वजन्मना सुखयिष्यति ।
अहं पूर्वमिहावात्समिति स्नेहं वहन्निव ॥ २।५५ ॥

वासाय पद्मवासाया भुवं पद्ममयीमिव ।
कर्तुं देवास्तदा वर्षिष्यन्ति पद्मानि कुम्भशः ॥ २।५६ ॥

तत्रायाता जनिं जैनीं विज्ञायासनकम्पतः ।
स्वस्वकर्म्म करिष्यन्ति षट्पञ्चाशत्कुमारिकाः ॥ २।५७ ॥

अथ तासु निवृत्तासु चतुःषष्टिः सुरेश्वराः ।
मेरुमूर्ध्नि मिलिष्यन्ति जिनजन्मोत्सवेच्छया ॥ २।५८ ॥

सौधर्मप्रभुणा नीतं जिनं ते तत्र पुष्कलैः ।
पुष्करैः स्नपयिष्यन्ति पुष्करावर्त्तका इव ॥ २।५९ ॥

पूजयित्वा च नुत्वा च नीत्वा निजपुरं जिनम् ।
वर्षित्वा हेमकोटीश्च यातारस्ते यथागतम् ॥ २।६० ॥

जाता जगत्यां यद्वृष्टिः पद्मानां तस्य जन्मनि ।
पद्मनाभमहापद्मनाम्नी तेन स धास्यति ॥ २।६१ ॥

सोऽथ वर्धिष्यते पञ्चाप्सरोभिः परिपालितः ।
अङ्गुष्टस्थानपीयूषपानपुष्टीभवत्तनुः ॥ २।६२ ॥

अङ्कादङ्कं संचरिष्णौ नीयमाने करात्करम् ।
न त्रुटिष्यति वादोऽस्मिन् बाले जातु नृनाकिषु ॥ २।६३ ॥

भूयोभूयः शिशूभूय भूयांसस्त्रिदिवौकसः ।
स्वं धन्यं मन्यमानास्तं खेलयिष्यन्ति शैशवे ॥ २१६४ ॥

अष्टवार्षिकमत्यूर्जभ्राजमाजन्मचिन्मयम् ।
निवेशयिष्यतो राज्ये पितरौ तमनातुरौ ॥ २१६५ ॥

युक्त्या बलकरं राज्यमाज्यवत्सोथ भोक्ष्यति ।
पथ्याशीव न तारुण्यं श्रीस्त्रीमोहत्रिदोषभाक् ॥ २१६६ ॥

तस्य दिग्जययात्रायामुद्यतस्य भविष्यतः ।
पूर्णभद्रमाणिभद्रौ नाकिनौ दण्डनायकौ ॥ २१६७ ॥

नाहूतौ नार्थितौ न स्वदानेन स्वीकृताविमौ ।
भाग्यैरस्य परैर्योद्धुमुत्थास्येते स्वयं युधि ॥ २१६८ ॥

परः कोऽपि पुरः स्थाता न तयोर्युध्यमानयोः ।
प्रभवे प्रभवेयुः किं मानवा दानवारये ॥ २१६९ ॥

ततोऽसौ देवसेनाख्यां प्राषितः पारिपार्श्विकैः ।
अन्यदा धोरणप्रष्ठेनैवं विज्ञापयिष्यते ॥ २१७० ॥

अद्य ते विद्यते कोऽपि चत्वरे चतुरेश्वर ! ।
चतुर्दन्तः शशिश्वेतः कुतोप्येतः करी नवः ॥ २१७१ ॥

न विद्मः प्राभृते प्रैषि किमिन्द्रेणाभ्रमुपतिः ।
पुण्यैस्तवाथवाकृष्टः कोप्यसौ दिग्गजव्रजात् ॥ २१७२ ॥

उपवाह्याश्च सन्नाह्याः प्राक् ते ये सन्ति हस्तिनः ।
स्वैर्गुणैरचिरायातोऽप्येष तेषु प्रभूयते ॥ २१७३ ॥

सकृत्सुकृतलभ्यं तं साक्षाद्वीक्षितुमर्हसि ।
सफलीभवतां नेत्रे अप्यपूर्वविलोकनात् ॥ २१७४ ॥

सोथ तद्वचसा हस्तिशालामागत्य वीक्ष्य तम् ।
कुतो रत्नमिदं प्रादुर्बभूवेत्युपयोक्ष्यते ॥ २१७५ ॥

वैताढ्योपान्तकान्तारवासी मत्सुकृतेरितः ।
अत्र वित्रासितो दावेनागान्नागाधिभूरयम् ॥ २।७६ ॥

इति ज्ञानेन निश्चित्य स तमारोक्ष्यति द्विपम् ।
कक्षाग्रितकरस्तोमं व्योममध्यमिवार्यमा ॥ २।७७ ॥

तदासनगतो ग्रामारामादौ विचरिष्यति ।
अभ्रमुजानियानस्य विभ्रमं जनयन् जने ॥ २।७८ ॥

ततः ख्यातः क्षितौ नाम्ना स्वामी विमलवाहनः ।
भोग्यकर्मक्षयायैव राज्ये स्थास्यति केवलम् ॥ २।७९ ॥

एत्य लोकान्तिकैर्देवैरन्यदा ब्रह्मलोकतः ।
विज्ञापयिष्यते भृत्यैरिव प्रस्ताववेदिभिः ॥ २।८० ॥

प्रवर्तय प्रजापाल ! धर्मतीर्थमथो भुवि ।
लोकद्वयश्रियां दाने त्वमेव प्रतिभूर्नृणाम् ॥ २।८१ ॥

सोथ संवत्सरं स्वर्णधाराभिः कृतवर्षणः ।
प्रावृष्येव प्रवर्षन्तं जलदं खलु जेष्यति ॥ २।८२ ॥

तदा घनागमे क्षीणे शरत्कालः प्रथिष्यते ।
विकसन्मालतीमालागन्धाकृष्टमधुव्रतः ॥ २।८३ ॥

सरांसि यस्यां जलपूरितानि, जलानि विस्मेरसरोरुहाणि ।
सरोरुहाणि प्रसरद्बिसानि, बिसानि हंसैर्वदने धृतानि ॥ २।८४ ॥

हंसाश्च हंसीभिरमुक्तपार्श्वा, हंस्यः सलीलं गतरङ्गभाजः ।
गतानि रामाभिरुरीकृतानि, शरन्न सा किं शरदि प्रधाना ॥ २।८५ ॥

माधुर्यमिक्षौ पयसि प्रसत्तिं, शुचित्वमब्देऽध्वनि पङ्कशुद्धिम् ।
वितन्वती तच्छरदत्र चक्रे, यत्साधुचक्रे सुगुरुः करोति ॥ २।८६ ॥

तदा स भगवांस्त्रिंशदब्दः पित्रोः प्रमीतयोः ।
आदित्सुः संयमं सूनौ राज्यभारं निधास्यति ॥ २।८७ ॥

कृतदीक्षाभिषेकोऽथ सदेवैः स पुरन्दरैः ।
आरूढः शिबिकां दिव्यां स्फुरत्तूर्यत्रयः पुरः ॥ २१८८ ॥

दिवं दिविष्ठैर्भूमिष्ठैर्भुवं संकीर्णतां नयन् ।
गीयमानगुणः पौरैः पुरोपवनमाप्स्यति ॥ २१८९ ॥

शिबिकातः समूत्तीर्य त्यक्तालङ्कारपञ्चकः ।
ऋभुक्षा भुजमुत्तम्भ्य निषिद्धे तुमुलेऽखिले ॥ २१९० ॥

नमः सिद्धेभ्य इत्युक्त्वा संयमं स प्रपत्स्यते ।
सर्वसावद्ययोगानां यावज्जीवं निषेधतः ॥ २१९१ ॥

निश्चलो नच्युतः स्थानात् स्वे परे वा समाशयः ।
आधारः सर्वसत्त्वानां धीरो जनमनोहरः ॥ २१९२ ॥

शीतवातातपव्रातसहनः शिखरीव सः ।
तपोऽनलबलात् कर्म्मकक्षवैमुख्यमेष्यति ॥ २१९३ ॥

यदा द्वादशवर्षाणि व्रतात्पक्षास्त्रयोदश ।
अत्येष्यन्ति तदा देवः केवलज्ञानमाप्स्यति ॥ २१९४ ॥

सुरैः समवसरणे भुवनाभरणे कृते ।
स्वामी चामीकरमये निविष्टः सिंहविष्टरे ॥ २१९५ ॥

आयोजनविसारिण्या सर्वसत्त्वसमानया ।
वाचा प्रारप्स्यते लोके निर्म्मदे धर्मदेशनाम् ॥ २१९६ ॥

प्रतिबुद्धाः प्रभोर्वाचा सदाचारद्रुकुल्यया ।
सादरा आदरिष्यन्ति बहवः संयमश्रियम् ॥ २१९७ ॥

अन्ये तु देशविरतिं सम्यक्त्वमपरे पुनः ।
कल्पद्रुमेऽपि सम्प्राप्ते न ह्येकरुचयोऽर्थिनः ॥ २१९८ ॥

अभिजाते तदा जाते शिष्यजाते गणाधिपाः ।
एकादश भविष्यन्ति सम्प्राप्य त्रिपदीं प्रभोः ॥ २१९९ ॥

चतुर्धा स्थापिते सङ्घे दुरुल्लङ्घ्येऽमरैरपि ।
विहर्ता सोऽन्यतो बोधिबीजं भव्यावनौ वपन् ॥ २।१०० ॥

शिष्यो धर्मरुचिस्तस्य कोऽपि कोपाद्यदूषितः ।
क्व भावि मम कैवल्यमिति प्रक्ष्यति पारगम् ॥ २।१०१ ॥

सुग्रामनामनि ग्रामेऽभिहिते स्वामिना मुनिः ।
तत्र यास्यति नालस्यवश्यानां क्वापि संपदः ॥ २।१०२ ॥

तद्वने ऽध्यूषुषस्तस्य प्रतिमामेकरात्रिकीम् ।
धाराधिरूढध्यानस्य कैवल्यं संघटिष्यते ॥ २।१०३ ॥

मुनिं केवलिनं नन्तुमनन्तगुणमागताः ।
विबुधाः प्रविधातारस्तारे जयजयारवम् ॥ २।१०४ ॥

दन्दुभिध्वनितं दिव्योद्योतं निर्माय ते मुनेः ।
आसीनाः पुरतः प्राप्तसौख्याः श्रोष्यन्ति देशनाम् ॥ २।१०५ ॥

ग्रामस्य ग्रामणीस्तत्रागतो वीक्ष्यानगारिणम् ।
अगर्वमुद्गताऽगण्यगीर्वाणगणगौरवम् ॥ २।१०६ ॥

चिरं चमत्कृतश्चित्ते चतुरश्चिन्तयिष्यति ।
जैनं प्रवचनं धन्यमहो महिममन्दिरम् ॥ २।१०७ ॥

एकोऽपि नाकी नास्माकं स्वप्नेऽपि स्फुटदर्शनः ।
अमुं साक्षात्परोलक्षास्तेऽनाहूता उपासते ॥ २।१०८ ॥

प्रभुतालवलाभेऽपि वयं मिथ्याभिमानिनः ।
अहो प्रशान्तचित्तोऽयं किङ्करेष्वमरेष्वपि ॥ २।१०९ ॥

रूपे निरुपमे वर्ण्ये लावण्ये यौवने घने ।
व्रतकष्टेऽमुनादायि स्यात्मेदृगुदयार्थिना ॥ २।११० ॥

इत्युल्लसत्परीणामो नत्वा सत्त्वाधिकं मुनिम् ।
निवेक्ष्यते यथायोग्ये स्थाने स स्थिरमानसः ॥ २।१११ ॥

पायं पायं गतापायां देशनां स मुनीशितुः ।
मंस्यते जाततोषः स्वं निर्विशेषं सुधाभुजाम् ॥ २।११२ ॥

देशनान्ते स तं प्रष्टा मुनिप्रष्ठाहमीक्षणात् ।
तत्र क्षणादवाप्तोऽस्मि विस्मयं वचनातिगम् ॥ २।११३ ॥

कस्त्वं कुतः समायासीः प्रापः कथमिमां श्रियम् ।
इति स्वचरिताख्यानाज्जनोऽयमनुगृह्यताम् ॥ २।११४ ॥

कदाचित्तव वाचाहमप्युत्साहमवाप्नुयाम् ।
लक्ष्मीं लब्धुश्रियां लाभकरी सच्चरितश्रुतिः ॥ २।११५ ॥

निगदिष्यत्यथो वाचं वाचंयममतल्लिका ।
मल्लिकां कोरकाकारदन्तद्युतिसहोदरीम् ॥ २।११६ ॥

अन्वयोजि भवता यदिदानीं तत्र सौम्य ! वयमुत्तरयामः ।
अस्त्यसौ व्यतिकरः किल भूयांस्तन्निराकुलमनाः शृणु सर्वम् २।११७

## ॥ तृतीयोऽधिकारः ॥

अनादिनिधनानन्तजन्तुसंतानशालिनी ।
स्थिरवासरसोल्लासिपौरा पूरस्ति संसृतिः ॥ ३।१ ॥

स्वर्भूर्भुवस्त्रयी यत्र पाटकत्रयसंन्निभा ।
सन्मध्यमजघन्यानां वसनायोचिता स्थिता ॥ ३।२ ॥

ये केचिद्देशनगरग्रामाकरसरिन्नगाः ।
आसन् सन्ति भविष्यन्ति ते तत्कोणांशवासिनः ॥ ३।३ ॥

भूताद्याः पुरुहूतान्ता ये केचिदिह देहिनः ।
तस्यां हि प्रभुतां भोक्तुं ते सर्वेऽप्यधिकारिणः ॥ ३।४ ॥

दृष्टानेकव्यलीकोऽपि यस्यां नोद्विज्यते जनः ।
अहो सौभाग्यसारत्वं तस्यामेव समर्थितम् ॥ ३।५ ॥

यन्निगोदाङ्गिभिः क्लेशेऽप्यमुञ्चद्भिर्निजं गृहम् ।
स्वस्यानस्थैर्यमन्येऽपि नागराः खलु शिक्षिताः ॥ ३।६ ॥

प्रायो वास्तुक्षयोऽन्येषु नगरेषु निरीक्ष्यते ।
अक्षीणवास्तौ यस्यां तु निःशङ्कमुषितं जनैः ॥ ३।७ ॥

निपानन्त्यब्धयो यत्र क्रीडाशैलन्ति मेरवः ।
उल्लोचति नभो मुक्तावचूलन्ति च तारकाः ॥ ३।८ ॥

सहस्रलोचनेनापि न शक्यो द्रष्टुमञ्जसा ।
बुभुजे कोऽपि तां लोकव्यापको हंसभूपतिः ॥ ३।९ ॥

प्रत्यक्षाः केचिदत्यक्षाः केचित्सन्त्यस्य ये गुणाः ।
व्यक्तं सहस्रजिह्वोपि तान्वक्तुं शक्तिमुज्झति ॥ ३।१० ॥

ग्रन्थकोटीरधीयानास्तन्वाना विजने तपः ।
स्वं मेनिरे वृथायासं तत्स्वरूपनिरूपणे ॥ ३।११ ॥

अङ्गुल्या मेरुमुद्धर्तुं दोर्भ्यां तरितुमम्बुधिम् ।
ये शूराः सन्ति सूच्छनास्ते शक्त्यास्य महौजसः ॥ ३।१२ ॥

अध उर्ध्वं च लोकान्तं समयेन व्रजन्नयम् ।
जवनः पवनेनापि त्रपते मैत्र्यमिच्छता ॥ ३।१३ ॥

या मतिः क्रामति चतुर्दशपूर्वोदधीन् सुखम् ।
सास्य स्पृष्टकियन्मात्रप्रदेशस्फुरणात्मिका ॥ ३।१४ ॥

सर्वशास्त्राणि यस्यैव कल्लोलाः संविदम्बुधेः ।
केऽपि सद्बोधमुक्ताढ्या दुर्बोधमकराः परे ॥ ३।१५ ॥

यत्पुरस्तरणिज्योतिरिङ्गणो गगनाङ्गणे ।
तन्नूनं केवलज्ञानं यस्य स्वाभाविकं महः ॥ ३।१६ ॥

न स्पर्शेषु न वर्णेषु न रसेषु न गन्धयोः ।
न संस्थानेषु केनापि प्रकारेण स लक्षितः ॥ ३।१७ ॥

न बालो न युवा नार्यो न म्लेच्छो नाङ्गना न ना ।
न स्थाष्णुर्न त्रसो नाणुर्न स्थूलः स प्रकीर्तितः || ३।१८ ||

केवलं स्फटिकाश्मेवाश्रयभेदेन भिन्नताम् ।
भजत्येकस्वरूपोऽपि स्वकर्मजनितेन सः || ३।१९ ||

सकर्मा विलसत्येषु भुवि द्यवि जले स्थले ।
अकर्मा प्राप्य लोकाग्रं पुनर्नैवावरोहति || ३।२० ||

यथा काष्टेऽनलस्तैलं तिले स्नेहश्च गोरसे ।
स्वर्णं मृदि पयः क्षीरे तथासौ स्थितवर्ष्मणि || ३।२१ ||

अहंप्रत्ययविज्ञेयः सिद्धत्रैकालिकक्रियः ।
अत्यक्षोऽनन्तपर्यायः कर्त्ता भोक्ता च कर्मणाम् || ३।२२ ||

चिद्रूपोऽर्थान्तरं देहादसंख्येयप्रदेशकः ।
अनादिनिधनो योगिगम्यः सोऽयं स्वरूपतः || ३।२३ ||

अशेषशेषद्रव्याणि लोके प्रादुश्चकार सः ।
यथा धाममणिर्धामन्यसद्धामन्युषाभरे || ३।२४ ||

एष पञ्चापि भूतानि प्रयतः समयोजयत् ।
सेनाङ्गानीव सेनानी रथाङ्गानीव वर्द्धकिः || ३।२५ ||

विनामुना जगत्सर्वं शून्यं चैतन्यशालिना ।
चक्षुषेव मुखं चन्द्रेणेव खं खलु दिद्युता || ३।२६ ||

भर्तुर्वियोगेदुःखानामनभिज्ञास्य चेतना ।
प्रियाऽभूद्विविधै रूपै रञ्जयन्ती हृदीश्वरम् || ३।२७ ||

संवित्तिरूपलब्धिश्च संविच्चिदपि चेतना ।
प्रज्ञात्मज्योतिरित्येते तस्या एकार्थवाचकाः || ३।२८ ||

तस्याः केवलसंवित्तिराद्यं रूपमकृत्रिमम् ।
अमृजोज्ज्वलमुद्दाममप्रपातिमनोहरम् || ३।२९ ||

नेदमासन्नमप्यस्या भूपो रूपमबुध्यत ।
सदा यदावृतोस्त्येष तद्ज्ञानावृत्तिकर्मणा || ३।३० ||

द्वैतीयीकं पुनस्तस्या रूपं बुद्धिरिति श्रुतम् ।
अनन्तगुणहीनं तत प्रभया मुख्यरूपतः || ३।३१ ||

यदधीते शृणोत्यत्ति याति जिघ्रति जल्पति ।
प्रादुश्छन्नं च तत्सर्वं तां साक्षीकृत्य भूपतिः || ३।३२ ||

चिदेषा पञ्चभिस्तीर्थ्यैः पौरुषीति प्रपञ्चिता ।
भौतीति वदताच्छेदं चार्वाकेणापि नापिता || ३।३३ ||

या जातु नात्यजत्कान्तमपि यान्तं भवान्तरे ।
ततस्तत्रैव विश्रान्ता सा सतीव्रततीव्रता || ३।३४ ||

बुद्धिर्बोधैकरूपापि द्वेधाभूत्सदसत्त्वतः ।
घनैकरूपा पृथ्वीव माधुर्यलवणत्वतः || ३।३५ ||

ते च सद्बुद्ध्यसद्बुद्धी राज्ञोऽभूतामुत्ते प्रिये ।
तरणित्विट्तमस्विन्याविवान्योन्यममर्षणे || ३।३६ ||

यदाद्यदयितादिष्टः सत्कर्म्मारभते नृपः ।
तदेतरान्तरापत्यान्तरायं तनुतेतराम् || ३।३७ ||

तयोर्दुर्बुद्धिभार्याभूद्भूभुजो वल्लभा भृशम् ।
प्रायो भवन्ति श्रीमन्तो नद्योघा इव निम्नगाः || ३।३८ ||

मा कार्षीत्सर्वसंहारं सुबुद्धेर्वश्य एष नः ।
इति दुर्बुद्धिसक्तं तं शशंसुः कर्मसेवकाः || ३।३९ ||

तत्रैव पुरिवास्तव्या कार्मणादिप्रयोगवित् ।
भोगपत्न्यभवत्तस्य नित्यं माया नितम्बिनी || ३।४० ||

माया कर्मपरिणतिः प्रकृतिर्वर्गणाष्टमी ।
आत्मदामनिका चैते शब्दाश्चैकार्थवाचकाः || ३।४१ ||

कृतकौतूहला शाठ्यबहुला वीचिचञ्चला ।
वनी विलासवल्लीनां श्यामा कामार्त्तिकारणम् ॥ ३१४२ ॥

सा सर्व्वकालं भूपालमाक्षिपल्ललितैस्तथा ।
यथा न क्षणमप्येष तां व्यधत्त स्वतः पृथक् ॥ ३१४३ ॥

स्वार्थनिष्ठा त्ववर्त्तिष्ट सा बुद्धि द्विविधामपि ।
एषा भूमिभुजोऽभीक्ष्णमङ्गस्थेत्यन्तरान्तरा ॥ ३१४४ ॥

यदा मिलति सद्बुद्धेस्तदा सा याति साधुताम् ।
यदा मिलति दुर्बुद्धेस्तदा प्राप्नोत्यसाधुताम् ॥ ३१४५ ॥

अचचेष्टदसौ सुस्था पुण्यकाञ्चनशृङ्खलैः ।
पातकायसहिंजीरैर्दयितं दुःस्थिता पुनः ॥ ३१४६ ॥

यदा संबध्यते पुण्यैस्तदाहंकुरुते नृपः ।
अहं महाकुलीनोहमिभ्योहं रूपवानिति ॥ ३१४७ ॥

यदा संबध्यते पापैर्दैन्ययालम्बते तदा ।
अहं हीनकुलः क्लीबो वियोगी रोगवानिति ॥ ३१४८ ॥

दर्शयन्ती घनं रागं हसन्ती केलिकारणम् ।
सा बबन्ध नृपं तेन तस्यां न क्रुध्यति स्म सः ॥ ३१४९ ॥

अनन्तदलिकैः पुण्यपापबन्धैः स कौतुकम् ।
नियन्त्रितोऽपि सर्वाङ्गमबुद्ध स्वं न भारितम् ॥ ३१५० ॥

तयासौ दृढबद्धोऽपि पवनाधिकरंहसा ।
आपातालतलात्सिद्धिशिलायाश्च व्यहार्यत ॥ ३१५१ ॥

नृपस्तथाप्यनुद्विग्नस्तामेवापुष्यदन्वहम् ।
वदन्ति तेन विद्वांसस्तस्याः कार्मणकारिताम् ॥ ३१५२ ॥

एषैव प्रायशः पत्युः प्रीतिविश्रामभूरिति ।
अन्यदापास्य सद्बुद्धिं भेजे दुर्बुद्धिमेव सा ॥ ३१५३ ॥

इयं मामनुवर्तिष्णुरिति सापि पुपोष ताम् ।
आसीच्चिरं तयोरेवं पोष्यपोषकता मिथः ॥ ३१५४ ॥

अथ मायाकृतोन्मांददुर्बुद्धिप्रेरितो नृपः ।
सुबुद्धिं तृणतां निन्ये साथ दूना व्यभावयत् ॥ ३१५५ ॥

बाह्यस्त्रियानयागत्य वरो वैरीकृतो मयि ।
परप्रवेशे वेश्मैति नाशमेषा मृषा न वाक् ॥ ३१५६ ॥

येयं मन स्वसा दुष्टा साऽनयैव व्यधीयत ।
एतां विना बलं नास्या दुरापा हेयमेव मे ॥ ३१५७ ॥

द्वयोः कुयोषितोः पाशे पतिः पतित एष मे ।
हहा महापदः प्राप्ता विज्ञापि करवाणि किम् ? ॥ ३१५८ ॥

स्त्री स्त्रीणां चरितं वेत्ति न नरः सरलाशयः ।
चेल्लप्स्येऽवसरं सर्वं ज्ञापयिष्यामि नायकम् ॥ ३१५९ ॥

नवे ज्वरे वक्ति न भेषजं भिषग्, नवं प्लवं क्रामति नैव तारकः ।
नवं कलिं ज्ञोऽपि न वा रुरुत्सते, सतां हि सूतेऽवसरज्ञता यशः ३१६०

माया सुतमसूताथ मोहं नाम महाबलम् ।
यो योधान् जातमात्रोऽपि गणयामास दासवत् ॥ ३१६१ ॥

मोहो लोकप्रवाहश्च छाद्मस्थ्यं गहनाशयः ।
अनुस्त्रोतोगतिश्चेति शब्दास्तस्याभिधायकाः ॥ ३१६२ ॥

माया सुतं जगति मोहमसूत मोहस्तां वेति निश्चयनयः सुधियां प्रमाणम् ।
पर्वेक्षुबीजसहकारबलाकिकाण्डन्यायादिहोदितमिदं व्यवहारवृत्त्या३१६३

दुर्बुद्धेरपि मोहोऽभूत्स्वैर्गुणैरतिवल्लभः ।
अहो सवयसां स्नेहः संक्रामति सुतेष्वपि ॥ ३१६४ ॥

ते द्वे अपि प्रयत्नेन तमवीवृधतान्तमाम् ।
अस्या एवाङ्गभूरेष इत्यज्ञातं बुधैरपि ॥ ३१६५ ॥

प्रकृत्या मलिनो मोहः कृतद्रोहः पितर्यपि ।
वज्रसारवपुर्लोके दधौ निर्हेतुवैरिताम् ॥ ३।६६ ॥

वध्वोर्वल्लभ इत्यासीदसौ पितुरपि प्रियः ।
नित्यमङ्कगतं यत्नात्पोषयामास तं स तत् ॥ ३।६७ ॥

पामातुरेण कण्डूया विकार इव वर्धितः ।
दारुणोऽपि परिणामे मेने तेन सुखाय सः ॥ ३।६८ ॥

मायायामनुषक्तस्य सदप्यैश्वर्यमात्मनः ।
अभूदसदिव द्यूतक्रीडायां श्रीपतेरिव ॥ ३।६९ ॥

सोऽह्नींदुरिव शोच्योऽभूत् सतां भ्रष्टः स्वेतजसा ।
कं कं न कुरुतेऽनर्थं नारी निर्लक्षणादृता ॥ ३।७० ॥

स रीढः सन्मतौ सम्यक् स्वरूपं स्वमचिन्तयन् ।
स चचार ग्रहिलवन्निर्विचारमितस्ततः ॥ ३।७१ ॥

मूढो मन्दोऽलसा मूकः पङ्गुरन्धस्तयैडकः ।
इत्याद्यसद्गिरामेष जनितो भाजनं जनैः ॥ ३।७२ ॥

कोहं किमर्थं यास्यामि कुत आगां क्व वा गमी ।
इति धीर्जातु पस्पर्श वाडवीवान्त्यजं न तम् ॥ ३।७३ ॥

शिलोच्चयः शिला धूलिर्वारि वन्हिर्मरुत्तरुः ।
एवमेकेन्द्रियभवान् सोऽनन्तान् भ्रमितस्तया ॥ ३।७४ ॥

कृमिः कपर्दकः कुन्थुः कीटिका चर्बणा द्रुणः ।
इत्यादि विकलाक्षेषु सोऽचरत्तद्वशो भृशम् ॥ ३।७५ ॥

खरश्च मीनमण्डूकश्येनिकाकाहिगोधिकाः ।
चिरं सेद्दक्षपंचाक्षतिर्यक्षु तमबिभ्रमत् ॥ ३।७६ ॥

स जगाम तदादेशादवशो नरकेष्वपि ।
वात्याविवर्ततः पत्रं पतत्यम्भःपतावपि ॥ ३।७७ ॥

यत्र तत्र यतस्तस्य साभवत्पारिपार्श्विकी ।
कदापि सन्मतिर्लब्धावकाशा मा स्म भूदिति ॥ ३।७८ ॥

आसीदन्त्यां चिरप्रेम्णा सुबुद्धावन्तरान्तरा ।
नृपो विवेद निर्वेदकरीं मायादुरात्मताम् ॥ ३।७९ ॥

विद्वानपि दुराचारां तां मोक्तुं नाशकन्नृपः ।
प्लावितः सिन्धुपूरेण कः क्षमस्तद्विमोचने ॥ ३।८० ॥

भवेषु भूरिषु भ्रामं भ्रामं भूपोऽथ पान्थवत् ।
जातश्रम इवान्येद्युः पुरं शिश्राय मानवम् ॥ ३।८१ ॥

पुरं प्रविशता तेन कर्म्मयोगान्मनोऽर्भकः ।
सहसैत्यानुषक्तः सन् शकुनं बह्वमन्यत ॥ ३।८२ ॥

इन्द्रियोपात्तभावानामात्मनि व्यक्तिकारणम् ।
आशुसञ्चारि संकल्पकारि पौद्गलिकं मनः ॥ ३।८३ ॥

तन्वा तनुर्बहुद्रव्योऽनलसश्च महाबलः ।
प्रधानं भविता मेऽसाबिति तं स्वीचकार सः ॥ ३।८४ ॥

स्ववीर्येणाहृतैर्लोकवर्त्यौदारिकपुद्गलैः ।
तदारेभे पुरं प्रौढिं परां नेतुं नरेश्वरः ॥ ३।८५ ॥

प्राणादिकमरुत्कुटकौटुम्बिककरम्बितम् ।
नानाव्यापारपारीणेन्द्रियपञ्चकुलाकुलम् ॥ ३।८६ ॥

अजस्रवहमानेडापिङ्गलाराजवर्त्मकम् ।
कतिचित्कृतिविज्ञातसुषुम्णामार्गसञ्चरम् ॥ ३।८७ ॥

अनुलोमलतालेखनाभिकुण्डोपपण्डितम् ।
नवद्वारं बहुक्लेशरक्षाजाग्रद्भुजार्गलम् ॥ ३।८८ ॥

चलच्चूलाध्वजं सप्तधातुपाटकपाटवम् ।
तत्तद्वस्तूपभोगार्हं काले स्फार्तिं दधौ पुरम् ॥ ३।८९ ॥

सम्भाव्यमानं भूभर्त्रा पर्याप्तमभवन्मनः ।
क्रमात्तारुण्यमानं च चञ्चच्चञ्चलतास्पदम् ॥ ३।९० ॥

मायावश्यो नृपो नैष्ट पुरं स्वमपि रक्षितुम् ।
निरोजाभरुजायेत रुजार्त्तो गजवैर्यपि ॥ ३।९१ ॥

दयितस्य दशां दृष्ट्वा तामखिद्यत सन्मतिः ।
अहारि हा रिपूभूय मायया स्वामिनो बलम् ॥ ३।९२ ॥

मायां वीक्ष्यान्यदा प्रीतिकलहाद्विमुखीं मनाक् ।
ऊचे सद्बुद्धिरेकान्ते कान्तमेकान्तवत्सला ॥ ३।९३ ॥

विद्वन्नाद्रियते पापवनिताव्यसनं किमु ।
उच्चावतंस ! नीचस्त्रीसंस्तवस्तव नोचितः ॥ ३।९४ ॥

विपश्चित्कश्चिदस्यां हि दुष्टायां नानुरज्यति ।
त्वयात्र रज्यता स्वामिन्नसतां स्वं वतंसितम् ॥ ३।९५ ॥

प्राचीं विहाय विशदोदयदायिनीं यत्,
त्वं पश्चिमां व्रजसि भास्कर ! साधुनिन्द्याम् ।
यत्तत्फलं तव भवत्यलमेतदुक्त्वा,
क्षारं क्षते क्षिपति कः सुकृती परस्य ॥ ३।९६ ॥

तृष्णार्तेनापि कार्यैव योग्यायोग्यविचारणा ।
पयः पिबति कस्तृष्णगपि श्वपचकूपके ॥ ३।९७ ॥

दुर्वृत्तासौ मुमुक्षूणामपि बन्धनिबन्धनम् ।
निर्निमित्तरिपुः सज्जा तरज्जननिमज्जने ॥ ३।९८ ॥

अजीजनस्त्वं समवीवृधस्त्वमिमां स्वपत्नीमकृथास्त्वमेव ।
अद्य त्वयेदृक् चरितेन सोर्जं, गर्जन्तु चार्वाकमताश्रिता ये॥ ३।९९ ॥

पोषिता भवता तत्रैवैषा द्वेषानुषङ्गिणी ।
साधर्म्यहर्म्यतां नेया कथं सरलया मया ॥ ३।१०० ॥

मधुबिन्दूपमं दत्वा सुखं वैषयिकं शठा ।
हठान्नरककूपे त्वामेषा क्षिपति वेत्सि न ॥ ३।१०१ ॥

दुष्टवध्वानया बद्ध्वा पुमन्नमविक्रम ! ।
भ्राम्यसे त्रिषु लोकेषु किं तेनापि न लज्जसे ॥ ३।१०२ ॥

पुष्णासि त्वमिमां यत्नाद्बध्नाति त्वामसौ पुनः ।
अस्यामुपचिकीर्षा ते पयःपानं भुजङ्गमे ॥ ३।१०३ ॥

व्यालीव वह्निज्वालेव विषवल्लीय बद्धिता ।
विधत्ते वर्धकस्यासौ दुर्विधा विविधा व्यथाः ॥ ३।१०४ ॥

सरोवरादयं दावः सुधाकुण्डादिदं विषम् ।
रवेरिदं तमश्चन्द्रादिदमङ्गारवर्षणम् ॥ ३।१०५ ॥

पायोनायादयं पांशुराशिः पथ्यादियं रुजा ।
परब्रह्मस्वरूपात्त्वद्यदयं कर्मविप्लवः ॥ ३।१०६ ॥

आसंसारमियं लग्ना स्वैरिणी वैरिणीव ते ।
संधत्तेऽनर्थकोटीस्त्वं न वेत्स्यनुभवन्नपि ॥ ३।१०७ ॥

अस्याः संभाव्यतेऽवश्यं वश्यकर्म्मणि कौशलम् ।
दुष्टामपि हितामेतामन्यथा मन्यथाः कथम् ॥ ३।१०८ ॥

मृणालजीवा नीवारभोजनं वालुकागृहम् ।
खलागूरसतीस्नेहश्चैते स्थैर्यविनाकृताः ॥ ३।१०९ ॥

प्रलोभ्य मधुरालापैरादौ प्रान्ते विडम्बिताः ।
गुणिनोपि न गाणिक्यमहत्तर्येव केऽनया ॥ ३।११० ॥

क्व तद्बलं ते भुवनावनक्षगं क्व तत्प्रभुत्वं हरिणापि दुर्लभम् ।
क्व ताः प्रयत्नोपचिता गुणश्रियोऽखिलं हतं विध्ध्यनयैव पापया

अदारुरटवी स्रोतो निर्जलं रुगनामिका ।
तापोऽनग्निरलोहारा निर्हिञ्जीरं च बन्धनम् ॥ ३।११२ ॥

अपांशुवृष्ट्यावरणं मदस्थानमनासवम् ।
अरात्रिकं तमो रज्जुं विना पाशो नितम्बिनी ॥ ३।११३ ॥

अन्यापि महिला स्नेहग्रहिलैरादृता भृशम् ।
द्वौ लोकौ लुपन्ती दृष्टा सुमते ! किमुतेदृशी ॥ ३।११४ ॥

अस्या भयेन तिष्ठामि प्रायेण न तवान्तिके ।
तिष्ठामि च तदाच्छायामात्रेण न पुनः स्फुटम् ॥ ३।११५ ॥

अस्या यस्तनयो मोहः स खलु द्रोहणस्तव ।
न जाने नाथ ! केनापि गुणेनात्रानुरज्यसे ॥ ३।११६ ॥

अवष्टब्धाऽनया येयं दुर्बुद्धिर्नाम कामिनी ।
स्वीकर्तुमुचिता सापि न ते निर्मल ! कश्मला ॥ ३।११७ ॥

अधुनापि धुनीह्येतां वधूव्याजेन वैरिणीम् ।
राहुमुक्त इवेन्दुस्त्वं लप्स्यसे तत्पुनर्महः ॥ ३।११८ ॥

इमाः क्षमापतौ शिक्षागिरो दयितयोदिताः ।
आससादापद्भीत्येव क्षणार्धमपि न स्थिताः ॥ ३।११९ ॥

मायां मदोत्कटे राज्ञि स्वीकुर्व्वति तमस्विनीम् ।
मृणालिनीव सद्बुद्धिरभून्म्लानमुखाम्बुजा ॥ ३।१२० ॥

पुरुषा परुषा वाचि निर्दया हृदये पुनः ।
विकुप्यन्तोऽनुरुध्यन्ते न प्रेम्णा संस्तवेन वा ॥ ३।१२१ ॥

नार्यो हि मृद्व्यः पुरुषा भवन्ति प्रायेण रुक्षा हृदि नेति मिथ्या ।
नद्योऽम्बुधेः स्वादुजलं ददन्ते क्षारं क्षिपत्यम्बु मुखे स तासाम्३।१२२

भिनत्ति यदि मर्यादामीदृशोऽपि महामनाः ।
दुरुल्लङ्घ्यानघाचारैरपि तद्भवितव्यता ॥ ३।१२३ ॥

इति ध्यात्वा तिरोधत्त सा सपत्न्यभिशङ्कया ।
उपप्लुतालयत्यागस्तस्या मुख्यं हि लक्षणम् ॥ ३।१२४ ॥

तस्या अदर्शने माया प्रत्युतोन्मादमादधे ।
द्युपतिद्युतिदूरत्वे किं न दृप्यति यामिनी ॥ ३।१२५ ॥

साथ नाथं निराशङ्का सर्वाङ्गं परिषस्वजे ।
तथा यथानयोर्भेदो नाभूत् क्षीराम्बुनोरिव ॥ ३।१२६ ॥

तत्परस्तत्परीरम्भसुखोन्मेषाय भूपतिः ।
प्रावर्त्ततानिशं तस्या एव रागविवृद्धये ॥ ३।१२७ ॥

एषा प्रियतमा राज्ञ इति निश्चित्य निर्भरम् ।
मनोऽप्युपाचरन्मायामेव मुख्यं मनीषिणाम् ॥ ३।१२८ ॥

तुष्टिः पुष्टिर्बलं तेजस्तस्या उज्जृम्भते यथा ।
नित्यं मुक्त्वा परं कृत्यमचेष्टत तथा मनः ॥ ३।१२९ ॥

सापि तस्यातिभक्तस्य श्रियं कामप्यदित्सत ।
भक्तेषु बद्धमुष्टिर्यः स हि सेवां किमर्हति ॥ ३।१३० ॥

नृपश्चक्रे मनोऽमात्यं मायया प्रेरितस्ततः ।
प्रेयस्याः पाक्षिकाः प्रायः प्राप्यन्ते प्रौढिमीश्वरैः ॥ ३।१३१ ॥

मनः कामाकुलं काले दारस्वीकारमैहत ।
ध्वनिमात्रेण तत्क्लीबं न पुनः परमार्यतः ॥ ३।१३२ ॥

सदा सन्निहिता भर्तुर्दुर्बुद्धिर्निजनन्दिनीम् ।
लोलां लोलेन मनसा प्रवृत्तिं पर्यणाययत् ॥ ३।१३३ ॥

प्रवृत्तिः स्नेहबाहुल्यमूहे मोहे निरन्तरम् ।
यस्मान्मायाकुबुद्धिभ्यां सह भिन्नमना न सा ॥ ३।१३४ ॥

तत्रान्यदागता दध्यौ तास्तिस्रो वीक्ष्य सन्मतिः ।
सदृग्गुणो गणोऽयं हि भूपस्यापूर्वभाक्तिकः ॥ ३।१३५ ॥

नृपं निकन्दितुं क्रौर्यमाधुर्यो मिलिता इमाः ।
तिस्रोऽपि भरणीभद्रायोगिन्य इव कालतः ॥ ३।१३६ ॥

राजा तु जातु मच्छिक्षामनात्मज्ञः शृणोति न ।
वीक्षतेऽक्षीणमेव स्वमाभिः कार्मणितो यथा ॥ ३।१३७ ॥

योऽधिकारं मनोमन्त्री सम्प्रति प्रतिपद्यते ।
तस्यापि चालितस्याभिर्न वीक्षे स्थैर्यमायतौ ॥ ३।१३८ ॥

किं कुर्वे किं ब्रुवे जातं गृहसूत्रं यदीदृशम् ।
दत्ते रहस्यवार्तेयं चिन्त्यमानापि मे ह्रियम् ॥ ३।१३९ ॥

ततो यदि महामात्यं निवृत्तिं स्वां तनूद्भवाम् ।
उद्वाहये कदापि स्यात्तस्याः कश्चित्तनूरुहः ॥ ३।१४० ॥

स स्वं मातामहं क्लेशमग्नमुद्धर्तुमीशिता ।
स एव प्रसरं रोद्धुमेतासां प्रभविष्यति ॥ ३।१४१ ॥

ध्यात्वेति नेतुरिष्टोसि त्वमित्यालाप्य मन्त्रिणम् ।
निवृत्त्या निजनन्दिन्या सद्बुद्धिरुदवाहयत् ॥ ३।१४२ ॥

ते भिन्नप्रकृती पूर्वापश्चिमे इव भास्करम् ।
उपासामासतुर्वारक्रमेण द्वे अपि प्रियम् ॥ ३।१४३ ॥

आद्या तमनुदत्कर्मस्वन्या व्यरमयत्पुनः ।
पण्याजीवः प्रभातास्तसन्ध्ययोरिव ही तयोः ॥ ३।१४४ ॥

प्रवृत्त्यासञ्जि दुर्बुद्धेर्निवृत्यासञ्जि सन्मतेः ।
काकाक्षिगोलकन्यायं ताभ्यां प्रेयानशिक्ष्यत ॥ ३।१४५ ॥

दुर्बुद्ध्याकारि मायायाः सद्भक्तिं सापि दाम्भिकी ।
मोहेन सह सौहार्दं ग्राहयित्वा तमब्रवीत् ॥ ३।१४६ ॥

भाग्यवानसि यत्पत्नीं प्रवृत्तिं प्राप्तवानसि ।
वल्लभा दुर्लभा प्रायोऽनुगुणा गुणिनामपि ॥ ३।१४७ ॥

सविलासा सलावण्याऽखिन्ना कृच्छ्रेऽपि कर्मणि ।
प्रवृत्तेः सदृशी नारी न क्षितावीक्षिता मया ॥ ३।१४८ ॥

येयं सुबुद्धिभूः कन्या परिणीता त्वयानघ ! ।
प्रकृत्या सालसा कर्महीना विश्वविलक्षणा ॥ ३१४९ ॥

आदरोऽनुचितस्तस्यां तव यूनस्तरस्विनः ।
कः स्नेहश्चक्रमण्डल्यां भूनारक्षमभोगिनः ॥ ३१५० ॥

प्राप्तोसि सर्वमुद्रां त्वं भव स्वजनरञ्जनः ।
ज्ञेयो महत्वभङ्गायाभिष्वङ्गोऽसदृशे जने ॥ ३१५१ ॥

राजबीजमयं मोहो मया जातस्तवार्प्यते ।
त्वया च तव पत्न्या च प्रौढिं नेयः कृशोप्यसौ ॥ ३१५२ ॥

एवं तयानुशिष्टः स प्रवृत्तावस्निहद् भृशम् ।
निवृत्तिमपि नव्योढां भजति स्मान्तरान्तरा ॥ ३१५३ ॥

विचक्षणो विवेकाख्यो निवृत्तेरङ्गभूरभूत् ।
यो विभुः सर्वभावानां सदसत्त्वविभावने ॥ ३१५४ ॥

ऊचुस्तज्जन्मना दूना मायादुर्द्धीप्रवृत्तयः ।
विषाङ्कुरोयमस्माकमुच्छेदाय समुत्थितः ॥ ३१५५ ॥

यथा तथा मिलन्नेष रक्ष्यो राज्ञश्च मन्त्रिणः ।
मात्रासत्ता विधत्तास्य सर्वा निर्वासनोद्यमम् ॥ ३१५६ ॥

वन्दतीषु समस्तासु तास्वेवं सन्मतिः प्रियम् ।
विवेकात्परमैश्वर्यं त्वं प्राप्तासीत्यबोधयत् ॥ ३१५७ ॥

ततो राजा विवेकं तं सौम्यं सर्वाङ्गसुन्दरम् ।
बालं लालयितुं क्रोडीकृत्य नित्यं समैहत ॥ ३१५८ ॥

परं न तिसृणां तासां वामानां वशवर्त्यसौ ।
चिरं निरीक्षणेप्यस्य प्राभूत्किमुत लालने ॥ ३१५९ ॥

तौ मिथोऽसहनौ मोहविवेकौ भूभुजः पुरः ।
ऐधिषातां वने क्रूरतरौ श्येनशुकाविव ॥ ३१६० ॥

ततश्चपलचेष्टाभिः प्रवृत्तिः प्रीणती प्रियम् ।
मायायाश्च जनन्याश्च जनयामास कौतुकम् ॥ ३।१६१ ॥

शान्तगम्भीरवृत्त्याथ निवृत्तिर्धिन्वती धवम् ।
तस्यापि भूभुजश्चापि महासौख्यमवर्द्धयत् ॥ ३।१६२ ।

एतया सुखितावेतौ विरज्येतां स्म मावयोः ।
ध्यात्वेति मायादुर्बुद्धी प्रवृत्तिं प्रोचतू रहः ॥ ३।१६३ ॥

वत्से ! सेवाव्यवच्छेदो न कार्यः प्रेयसस्त्वया ।
तत्तदारम्भसम्बन्धैराक्षेप्योऽसावनारतम् ॥ ३।१६४ ॥

रक्षणीयोऽवकाशोऽस्या निवृत्तेरेकतानया ।
अस्यां परमवैरिण्यां न गण्यो वारकात्ययः ॥ ३।१६५ ॥

तयोः शिक्षामिति प्राप्य पापा सा सर्वकर्मवित् ।
संकल्पतल्पगीकृत्य नित्यं नाथमुपाचरत् ॥ ३।१६६ ॥

मा निवृत्त्यैष संगंस्त क्वचिदासाद्य विश्रमम् ।
उपर्युपरि कृत्येषु साऽतः प्रावीवृतत्प्रियम् ॥ ३।१६७ ॥

जन्तुघाते मृषावाचि परद्रव्ये परस्त्रियाम् ।
मद्ये मांसे च पापर्द्धौ पैशुन्ये द्रोहकर्म्मसु ॥ ३।१६८ ॥

महारम्भेषु च तथा तया भर्ता प्रवर्तितः ।
यथा दृशापि नास्प्राक्षीन्निवृत्तिं दुर्भगामिव ॥ ३।१६९ ॥

उक्षेव तिलयन्त्रस्य सोऽन्वहं भ्रामितस्तया ।
क्वाप्यनुपदिकव्याधमृगवन्नाप विश्रमम् ॥ ३।१७० ॥

सोप्यजानन्नृपोऽराङ्क्षीज्जानन्नूनं विरङ्क्ष्यति ।
भवन्ति यदि वा लोके श्रीमन्तोऽस्थिरसौहृदाः ॥ ३।१७१ ॥

परमस्मान्महामात्यात् संपदो मे पदे पदे ।
इति माया दधौ प्रीतिमधिकामधिकारिणि ॥ ३।१७२ ॥

सावष्टम्भेत्र पूर्यन्ते नर्मकौतुककेलयः ।
मन्त्र्यपीति नृपे वैरं वहन्मायामुपाचरत् ॥ ३१७३ ॥

वात्याविष्ट इवार्चिष्मान् पीतमद्य इव द्विपः ।
व्याधवश्य इव श्येनः सम्पदा इय पन्नगः ॥ ३१७४ ॥

कुपथ्याप्त इव व्याधिर्विषलिप्त इवाशुगः ।
मिलितो माययात्यन्तममात्योऽजनि दुःसहः ॥ ३१७५ ॥

न ग्लायति स्थले गच्छन्न मज्जति जले व्रजन् ।
न श्वसित्यद्रिमारोहन्न ज्वलत्यनले भ्रमन् ॥ ३१७६ ॥

क्षणादलक्षसञ्चारश्चरन् विश्वं चराचरम् ।
जातु नोद्विज्यते सिद्धविद्यवत्स दिवानिशम् ॥ ३१७७ ॥

न रज्जुपाशहिञ्जीरैरपि तस्य नियन्त्रणा ।
पुरतस्तरसत्वस्य न बली स बलीमुखः ॥ ३१७८ ॥

रामा धामाभिरामाश्चेद्ढौक्यन्ते धनराशयः ।
तैरप्यद्भिरिवौर्वाग्नेस्तृष्णा तस्य न शाम्यति ॥ ३१७९ ॥

न स मन्त्रो न तन्मूलं न मणिर्न च कार्मणम् ।
येन प्रसत्तिरानेतुं शक्या तस्य विकारिणः ॥ ३१८० ॥

येन केनाप्युपायेन वशीचक्रे विशांपतिः ।
पुनर्यत्तच्छलं प्राप्य प्रेतवत्प्रचुकोप सः ॥ ३१८१ ॥

यतो लब्धाधिकारोऽथ राज्ञस्तस्यैव सोऽद्रुहत् ।
काष्ठेन दीपितः काष्ठस्यैव कष्टकरोऽनलः ॥ ३१८२ ॥

मन्त्रिणा माययामन्त्र्य पापपाशैर्महत्तमैः ।
सविशेषं नृपोऽबन्धि निबद्धोऽपि तया पुरा ॥ ३१८३ ॥

ताभ्यां नीतः प्रसारिभ्यां मलिनाभ्यां महस्व्यपि ।
सोऽकिञ्चित्करतां धूमधूमरीभ्यामिवार्यमा ॥ ३१८४ ॥

मन्त्री स्वेनैव सर्वस्वं ददत्यपि हरत्यपि ।
स्वेनैव वितनोत्येष बन्धमोक्षौ शरीरिणाम् ॥ ३।१८५ ॥

वर्षकोटिकृताकूटतपःकूटकृशाङ्गकाः ।
प्रापिताः प्राणिनोऽनेन सप्तमं नरकं बलात् ॥ ३।१८६ ॥

भूयिष्टदिष्टनिर्विष्टभोगपुष्टाङ्गयष्टयः ।
सर्वार्थसिद्धिं सिद्धिं वा निन्यिरेऽनेन केचन ॥ ३।१८७ ॥

तपोजपदयादानादीन् गौणीकृत्य सद्गुणान् ।
जन्तूनां फलकाले स स्वस्य प्रामाण्यमैहत ॥ ३।१८८ ॥

मायया मोहितस्यास्य तस्याः पुत्रोऽभवत्प्रियः ।
उपेक्षितोप्यहोऽप्राणीद्विवेको वन्यवृक्षवत् ॥ ३।१८९ ॥

विवेकं वीक्ष्य सौम्यास्यं पुरः क्रीडन्तमन्यदा ।
एकाग्रस्तत्प्रसूं विद्यां विस्मृतामिव सोऽस्मरत् ॥ ३।१९० ॥

स्मृता प्रादुरभूदेषाऽन्यवेषा स्वर्वधूरिव ।
तद्दर्शनामृतैर्मन्त्री क्षणं व्यग्रोपि निर्ववौ ॥ ३।१९१ ॥

तया सहागतां पूर्वपत्नीं राजाऽस्पृशद्दृशा ।
कुतोऽस्य दृढबन्धस्य शक्तिस्तत्परिरम्भणे ॥ ३।१९२ ॥

प्राक्तनीमनपस्मारः स सस्मार यथा यथा ।
तस्याः शिक्षां हतानन्दः स्वं निनिन्द तथा तथा ॥ ३।१९३ ॥

विललाप च गौराङ्गि ! गौरव्ये ! गुणशालिनि ! ।
गङ्गाजलोज्ज्वले ! मह्यं सुबुद्धे ! देहि दर्शनम् ॥ ३।१९४ ॥

त्वामपास्य मया मायां स्वीकृत्य स्वं विडम्बितम् ।
त्यक्त्वा चिन्तामणिं काचग्राही किं क्वापि नन्दति ॥ ३।१९५ ॥

त्वयि सत्यां त्रिलोकस्याधिपत्यं मे न दुर्घटम् ।
अनार्यैरपि कार्ये त्वां विनाऽहं कर्म्मवेशमसु ॥ ३।१९६ ॥

इलापतिविलासित्वं सत्यां सत्याप्यते त्वयि ।
बन्धनान्यनुभूयन्ते चौरवत्त्वां विना पुनः ॥ ३।१९७ ॥

स्वाम्यदास्ये भुविश्वभ्रे वृद्धिहानी सुखासुखे ।
एतल्लीलायितं सर्वं त्वत्प्रसादाप्रसादयोः ॥ ३।१९८ ॥

क्वचिद् रुद्धः क्वचिद्बद्धः क्वचिच्छन्नः क्वचिद्धतः ।
क्वचित् द्विष्टः क्वचित्पुष्टो वियोगे तव वल्लभे ! ॥ ३।१९९ ॥

क्वचित्प्रेष्यः परान्नश्च क्वचित् क्वचन किङ्करः ।
क्वचिद्वैवधिकः सूदः क्वचिज्जातस्त्वया विना ॥ ३।२०० ॥

त्वया हितोक्त्या सद्योषोचितमाचरितं मयि ।
अहं पङ्क्तौ निविष्टोस्मि दुःपुंसां त्वत्पराङ्मुखः ॥ ३।२०१ ॥

निवृत्तेर्मन्त्र्यहं ते तु विवेकश्च द्वयोरपि ।
मिलन्तो वारिता हन्त मूलान्मलिनयानया ॥ ३।२०२ ॥

विश्लेषमावयोः कृत्वा ही माया किमसाधयत् ।
आलोकवैरिणी रात्रिरब्जिनीसूर्ययोरिव ॥ ३।२०३ ॥

उच्चाद्भ्रंशो भृशं दुःखदायी स्यादिति मन्त्र्यपि ।
स्वर्गसौधाग्रमारोप्य मां पुनर्नरकेऽक्षिपत् ॥ ३।२०४ ॥

क्षणं लुब्धः क्षणं तुष्टः क्षणं रुष्टः क्षणं शमी ।
इत्यात्मनोऽमुना सोऽहं क्रीडापात्री कृतः प्रिये ॥ ३।२०५ ॥

सर्वो जनः स्वस्य सुखाभिलाषी, न कोऽपि दुःखस्य दधाति तृष्णाम् ।
अहं तु हन्त स्वहितं विधातुं, मायामनोभ्यां विवशो न शक्तः ३।२०६

उपेक्षते हि नापन्नमितरोपि सचेतनः ।
ईदृग्दशं कृशं किं मां सकृपे ! त्वमुपेक्षसे ॥ ३।२०७ ॥

शीतार्त्ता रविरश्मिमब्धिपतिता नावं गताक्षा दृशं,
दिग्मूढाः सरणिं श्रियं गतधना ध्वान्ताकुला दीपिकाम् ।

अभ्यान्ताः पटुतामिव प्रियतमे त्वां द्रष्टुमुत्का वयं,
जाताः स्मः करुणोचिताः कुरु कृपां स्वं दर्शनं देहि नः ॥ ३।२०८ ॥

वर्णिनी सैव वर्ण्या योपकरोत्यापदि प्रियम् ।
चन्द्रं चण्डाशुना म्लानं निशैत्योल्लासयेन्न किम् ॥ ३।२०९ ॥

ततः प्रसीद सीदन्तं मामापदि समुद्धर ।
सन्महेलावहेलायाः प्राप्तमेतावता फलम् ॥ ३।२१० ॥

स्मारं स्मारं गुणानेवं तस्याः क्ष्मापेऽनुतापिनि ।
मन्त्राकृष्टेव दुर्बुद्धिः कुतोपि सहसाऽपतत् ॥ ३।२११ ॥

तद्भिया मङ्क्षु नष्टायां सद्बुद्धौ सुतया सह ।
दुर्बुद्ध्याद्याः पुनस्तिस्रः सम्भूय व्यमृशन्मिथः ॥ ३।२१२ ॥

दैवाद्यद्यपि जाताः स्मोऽधुनाधीनधवा वयम् ।
तथापि दुर्बलाः स्त्रीत्वान्न हि विश्वसिमो हलाः ॥ ३।२१३ ॥

बद्धोपि भूपः सद्बुद्धिं ध्यायत्येवान्तरान्तरा ।
मन्त्री तु वार्यमाणोपि निवृत्तिं ही दिदृक्षते ॥ ३।२१४ ॥

निवृत्तिं ध्यास्यति यदा प्रवृत्त्योपप्लुतोऽसकौ ।
आहूता तत्त्वदृग्दूत्या तदा साविर्भविष्यति ॥ ३।२१५ ॥

तदेकयोगक्षेमायाः समेतायास्तया सह ।
सद्बुद्धेर्दर्शनाद्भूपस्तदाह्लादमवाप्स्यति ॥ ३।२१६ ॥

भूपः सुखार्थी भूयोपि सान्त्वयिष्यति मन्त्रिणम् ।
निवृत्तिं सोपि तज्जातमेव जानीत नः क्षयम् ॥ ३।२१७ ॥

तन्निवृत्तिनिरासाय व्यवसायो वितायताम् ।
व्यालीव्यपोहने भाव्यं नालसैः क्षेमलालसैः ॥ ३।२१८ ॥

तदा प्रवृत्तिराध्यातमदेत्यकृत सङ्गरम् ।
चेन्निवृत्तिमथेक्षेथे अत्र तद्द्रोहिकाऽस्मि वाम् ॥ ३।२१९ ॥

कायिक्याधिकरणिकी प्रद्वेषा परितापनी ।
प्राणिघातारम्भिकी च गृद्धिभूर्मायिकीत्यपि ॥ ३।२२० ॥

असंवृत्तिश्च मैथ्यात्वी दृष्टिः पृष्टिः प्रतीत्यभूः ।
जनापातभवानान्या नैसर्गी स्वात्महस्तिकी ॥ ३।२२१ ॥

विदारण्याऽऽज्ञापनीवाऽनाभोगाऽनवकाङ्क्षिणी ।
प्रयोगगणभूः प्रेमद्वेषजेर्यापथिक्यपि ॥ ३।२२२ ॥

सख्यः सन्त्येकचिता मे याः क्रियाः पञ्चविंशतिः ।
निवृत्तिव्रततिं च्छेत्तुं तास्वेकापि कुठारति ॥ ३।२२३ ॥

आसु विश्वासु विश्वासो निश्चिन्तो मेऽन्तिमां विना ।
सात्र नास्तीति निःशङ्कं वच्मि केयं ममाग्रतः ॥ ३।२२४ ॥

एषा निर्वासितप्राया पुरापि स्वप्रियान्मया ।
अथ प्रचारमेवास्या इहास्यामि महत्तराः ॥ ३।२२५ ॥

राज्यसूत्रं वितन्वत्या सविशेषं ततस्तया ।
पार्श्वं न पत्युरत्याजि क्षणमप्येकतानया ॥ ३।२२६ ॥

प्रणेयं प्रेष्यवत्प्रेक्ष्य प्रवृत्तिः प्रोचुषी प्रियम् ।
किञ्चित्संकुचितवेश ! वच्मि यद्यनुमन्यसे ॥ ३।२२७ ॥

निःशङ्कं वद मा भैषीरित्युक्ते तेन सा जगौ ।
निवृत्तिस्तव या नारी मयि साऽरीयतेऽनिशम् ॥ ३।२२८ ॥

एषा हि गोमुखव्याघ्री मां मारयितुमिच्छति ।
यदहं प्राणिमि प्राणनाथ ! तत्त्वत्प्रसादतः ॥ ३।२२९ ॥

तेजस्तवापि तनुतां नेतुमेषाध्यवस्यति ।
अस्या वश्यः क्रमं कामस्येकं चेत्तदिदं मृषा ॥ ३।२३० ॥

लसनं हसनं गानं स्नानं पानं तथाशनम् ।
यद्यूनां यौवने सारं तदेवास्यै न रोचते ॥ ३।२३१ ॥

माताप्यस्याः सदोषेति प्राक् पत्या परितत्यजे ।
तदपत्यं भवेदीदृग् यदि किं नाम दुर्घटम् ॥ ३।२३२ ॥

भर्त्रा न निर्भरं भक्ता त्वय्यसावन्तरान्तरा ।
त्वयाऽवहीलितं हंसमुषष्टभ्नाति यत्सदा ॥ ३।२३३ ॥

विवेकस्तनयोऽमुष्या मोहं मत्स्वामिनीसुतम् ।
जातिवैरीव वैरायमाणः प्राणं जिघांसति ॥ ३।२३४ ॥

बलिनानेन रुद्धस्य यद्यस्य स्यादुपद्रवः ।
तदा द्रक्ष्यसि जीवन्तीं न पुनः प्राणनाथ! माम् ॥ ३।२३५ ॥

प्रयोजनं जनाधीश ! मया चेदक्षताङ्गया ।
निर्व्वासय गृहाच्छल्यमिव तत्ससुतामिमाम् ॥ ३।२३६ ॥

फणिन्याशीविषा पुच्छान्तविषा वृश्चिकी पुनः ।
लूता लालाविषा एव सपत्नी सकलाविषम् ॥ ३।२३७ ॥

यत्तयाऽवादि तत्सर्वं मन्त्री निर्मितवांस्तथा ।
सतीनां दुर्दशां व्यक्तं वक्तुं न प्रभवो वयम् ॥ ३।२३८ ॥

स्त्रीणां वशंवदास्तत्किं पुमांसो यन्नकुर्वते ।
पश्य वात्येरितो वह्निर्दग्धुं प्रारभते पुरम् ॥ ३।२३९ ॥

राज्ञो निगडितस्यापि प्रसादैकवशंवदा ।
तदिच्छाशक्तिनुन्ना सा पन्थानं सुखमत्यगात् ॥ ३।२४० ॥

निवृत्तौ प्रोषितायां सा नृत्यति स्म निरन्तरम् ।
निःशल्यमधुना राज्यं जातमित्युल्लसन्मनाः ॥ ३।२४१ ॥

प्रचण्डपवनोद्भूतपताकाञ्चलचञ्चलः ।
स निवृत्तिं विना नित्यं तयाऽभ्रामि दिशो दिशि ॥ ३।२४२ ॥

दुर्बुद्ध्या प्रेरितो दध्यौ बह्वमंस्त च मायया ।
प्रवृत्त्या चोपचक्राम कर्तुं दुष्कर्म्म मन्त्रिराट् ॥ ३।२४३ ॥

व्यज्ञप्यत तया सोऽथ नाथ ! मोहो महाबलः ।
धूर्वहः स्पन्दनस्येव राज्यस्य धुरमर्हति ॥ ३।२४४ ॥

जातोऽयं माययाक्षिप्तः क्रोडे तव ममापि च ।
दत्तेऽस्य राज्ये स्वामिन्याः किञ्चिदानृण्यमाप्नुवः ॥ ३।२४५ ॥

सुबुद्धिः साम्प्रतं दूरे जातोऽकिञ्चित्करो नृपः ।
निवृत्तिः ससुता नष्टा क्वेदृशोऽवसरः पुनः ॥ ३।२४६ ॥

यदाकालवशाद्गन्ता प्राकट्यं कोऽपि कण्टकः ।
शोचिष्यावस्तदा ह्यावां स्वस्यानवसरज्ञताम् ॥ ३।२४७ ॥

अयं स्वयं गुणैस्तैस्तैर्भोक्ष्यते विभुतां भुवि ।
अस्यौद्धत्यं तवादाक्ष्यं वदिष्यति जनः पुनः ॥ ३।२४८ ॥

तन्नाथ मा विलम्बिष्ठा देहि मोहस्य वैभवम् ।
भृशमुत्कर्षदो भावी प्राप्तराज्योऽयमावयोः ॥ ३।२४९ ॥

तत्प्रेरितेन मोहस्य तेन राज्यमदीयत ।
यत्तत्प्रलापनिःस्वानध्वनिध्वनितदिग्गणम् ॥ ३।२५० ॥

आप्तराज्यस्य मोहस्य प्रतापेन प्रसर्प्पिणा ।
चण्डवातेन वल्लीव चकम्पे भुवनत्रयी ॥ ३।२५१ ॥

हुङ्कारमात्रसाध्येषु जगत्त्रयभटेष्वपि ।
प्रहर्तुमायुधं गृह्णन्नभजत्तद्भुजस्त्रपाम् ॥ ३।२५२ ॥

नामर्त्येषु न मर्त्येषु न तिर्यक्ष्वपि कोऽपि सः ।
पतन्तमिव वज्रं यस्तस्यादेशं व्यलङ्घत ॥ ३।२५३ ॥

स तन्मातुर्मान्यः स पितुरधिकारीव परमः,
स एवास्मै कृत्वा वपुरुपचयं राज्यमदित ।
ततोऽत्यन्तं ताताभ्यधिकबहुमानातिशयतः,
स्वतो दूरीचक्रे क्षणमपि न मोहेन सचिवः ॥ ३।२५४ ॥

## ॥ चतुर्थोऽधिकारः ॥

मोहोथ स्वगतं दध्यौ पुराणास्ते पुरीह या ।
अविद्या नाम तां सज्जीकृत्य स्थातुं ममौचिती ॥ ४।१ ॥

शम्भोर्मौलिरपांराशिर्नभश्चेति पदत्रयम् ।
चन्द्रो विलसति स्वैरं राज्ञां रीतिरियं यतः ॥ ४।२ ॥

धात्रीधनोपि चेन्नानास्थानसंसूत्रणालसः ।
सोऽतिशेते कथं शेषलोकमेकगृहाग्रहम् ॥ ४।३ ॥

इति निश्चित्य नीरन्ध्रनिवासां निर्म्ममे नवाम् ।
नगरीं नामतोऽविद्यां नृपतिर्नृपनीतिवित् ॥ ४।४ ॥

परिक्षिप्य स्थितोऽज्ञानप्राकारो यां समन्ततः ।
प्रावादुकमतानेककपिशीर्षोपशोभितः ॥ ४।५ ॥

प्रविशन्निःसरल्लोकशतसंमर्दसाक्षिणी ।
प्रतोलीतुलिता यत्र दृष्टा गतिचतुष्टयी ॥ ४।६ ॥

तृष्णा निष्णातबुद्धीनामनादेयरसोच्चया ।
प्रयाति खातिका यत्र सदसद्वस्तुवास्तुताम् ॥ ४।७ ॥

आरामा रमणीभोगाः शीतच्छायामनोरमाः ।
यत्र क्रीडाद्रयोऽशीलस्त्रीविलासाविसंकटाः ॥ ४।८ ॥

अभ्यस्यन्ति धनुर्वेदं स्मराद्या मोहसूनवः ।
यत्र तत्तत्र हृन्नेत्रजीवनं यौवनं वनम् ॥ ४।९ ॥

हिंसाग्रन्थाश्च कासारा द्विजपुञ्जपरिच्छदाः ।
हठवादमहापालिवारिताशेषविप्लवाः ॥ ४।१० ॥

क्रीडावाप्यः सुसंस्थाना यत्र स्त्रीतनुयष्टयः ।
स्तनकोकवलीवीचिवाणिपादाब्जशोभिताः ॥ ४।११ ॥

वश्या सच्चरितत्यागे प्रत्यवायावमर्शना ।
परचक्रकृतक्लेशशमनी पद्रदेवता ॥ ४१२ ॥

उल्लसद्रजसः पृथ्वो रथ्या भूरिभवभ्रमाः ।
यत्र सर्वात्मना मोहसैन्यसञ्चरणोचिताः ॥ ४१३ ॥

संवेशनासनाशीतिर्या चतुर्भिः समर्गला ।
एतस्यां विपणिश्रेणेः सा विश्राणयति श्रियम् ॥ ४१४ ॥

वसन्ति सततं येषु व्यासवत्सुप्रमोदिनः ।
प्राणिनस्ते परीणामा वामा यत्र महागृहाः ॥ ४१५ ॥

ये तामध्यासते लोकास्ते सर्वेप्युन्मदिष्णवः ।
सन्निपातादिवापानादिव भूतग्रहादिव ॥ ४१६ ॥

लाभे स्वल्पेपि संतुष्टास्ते गायन्ति हसन्ति च ।
नाशेत्यल्पेपि ते दूना आक्रन्दन्ति रुदन्ति च ॥ ४१७ ॥

केप्युत्कूर्दन्ति निर्दन्ति विवदन्ते वदन्ति च ।
परे स्तुवन्ति निन्दन्ति याचन्ते वाचयन्ति वा ॥ ४१८ ॥

केपि कुप्यन्ति गर्वन्ति पूत्कुर्वन्ति तथापरे ।
एवं जनरवस्तत्र कदाचिन्नोपशाम्यति ॥ ४१९ ॥

तस्यां कुवासनावासे मूर्खसंगतपर्षदि ।
अविस्रंसिमतिभ्रंशसिंहासननिषद्वरः ॥ ४२० ॥

कुसंस्कारधृतोदारासंयमातपवारणः ।
रत्यरत्याख्यवारस्त्रीप्रेर्यचापलचामरः ॥ ४२१ ॥

पाखण्डिभिः प्रतीहारैर्ढौक्यमानमहाजनः ।
प्राणिनः प्रीणयन् भक्तान् स्निग्धगम्भीरया दृशा ॥ ४२२ ॥

नानासंज्ञानटीक्लृप्तनृत्यविन्यस्तलोचनः ।
गीयमानगुणग्रामः कामिकश्रुतगायनैः ॥ ४२३ ॥

त्रयोदशक्रियास्थानवण्ठसंवाहितक्रमः ।
अलङ्कारोक्तिभङ्गीभिः कृतसर्वाङ्गमण्डनः ॥ ४१२४ ॥

निस्त्रिंशताखड्गलताविराजितभुजार्गलः ।
चार्वाकवालमित्रेण समं केलिकुतूहली ॥ ४१२५ ॥

श्रीमान्मोहनृपो राज्यमाज्यसिक्ताग्निदीप्तिभूः ।
अपालयदिलापालपालिपालितशासनः ॥ ४१२६ ॥

जडताऽजनि तारुण्यपुष्टाङ्गी तस्य वल्लभा ।
पतिव्रता पतिद्विष्टे या न पुंसि प्रसीदति ॥ ४१२७ ॥

तत्कुक्षिकन्दरक्रोडे केशरी मकरध्वजः ।
यः प्रतापांशुना विश्वं क्षोभयन् ज्येष्टतां ययौ ॥ ४१२८ ॥

प्रीत्यप्रीतिधनाप्त्याद्यास्तस्य पत्न्योऽपरा अपि ।
पत्युर्भाग्यान्मिथो नाभूद्यासां सापत्न्यमत्सरः ॥ ४१२९ ॥

रागद्वेषारम्भमुख्यास्तासां पुत्राः सहस्रशः ।
यदाज्ञां दधते मूर्ध्ना शक्रचक्रधरादयः ॥ ४१३० ॥

अभिध्यामारिचिन्ताद्यास्तस्य पुत्र्योऽप्यनेकशः ।
या भ्रातृभ्यो न हीयन्ते पौरुषेण रणाङ्गणे ॥ ४१३१ ॥

यौवराज्यधुरां तस्य विपर्यासः प्रपन्नवान् ।
सति यस्मिन्न राज्यस्य चिन्ता कापि महीपतेः ॥ ४१३२ ॥

सर्वकर्म्मसु मर्मज्ञो मिथ्यादृक्तस्य मन्त्रिभूत् ।
यन्मुद्रया त्रिलोकान्तर्भ्राम्यत्यस्खलितं जनः ॥ ४१३३ ॥

सामन्ता दुर्मनोयोगाः समन्तादनुवर्तिनः ।
विगृह्य ये स्वयं शत्रूंस्तन्वन्ति स्वामिनो यशः ॥ ४१३४ ॥

क्रोधमानदम्भलोभाभिधा माण्डलिकाः पुनः ।
एकैकस्यापि यस्योच्चैरविषह्यः पराक्रमः ॥ ४१३५ ॥

प्रमादस्तस्य सेनानीः सांयुगिनोऽरिसेनया ।
येनाधश्चक्रिरे शान्तमोहा अपि महाभटाः ॥ ४।३६ ॥

वेदाः कारणिकास्तस्य सर्वतृप्तिपरायणाः ।
लोकाः प्रायो न लुम्पति व्यवहारं यदुद्भवम् ॥ ४।३७ ॥

चण्डभावस्तलारक्षः परक्षोभकरो दृशा ।
व्याक्षेपो नगरश्रेष्ठी महाजनमनःप्रियः ॥ ४।३८ ॥

कोशाऽकुशलकर्म्माणि कोशाध्यक्षोऽस्य सञ्चयः ।
समस्तवस्तुस्तोमस्य साक्षी सङ्गश्च शौल्किकः ॥ ४।३९ ॥

पुरोधा विघ्नरोधाय सज्जः पाखण्डिसंस्तवः ।
गौरवाख्या गुप्तिपाला अस्पृशन्तः कृपालुताम् ॥ ४।४० ॥

शय्यापालस्तथाऽऽलस्यनामा तस्य प्रियङ्करः ।
अम्भोधिकारी शापाख्यः क्रूरधीः कुम्भसङ्ग्रही ॥ ४।४१ ॥

सूदाः कुकवयो नानारसोल्लासविशारदाः ।
मुखे जागरयन् रागं प्रेमालापः स्थगीधरः ॥ ४।४२ ॥

हर्षशोकौ मिथो मल्लौ युध्येते तस्य संसदि ।
अव्यवस्थं मिथः पातोत्पातकौतुककारिणौ ॥ ४।४३ ॥

मोहस्योपपदं दुष्टाध्यवसाया महाभटाः ।
आनयंत्यभितो भ्रान्त्वा जनान् परपथं यतः ॥ ४।४४ ॥

आत्मोत्कर्षपराक्षेपादयो ये मुख्यबन्धवः ।
तेऽमुमेवानुवर्तन्ते नभःस्वन्तमिवाम्बुदाः ॥ ४।४५ ॥

एवं मोहमहीपस्य शृण्वती प्राभवं नवम् ।
निवृत्तिः साङ्गजा जज्ञे जवना पवनादपि ॥ ४।४६ ॥

जङ्घालत्वेन दीर्घाध्वलङ्घनात्सा घनक्लमा ।
विशश्रमिषुरद्राक्षीत्पुरस्ताद्यज्ञवाटकम् ॥ ४।४७ ॥

मन्त्रपूतपयः सेकशीतलीभूतभूतलम् ।
संपाद्य पाद्यमानीयमानदेशान्तरर्त्विगम् ॥ ४।४८ ॥

अन्तः प्रतिष्ठिताध्वर्यस्तम्भसंयमितस्तभम् ।
यथार्हश्रुतिपाठाय साभिप्रायद्विजव्रजम् ॥ ४।४९ ॥

माषाज्यमुख्यहोतव्यद्रव्यभाजनराजितम् ।
उल्लण्ठबटुभिर्बाढं प्रार्थितालभनक्षणम् ॥ ४।५० ॥

वषट्कारमहामन्त्रोच्चारस्कोलाहलाकुलम् ।
नित्यसन्धुक्षितत्रेताधूमस्पर्शोल्लसज्जनम् ॥ ४।५१ ॥

तं प्रविश्याभितश्चक्षुः क्षिपन्ती द्वेषिशङ्कया ।
अभ्युक्ष्यमाणानालब्धुं द्विजैश्छागान् ददर्श सा ॥ ४।५२ ॥

कथं क्रयन्ति निर्मन्तून् जन्तूनेते समन्तुवत् ।
मात्स्यो न्यायः प्रवृत्तोऽत्र हा हा जगदराजकम् ॥ ४।५३ ॥

यदि वैदिकमन्त्राणां शक्तिरुद्घुष्यते द्विजैः ।
तद्व्यापारं विना हन्तुर्विमुञ्चन्तामसूनजाः ॥ ४।५४ ॥

यदि वैदिकमन्त्राणां शक्तिः प्रमाण्यमश्नुते ।
तत्तया मार्यमाणानामजानां मास्तु वेदना ॥ ४।५५ ॥

यदि वैदिकमन्त्राणां शक्तिरस्त्यतिशायिनी ।
तत्किं देवा न तर्प्यन्ते व्याघ्रैः शान्तीकृतैर्हुतैः ॥ ४।५६ ॥

छागानारटतः क्लीबदृशो व्यापाद्य निर्दयम् ।
धर्मं वन्दतो यज्वानः सौनिकानतिशेरते ॥ ४।५७ ॥

वेदमन्त्रैर्हुता यज्ञे यदि स्वर्यान्ति जन्तवः ।
इष्टैरिष्टद्युभिः पित्रादिभिस्तत्क्रियतां क्रतुः ॥ ४।५८ ॥

तन्मन्त्रैः परिणीतानां वैधव्यं वीक्ष्य योषिताम् ।
कथं नाम कृती वेद वेदस्याव्यभिचारिताम् ॥ ४।५९ ॥

यावद्रागादिरिक्तत्वं वक्तुः स्यान्न सुनिश्चितम् ।
न सत्यप्रत्ययं तावद्वेदवाक्येषु दध्महे ॥ ४।६० ॥

स तु वेदस्य वै दस्युरिव विश्वासनाशने ।
यो वक्त्यपौरुषेयत्वं विश्वासो ह्याप्तवक्तृभूः ॥ ४।६१ ॥

अपक्षनखदंष्ट्राङ्घ्रिबलान् छागान् क्रतौ घ्नता ।
याज्ञिकेनेत्यसत्यापि दैवं दुर्बलघातकम् ॥ ४।६२ ॥

यज्ञार्थं पशवः सृष्टा यदीति वदति स्मृतिः ।
तन्मांसमश्नतः स्मार्त्ता वारयन्ति न किं नृपान् ॥ ४।६३ ॥

विना पलं बलं नैषां स्यात्क्षोणीरक्षणक्षमम् ।
यदीत्याहुरवी तन्न बलं दुग्धैर्घृतैरपि ॥ ४।६४ ॥

वधे दोषो न तु क्रीत्वाऽशने वागिति दुर्मतिः ।
यत्तुल्यौ हन्तृभोक्तारौ को हन्यान्नाद्यरोस्ति चेत् ॥ ४।६५ ॥

यन्मनुः-अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्त्ता चोपहर्ता च खादकश्चेति घातकाः ॥ ४।६६ ॥

हिंसाप्यहिंसा वेदोक्तेत्याहुरागमरा गताः ।
ये निर्विचारचित्तास्ते चार्वाकाय शषन्ति किम् ॥ ४।६७ ॥

येषां पञ्चेन्द्रियप्राणनाशे नाशङ्कते मनः ।
कुन्थुपूतरकादीनां वधे तेषां कुतः कृपा ॥ ४।६८ ॥

वधो धर्मं जलं तीर्थं गौर्नमस्या गुरुर्गृही ।
अग्निर्देवो द्विकः पात्रं येषां तैः कोऽस्तु संस्तवः ॥ ४।६९ ॥

मत्सपत्न्या अमी सर्वे प्रवृत्तेः पक्षपातिनः ।
मारिश्च मोहभूरत्रास्तीति ध्यात्वा चचाल सा ॥ ४।७० ॥

पुनः श्रमार्त्ता पश्यन्ती विश्रामार्थमितस्ततः ।
पुरो यागद्विषं भागवतव्रातं व्यलोकत ॥ ४।७१ ॥

कौपीनमात्रवसनमात्रदण्डकमण्डलुम् ।
साक्षमालं तमालम्ब्य यावत्सा स्थातुमैहत ॥ ४।७२ ॥

तावदेकं विना ब्रह्म प्रपञ्चः सकलो मृषा ।
इति तन्मुखभूर्जज्ञे ध्वनिस्तच्छ्रवणाध्वनि ॥ ४।७३ ॥

विवेकः प्रोचिवानम्ब विलम्बः क्रियतेऽत्र किम् ।
शृणु श्रवणयोस्तप्तत्रपु जल्पन्त्यमी कथम् ॥ ४।७४ ॥

एते विना परब्रह्म यदि प्राहुर्मृषाखिलम् ।
तत्तृष्णजः प्रार्थयन्ते नदीं किं न मरीचिकाम् ॥ ४।७५ ॥

एते विना परब्रह्म यदि प्राहुर्मृषाखिलम् ।
तद्व्यक्तमुक्तमप्येषां मृषा कः प्रत्ययस्ततः ॥ ४।७६ ॥

यद्येतदेवमाहुस्ते परमार्थैकदृष्टयः ।
तन्नीरेऽनुदिनं स्नान्ति भावशुद्धिजुषोऽपि किम् ॥ ४।७७ ॥

नीरात्पावित्र्यमाहारात्तृप्तिं शास्त्राच्च पाटवम् ।
बोधं वाचश्च विन्दन्तोऽमी किं सर्वापलापिनः ॥ ४।७८ ॥

किं चैते प्राहुरात्मैक्यं जलचन्द्रोपमानतः ।
तन्न चारु विचारौकः प्रवेशानुपलम्भतः ॥ ४।७९ ॥

तथाहि-जायन्ते जन्तवः केऽपि नाकिनो नारकाः परे ।
केऽपि विप्राः परे म्लेच्छा विशः केऽपि परे स्त्रियः ॥ ४।८० ॥

भोगाननुभवन्त्येके रोगान् दीनाननाः परे ।
प्रज्ञावज्ञातवागीशा एकेऽन्ये तु निरक्षराः ॥ ४।८१ ॥

कृमिकीटपतङ्गाद्याः केप्यन्येऽश्वगजादयः ।
एकात्म्ये विश्ववैचित्र्यमेतत्सङ्घटते कथम् ॥ ४।८२ ॥

उक्तो जलेन्दुदृष्टान्तो योऽयं तत्सिद्धये बुधैः ।
बालस्यालापवत्सोऽपि न हि क्षोदक्षमो यतः ॥ ४।८३ ॥

व्योम्नीन्दावुदितेऽस्ते च छन्ने ग्रस्ते कृशोऽकृशः ।
यथाखिलजलेन्दूनां तद्भावो न तथात्मनि ॥ ४१८४ ॥

उत्पद्यन्ते विलीयन्ते वारिधौ वीचयो यथा ।
तथैकस्यात्मनो ह्येते विशेषा न तु ते पृथक् ॥ ४१८५ ॥

इति चेत्तत्र यद्वीच्यो भवेयुर्वारिधेः समाः ।
अमूर्तस्यात्मनो मूर्त्ता विशेषा इति दुर्वचम् ॥ ४१८६ ॥

निःसङ्गा अपि जल्पन्ति यद्येवमसमञ्जसम् ।
तन्मन्ये मोहभूपालमन्त्रिणोऽमी वशंवदाः ॥ ४१८७ ॥

तव तुष्यति चेच्चेतः कुशले कुशलेन मे ।
श्रान्तापि कूलच्छायावदेषां तत्सन्निधिं त्यज ॥ ४१८८ ॥

पुत्रप्रेरणयापद्य पन्थानं परमेश्वरी ।
परीश्रान्ता पुनः क्वापि प्रापं सा तापसाश्रमम् ॥ ४१८९ ॥

अयत्नलभ्यपालाशपर्णशालानिवासिभिः ।
युक्तं जटाधरैर्भुक्तत्यक्तभोगैः शिवेच्छया ॥ ४१९० ॥

बालर्षिभिः पयस्कुम्भैः सिच्यमानाणुपादपम् ।
पद्मासनासीनमुनिक्रोडक्रीडन्मृगार्भकम् ॥ ४१९१ ॥

जरत्तापससंचारव्यग्रपार्षतपर्षदम् ।
उटजाजिरसंशोष्यमाणनीवारतण्डुलम् ॥ ४१९२ ॥

पाठ्यमानशुकं ग्रथ्यमानरुद्राक्षमालिकम् ।
तं प्रविश्याशु विश्रान्त्यै चक्षुश्चिक्षेप साऽभितः ॥ ४१९३ ॥

बीजशोषं मूलकन्दफलत्वचवियोजनम् ।
द्रुमसेकं कुशच्छेदं तेषां वीक्ष्य जगाद सा ॥ ४१९४ ॥

अमी मोहनृपोद्भूतारम्भविश्रम्भभाजनम् ।
श्रान्तयापि मया हेया दूरे चौरद्रुमा इव ॥ ४१९५ ॥

पुनः सा प्रस्थिताजस्रप्रयाणजनितश्रमा ।
दृष्ट्वा कौलमतं तत्रावस्थातुं व्यमृशच्चिरम् ॥ ४।९६ ॥

घटसिद्धिप्रघोषेण जनानामाकृषन्मनः ।
तृष्णक्कुम्भिकुलं भेकरटितेनेव पल्वलम् ॥ ४।९७ ॥

धातुवादादिवार्त्ताभिः स्वादुभिः क्वणनाकुलाः ।
प्रजा व्याक्षेपयत् क्षौद्रधाराभिरिव मक्षिकाः ॥ ४।९८ ॥

मुखस्थनाथवाणीभिराणीभिरिव पाटवम् ।
श्रोतृणां सद्गतिप्रह्वं मनः स्यन्दनमानयत् ॥ ४।९९ ॥

ईडापिङ्गलयो रोधे सुषुम्णायां मरुत्वतः ।
प्रचारं तूलविन्यासान्नासायां स्वस्य दर्शयत् ॥ ४।१०० ॥

भस्मनोद्धूलितं नानासनाभ्यसनलालसम् ।
कौलमण्डलमेतन्मे प्राप्तुं विश्रामकामनाम् ॥ ४।१०१ ॥

इत्यालोच्याभिसर्पन्त्यास्तस्याः श्रवणगोचरम् ।
उत्सिक्ततुच्छतत्सभ्याननमूर्ध्वनिराययौ ॥ ४।१०२ ॥

रण्डा चण्डादीक्षिता धर्मदारा मांसं मद्यं भुज्यते पीयते च ।
भिक्षाभोज्यं चर्मखण्डं च शय्या कौलो धर्मः कस्य नो भाति रम्यः

ततोऽमीषां मोहसुहृच्चार्वाकावरजन्मनाम् ।
सङ्गो न योग्य इत्यात्तचापला सा पलायत ॥ ४।१०४ ॥

ये क्षणक्षयिणो भावान् भाषन्ते निखिलानपि ।
न सौगतेषु तेष्वासीत्तस्या विश्रामकामना ॥ ४।१०५ ॥

येषां क्वचन न स्थैर्यं ते परस्थैर्यदाः कथम् ।
सभावष्टम्भदः स्तम्भः स्वयं पित्सुः कथं भवेत् ॥ ४।१०६ ॥

येन कर्म कृतं तस्मिन् जन्तौ नष्टे निरन्वये ।
क्षणेऽन्यस्मिन्नवोत्पन्नो भुङ्क्तात्तस्य फलं कथम् ॥ ४।१०७ ॥

उदूढान्येन वामभ्रूरन्येन परिभुज्यते ।
तनयं जनयत्यन्यः पिता त्वन्योऽस्य कीर्त्यते ॥ ४।१०८ ॥

अपराधे कृतेऽन्येन दण्डोऽन्यस्य प्रदीयते ।
अहो सौगतलोकानां नवा न्यायप्रकल्पना ॥ ४।१०९ ॥

भुक्ते तृप्तिर्गतौ श्रान्तिर्व्याधिशान्तिश्च भेषजैः ।
आत्मस्थैर्यं विना ह्येते व्यवहाराः सुदुर्वचाः ॥ ४।११० ॥

के पुण्यपापे कौ स्वर्गनरकौ का च निवृतिः ।
सर्वशून्यं जगज्जातमात्मनि क्षणनश्वरे ॥ ४।१११ ॥

अमी मोहप्रिया भक्ता मा मां द्राक्षुरिहेति सा ।
ध्यायन्तीत्यशृणोद्वाक्यं श्रौतं तद्गुरुभाषितम् ॥ ४।११२ ॥

मृद्वी शय्या प्रातरुत्थाय पेया भक्तं मध्ये पानकं चापराह्णे ।
द्राक्षाखण्डं शर्करा चार्धरात्रे मोक्षश्चान्ते शाक्यपुत्रेण दृष्टः॥ ४।११३ ॥

तच्छ्रुत्वा चिन्तयामास निवृत्तिर्नष्टनिर्वृतिः ।
हहा सर्वोत्तमं मुक्तितत्त्वमेभिर्विडम्ब्यते ॥ ४।११४ ॥

अनुशिष्टिप्रदानं यदिदं मोक्षाभिलाषिणाम् ।
कर्पूरकामुकानां तद्विहितं लवणार्पणम् ॥ ४।११५ ॥

एतदुक्तविधानेन नूनमिन्द्रियपोषणम् ।
भवाम्भोनिधिरुद्वेली भवतीन्द्रियपोषणे ॥ ४।११६ ॥

गुरुत्वं नोचितं मोक्षभवभेदमजानताम् ।
दिग्विभागानभिज्ञानामिव मार्गनिरूपणम् ॥ ४।११७ ॥

मुक्तिनाम्ना जनं मुग्धममी धूर्त्ता भवावटे ।
क्षिपन्तो मे न विश्वासोचिता इति चचाल सा ॥ ४।११८ ॥

येऽथ कापालिका लोके ये लौकायतिकाः पुनः ।
ये च नीलपटाः कुम्भचटकारहमाणकाः ॥ ४।११९ ॥

ते सर्वे मोहराजस्य वयस्यत्वं गता इति ।
दूरे त्यक्तास्तया वैरिपक्षपात्यपि वैरिवत् ॥ ४।१२० ॥

एवं भ्रमं भ्रमं भूरिश्रमा विश्रामकाङ्क्षिणी ।
पुरं प्रवचनं प्राप दुष्प्रापं सा दुरात्मनाम् ॥ ४।१२१ ॥

यस्मिन् सुचारुचारित्रप्रासादोपरिवर्तिनः ।
शमयन्ति श्रमं दृष्टा अपि धर्मध्वजा नृणाम् ॥ ४।१२२ ॥

सद्भिः पुण्याशयैर्यत्रोपदेशव्यपदेशतः ।
असत्कर्मश्वपाकस्य प्रवेशोऽन्तर्निवार्यते ॥ ४।१२३ ॥

वसन्ति साधवो मध्ये बहिः सम्यग्दृशः पुनः ।
यत्र ते यैः समं सख्यमभिलष्यन्ति वासवाः ॥ ४।१२४ ॥

यद्वासिनो जना नित्यं भुञ्जानास्तात्त्विकं सुखम् ।
न मन्यन्ते तृणायापि सविकल्पसुखं दिवम् ॥ ४।१२५ ॥

या श्रुतापि महासौख्यं दत्ते देहिषु सा यतः ।
न दुर्लभा मुक्तिपुरी शासनादिव शेवधिः ॥ ४।१२६ ॥

तत्राक्षदमनं नाम वनं शैत्यनिबन्धनम् ।
अदृश्यतोचितस्थानलाभचिन्तार्त्तया तया ॥ ४।१२७ ॥

यत्र साध्वास्यकुण्डोत्थं श्रुतिसारणिसंगतम् ।
भूरिभ्रमणखिन्नानां शं दत्तेऽर्हद्वचोऽमृतम् ॥ ४।१२८ ॥

धर्मश्रुतिलतोद्भूतसूक्तपुष्पार्थसन्मधु ।
पीत्वा योगिमनोभृङ्गाः सरङ्गा यत्र जज्ञिरे ॥ ४।१२९ ॥

सा वने पावने तत्र विश्राम्यन्ती श्रमच्छिदे ।
पुरस्त्रिभूमिकोत्तुङ्गयोगप्रासादवासिनम् ॥ ४।१३० ॥

स्निग्धगम्भीरदृक्पातपातकव्रातनाशनम् ।
मृदुप्रदीप्तया मूर्त्या वदन्तं स्वमलौकिकम् ॥ ४।१३१ ॥

शंकरं सर्वविद्यानामवद्यानां भयङ्करम् ।
ददर्श दर्शनानन्दं कश्चिद्दिव्याकृतिं नरम् ॥ ४१३२ ॥

तदानीं प्रमदोत्पन्नपुलकप्रोल्लसत्तनुः ।
निवृत्तिर्निर्वृतिमन्या तं तीर्थवदवन्दत ॥ ४१३३ ॥

तेनापि स्वागतप्रश्नपूर्वमाभाषिता मृदु ।
घनसिक्तेव भूः प्राच्यं सर्वं तापं ववाम सा ॥ ४१३४ ॥

ऊचे च धीनिधे ! कस्त्वं किं वनेऽत्रावतिष्ठसे ।
किं किं वेत्सीति भाषस्व सत्यं यदि हितीयसि ॥ ४१३५ ॥

सोऽप्यूचे शृणु कल्याणि नास्ति गोप्यं ह्यमायिनाम् ।
नाम्ना विमलबोधोऽहं प्रसिद्धः सिद्धपुरुषः ॥ ४१३६ ॥

आसन्नायाः पुरोऽमुष्या मुख्याधिपतिनार्हता ।
नियुक्तोऽस्मि वनं त्रातुं तत्तद्द्रुमनिकेतनम् ॥ ४१३७ ॥

सौधस्यास्याद्यभूमिष्ठः काननं पालयाम्यदः ।
तुष्टिपुष्टिकरैरेतत्फलैर्वृत्तिं च कल्पये ॥ ४१३८ ॥

प्रसादातिशयः कोऽपि विद्यतेऽस्य प्रभोर्मयि ।
तेन प्रत्यक्षवत्पश्याम्यत्यक्षमपि वस्त्वहम् ॥ ४१३९ ॥

साथ तं प्रणयप्रह्वा प्रोवाच रचिताञ्जलिः ।
कैश्चिद्दृष्टोऽसि सुकृतैर्विश्वविश्वोपकारकः ॥ ४१४० ॥

स्त्रीत्वं पतिपराभूतिः पुत्रबाल्यं चिरभ्रमिः ।
इत्यादि कियदात्मीयदुःखौघं विवृणोमि ते ॥ ४१४१ ॥

कारुण्यखाने ! दुःखानां सर्वेषामप्यभूत्क्षयः ।
यज्जातमधुना तात ! सहसा तव दर्शनम् ॥ ४१४२ ॥

तत्प्रसीद स्फुटं ब्रूहि सौम्य ! द्रक्ष्याम्यमुं कदा ।
किमपि प्राभवं प्राप्य सुखिनं तनुजं निजम् ॥ ४१४३ ॥

सोऽपि तं बालमुत्सङ्गसङ्गिनं जनयन्नथ ।
अक्षुण्णमीक्षिताशेषलक्षणः प्रोचिवानिति ॥ ४।१४४ ॥

सुभगे तदहं वच्मि मदुक्तं यदि मन्यसे ।
करणं हीष्टसिद्धीनामाप्तवागनतिक्रमः ॥ ४।१४५ ॥

मम तत्त्वरुचिर्नाम कन्या वर्ण्या विचक्षणैः ।
सन्मार्गमार्गणाभिख्यगृहिणीकुक्षिसम्भवा ॥ ४।१४६ ॥

तां चेत्परिणयत्येष पुत्रस्ते प्राप्तयौवनाम् ।
तदा वदाम्यदः प्रश्नसारं सारङ्गलोचने ॥ ४।१४७ ॥

अयं सकलसद्वृत्त एषाप्याजन्मभासुरा ।
युक्तोयमनयोर्योगः शशिपूर्णिमयोरिव ॥ ४।१४८ ॥

तत्तस्य वचनं श्रुत्वा दृष्ट्वा कन्यां च तादृशीम् ।
उन्मीलत्पुलकाङ्गी सा वाचमादत्त निर्वृतिः ॥ ४।१४९ ॥

अनुभूतपराभूतिव्रणसंरोहिणी तव ।
वाग् जयत्यङ्गभूपाणिग्रहचिन्ताम्बुधेस्तरीः ॥ ४।१५० ॥

अहा भाग्यमहो भाग्यं यन्मम स्थानसंशये ।
साक्षाल्लक्ष्मीरिवाकस्माद्वधूरियमुपस्थिता ॥ ४।१५१ ॥

वचस्तवावमन्येऽहं श्रेयस्कामेति दुर्वचम् ।
को नाम जीविताकाङ्क्षी लब्धां नाद्रियते सुधाम् ॥ ४।१५२ ॥

सिद्धोऽभ्यधत्त यद्येवं तत्किं विज्ञे ! विलम्ब्यते ।
मुहूर्त्तोऽपृष्ट एवायं यत्राभून्नौ समागमः ॥ ४।१५३ ॥

ततः स्वमानसोल्लासोचितारब्धमहोत्सवः ।
सुतां तत्त्वरुचिं सद्यो विवेकेन व्यवाहयत् ॥ ४।१५४ ॥

योग्यस्थाननिवेशेन दुहितुर्जातसंमदः ।
जगत्सु वत्सलः प्रोचे निर्वृत्तिं सिद्धपुरुषः ॥ ४।१५५ ॥

आकर्णय महाभागे ! संपदो विपदोऽपि च ।
महतामेव जायन्ते विधोर्वृद्धिक्षयाविव ॥ ४।१५६ ॥

हेतिघाता रणे हेमभूषा राजगृहाङ्गणे ।
जात्याश्वेष्वेव जायन्ते न खरेषु महत्स्वपि ॥ ४।१५७ ॥

त्यजन्ति सहजं धैर्यं नापद्यपि महाशयाः ।
महावाताभिघातेऽपि न चलत्यमराचलः ॥ ४।१५८ ॥

आपदो नावतिष्ठन्ते चिरं सुकृतशालिनाम् ।
राहुवक्त्रगतोऽपीन्दुः सद्वृत्तः किं न मुच्यते ॥ ४।१५९ ॥

सर्वासामापदामापदात्मजस्ते परं तटम् ।
अथ प्रथिष्यते पुण्यैरेव स्वैरयमन्वहम् ॥ ४।१६० ॥

अत्र प्रवचनाभिख्ये नगरेऽस्ति नरेश्वरः ।
अर्हन्नवार्यदोर्वीर्यनिर्जितान्तर्द्विषद्बलः ॥ ४।१६१ ॥

आस्तां भुक्तिर्यत्प्रसादान्मुक्तिरप्यदवीयसी ।
तत्तस्य साम्ये कल्पद्रुरपि हीनोपमास्पदम् ॥ ४।१६२ ॥

तस्य छत्रत्रयं मूर्ध्नि त्रिलोकैश्वर्यसूचकम् ।
ध्रियमाणं जगत्साक्षि केनापि न निवार्यते ॥ ४।१६३ ॥

यत्र सालत्रये तस्य वासः स्वर्णमणीमये ।
शतांशेनापि तच्छाया नापि सौधैः सुधाभुजाम् ॥ ४।१६४ ॥

पृथ्व्यां पर्यटतस्तस्य स्वर्णाब्जानि पदोरधः ।
अकस्मादुपतिष्ठन्तेऽधःकृतानीव शोभया ॥ ४।१६५ ॥

तस्मिन् सिंहासनासीने प्रोच्चैः कङ्केल्लिपादपः ।
नित्यं प्रकुरुते छायां कालवेदीव सेवकः ॥ ४।१६६ ॥

स्वाम्यमेकैकशो येषां मूलमाश्चर्यभूरुहः ।
तेऽपीन्द्राद्याः पुरस्तस्यानङ्ककिङ्करसन्निभाः ॥ ४।१६७ ॥

सुरासुरनृतिर्यञ्चो वाचः श्रवणलालसाः ।
जातिवैरं समुत्सृज्य निविशन्तेऽस्य पर्षदि ॥ ४।१६८ ॥

गतागतं वितन्वानेऽमर्त्यौघे तन्निनंसया ।
मार्गैरास्वर्गमाश्वभ्रं जातु शून्यैर्न भूयते ॥ ४।१६९ ॥

धर्मचक्रं पुरस्तस्य रविबिम्बमिवाम्बरे ।
नायकान्तरदर्पान्धकारध्वंसाय भासते ॥ ४।१७० ॥

चलच्चेलान्तरतयाग्रतस्तस्य हरिध्वजः ।
विजिगीषागतद्वेषिचक्रस्याकम्पसूचकः ॥ ४।१७१ ॥

दुन्दुभिध्वानगन्धाम्बुवृष्टिपुष्पोत्करादयः ।
सर्वेऽप्यतिशयास्तस्यापरैः स्वप्नेऽपि दुर्लभाः ॥ ४।१७२ ॥

ईतिदुर्भिक्षरोगाग्निग्रहविग्रहजव्यथाः ।
सिंहेनेव शिवास्तेनाक्रान्ते क्षेत्रे विशन्ति न ॥ ४।१७३ ॥

विलसत्केवलज्ञानः स हि कारुण्यसागरः ।
अत एव जगत्पीडां वेत्तुं भेत्तुमसौ प्रभुः ॥ ४।१७४ ॥

सेवेत स्थिरचित्तस्तं जामाता यदि यत्नतः ।
अचिरात्तद्द्विषो हत्वा नन्वयं राज्यमाप्नुयात् ॥ ४।१७५ ॥

इमां निशम्य सम्यक् तद्वाचमुद्भूतकौतुका ।
निरस्ताशेषसन्देहा निवृत्तिः प्राप निर्वृतिम् ॥ ४।१७६ ॥

सुतेन सवधूकेन सहिता सुहिताशया ।
पुरं तदासादयितुं दयिता मनसोऽचलत् ॥ ४।१७७ ॥

तत्र पाखण्डिनोऽद्राक्षीत् पुरस्योपान्तवासिनः ।
नृशंसान् दाम्भिकान् लुब्धान् पल्वलस्य बकानिव ॥ ४।१७८ ॥

जिनं यातो जनस्यासद्वाक्पप्रश्नेन रोधनम् ।
व्याधानामिव कूटेन रङ्कोस्तेषामधिक्रिया ॥ ४।१७९ ॥

चित्रामिवाऽर्कं तां पत्नीं सम्प्राप्याधिकभास्वरम् ।
विवेकं ते वशीकर्तुमेवं वाचो वितेनिरे ॥ ४।१८० ॥

एह्येहि वत्स ! विच्छायमाननं मा कृथा वृथा ।
वयं त्वामुद्धरिष्यामः क्षामताङ्गे न भाति ते ॥ ४।१८१ ॥

क्व यासि पुरतस्तत्राधिकं किं त्वमवाप्स्यसि ।
श्रुत्यैवार्हन्नसौ रम्यः सेवितो वैभवच्छिदे ॥ ४।१८२ ॥

तुष्टः किंचिन्न दत्तेऽसौ रुष्टो वा नाच्छिनत्त्यपि ।
आकारमात्रपुंसोऽस्य बलं श्रद्धेहि वार्त्तया ॥ ४।१८३ ॥

इह देवाः प्रवीणेन स्तुत्या हरिहरादयः ।
सर्गपालनसंहारा यदायत्ता जगत्त्रये ॥ ४।१८४ ॥

प्राभवं ददते तुष्टा रुष्टा एते हरन्त्यपि ।
भक्त्यभक्त्योः फलं साक्षात्पश्यन्नेतेषु मा मुहः ॥ ४।१८५ ॥

धनुर्वेदं कामतत्त्वं वैद्यकं ज्योतिषं तथा ।
भाषमाणा अमी लोके चिन्तका न पुनर्जिनाः ॥ ४।१८६ ॥

लीलया ददते मुक्तिममी कष्टैः पुनर्जिनाः ।
मनीषी सुखसाध्येऽर्थे व्यर्थं कष्टं करोति कः ॥ ४।१८७ ॥

खाद्यवाद्यसमिल्लास्यहास्यगीतकथारसः ।
न यत्र नायके तत्र पशुत्वपिशुना रतिः ॥ ४।१८८ ॥

स्वार्थेऽपि यस्यौदासीन्यं तस्माद्या लाभकल्पना ।
सा नभःकुसुमैः स्वीयशिरःशेखरसूत्रणा ॥ ४।१८९ ॥

एतद्भक्तं जगत्सर्वं स्तोकका आर्हताः पुनः ।
महाजनो येन गतः स पन्थाः श्रीयते न किम् ॥ ४।१९० ॥

श्रुत्वेति सोऽपि सिंहौजाः फेरवानिव कद्वदान् ।
सेवार्थी जयतां पत्युः प्रत्युत्तरयति स्म तान् ॥ ४।१९१ ॥

हंहो किमाह्वयध्वे मां यत्र तत्र न मे रतिः ।
वात्ययेवाचलः क्षोभ्ये नाहं वाचा यया तया ॥ ४।१९२ ॥

विच्छायता भवेदास्ये नासतत्वरुचेर्मम ।
भवेद्वा सा न युष्माभिर्वार्यते वितथोक्तिभिः ॥ ४।१९३ ॥

अपह्नवात्सुदेवस्य कुदेवस्य प्रकाशनात् ।
धूमादिवाग्निर्भवतां मिथ्वावाक्त्वं सुनिश्चितम् ॥ ४।१९४ ॥

भवद्भिर्न समुद्धीर्ये सोऽहं मोहवशंवदैः ।
असम्यग्भाषणं मोहस्तंद्धि युष्मासु भासुरम् ॥ ४।१९५ ॥

इष्टस्वाम्यनवाप्त्येयं क्षोमताङ्गे चिरान्मम ।
साथ त्रिजगतीनाथसेवयैव निवर्त्स्यति ॥ ४।१९६ ॥

तं देवदेवं सेवन्ते ये तेषु किमु कुप्यथ ।
काचग्राही मणिग्राहं निन्दन्निन्दास्पदं भवेत् ॥ ४।१९७ ॥

रीरीकाञ्चनयोः काचमण्योः खद्योतभास्वतोः ।
तृणतर्वोरिवोर्वीति दुष्टदेवसुदेवयोः ॥ ४।१९८ ॥

निर्दूषणं स्फुटगुणं देवं भासुरमुज्ज्वलम् ।
सचेताः सेवन्ते सूतमिव कल्याणसिद्धये ॥ ४।१९९ ॥

मुञ्चध्वं पक्षपातं भवत गुणवति स्नेहला मा स्वशास्त्रे-
ष्वेवाश्वासं दधीध्वं विमृशत विशदीकृत्य चेतः क्षणार्द्धम् ।
ज्ञातं वस्तावदार्या दमशमसमतासूनृताद्यागुणाली,
काङ्क्षाकन्दर्पदर्पाऽनृतकलिकपटान्येष दोषप्रपञ्चः ॥ ४।२०० ॥

अमी गुणाश्च दोषाश्च कं सामस्त्येन भेजिरे ।
जिनं तदितरं वापि स्वयमेव विचिन्त्यताम् ॥ ४।२०१ ॥

नो पञ्चेषुप्रपञ्चो न च न कलिकलनोपद्रवो नेन्द्रियाणां,
नो तृष्णायास्तरङ्गा न कपटपटुता नापि कोपाग्नितापः ।

नाहंकाराद्विकारो न च न परिभवो नो कदाशाविलासा,
यस्मिन् देवः स एव ध्रुवशिवपदवीवाञ्छया सद्भिरर्च्यः ॥ ४।२०२ ॥

कोऽन्यो देवोऽत्र यों गेहेनर्दी निर्दोषतायशः ।
वीतरागं विना वोढुं क्षमेतासमविक्रमम् ॥ ४।२०३ ॥

स्त्रिया रागोऽक्षसूत्रेण मोहः शस्त्रैः सरोषता ।
जापेनाधरता तेषामूचेऽवतरणैर्भवः ॥ ४।२०४ ॥

मुक्ताश्चेदवतीर्णाः किं ज्ञाश्चेत्किं दैत्यसर्गिणः ।
शान्ताश्चेत्खेलनास्तत्किमाप्ताश्चेत्किमु मायिनः ॥ ४।२०५ ॥

न देवचरितं चरेदिति वचो न चोक्षं यतो,
महापुरुषसंश्रितो भुवि न कस्य पन्थाः प्रियः ।
यथारुचि विचेष्टते गुरुकुलं समुच्छृङ्खलं,
विनेयसमितिं धृतिं प्रविनयत्यहो धृष्टता ॥ ४।२०६ ॥

मानुष्यत्वेऽपि ये तत्त्वपरीक्षायामुदासते ।
गताः पशुगतिं ते किं तां विधास्यन्ति बालिशाः ॥ ४।२०७ ॥

यद्वा ऋजुजडत्वाद्वश्चेत्परीक्षालसं मनः ।
रत्नवस्त्रधनस्वर्णभक्ताज्याम्बुनि तन्न किम् ॥ ४।२०८ ॥

वस्तुन्यल्पसुखार्थेऽपि परीक्षा क्रियते जनैः ।
सर्वसौख्यप्रदे तत्त्वे युज्यते सा विशेषतः ॥ ४।२०९ ॥

अंशा एव ह्यमी तत्त्वं यदन्यत्तन्निरञ्जनम् ।
इति चेदुच्यते धीरैस्ततस्ताननुयुञ्ज्महे ॥ ४।२१० ॥

तेंशा भिन्ना अभिन्ना वा तस्मान्मुख्यस्वरूपतः ।
भिन्ना यदि ततस्तेभ्यो मुक्तिर्नैवास्मदादिवत् ॥ ४।२११ ॥

अभिन्नाश्चेत्ततोऽमीषां दोषास्तमधिशेरते ।
द्वयाभ्युपगमे द्वन्द्वदोषाः प्राग्वन्न दुर्वचाः ॥ ४।२१२ ॥

शक्तो ज्ञाता जगत्पाता यद्यसौ तत् क्वचित् क्वचित् ।
धर्ष्यन्ते धार्मिका धर्महीनैः किं तत्र सर्वगे ॥ ४।२१३ ॥

सदोषो न हि निर्दम्भः सदम्भो न हि सत्यवाक् ।
सदोषेष्वपि विश्वस्ता ये ते ध्वस्ताः स्वकर्म्मणा ॥ ४।२१४ ॥

योषिज्जपस्त्रग्जापास्त्रप्रमुखक्षूणवर्जिते ।
कया युक्त्योच्यतां विद्भिर्दोषाख्यानं जिनेश्वरे ॥ ४।२१५ ॥

दृग्मध्यस्था मुखं सौम्यं यस्य पद्मासनं ध्रुवम् ।
शान्तः परिकरस्तत्र देवे दोषोद्भवः कुतः ॥ ४।२१६ ॥

सर्गपालनसंहारास्तदायत्ता जगत्त्रये ।
इति वाक्चापलं सर्गादीनां वैषम्यदर्शनात् ॥ ४।२१७ ॥

सर्गस्थिती सतामेवासतामेव च संहृतिम् ।
यदि लोकेऽत्र पश्यामस्तदा तन्नैपुणं स्तुमः ॥ ४।२१८ ॥

आत्मदिग्व्योमकालाद्यं वस्तु किञ्चिदकृत्रिमम् ।
तत्सर्वकर्तृतावादस्तेषां जातोऽर्द्धखण्डितः ॥ ४।२१९ ॥

दौःस्थ्यव्याधी जरा मृत्युर्नरको गर्भवासिता ।
एतानि सृजतां तेषां स्पष्टा लोकविपक्षता ॥ ४।२२० ॥

चेत्तेऽङ्गिनां फलं दद्युः कर्मापेक्ष्य शुभाशुभम् ।
तत्तदेव प्रमाणं नः किमन्यैस्तन्मुखेक्षिभिः ॥ ४।२२१ ॥

अर्हन् भक्तेष्वभक्तेषु न तुष्यति न रुष्यति ।
परं प्ररोहतः पुण्यपापे तद्भक्त्यभक्तितः ॥ ४।२२२ ॥

विपक्त्रिमाभ्यां जायेते नृणां ताभ्यां सुखासुखे ।
तदर्हन्नपि तत्कर्त्ता प्रोच्यतामुपचारतः ॥ ४।२२३ ॥

अनुल्लङ्घ्यं कृतं कर्म भणतां भवतामपि ।
प्रमाणमेतदेवास्ति नान्यत्किंचन तत्त्वतः ॥ ४।२२४ ॥

चेद्भक्ताभक्तयोस्ते स्युः सम्पद्वत्तिहृत्तिक्षमाः ।
सर्वेपीन्द्रा दरिद्रा वा भक्ताभक्ता भवन्तु तत् ॥ ४।२२५ ॥

वैदकाद्युपदेशेन गौरव्यां ते न धीमताम् ।
विना तदुक्तं जीवन्ति यल्लोके यवनादयः ॥ ४।२२६ ॥

यदि संग्रामशूरत्वाच्छत्रुवृन्दनिकन्दनात् ।
देवत्वमिष्टं तत्तादृग् भूभुजामपि तन्न किम् ॥ ४।२२७ ॥

न ते दातुमलं मुक्तिमिति चेत्तदमी अपि ।
मुक्तिदा न सतामिष्टा दृष्टा दोषावलीह यत् ॥ ४।२२८ ॥

ददाना लीलया मुक्तिं ते तपोध्यानसाधनाम् ।
वाग्मात्रदत्तदेशालिकेलिशालिशिशूपमाः ॥ ४।२२९ ॥

मुक्तिं सर्वोत्तमां दद्युस्ते सुखेनेति दुर्घटम् ।
व्यनक्ति कूटतां दातुर्मुधादानं सुवस्तुनः ॥ ४।२३० ॥

गोपीप्रियस्य दासीति यैर्मुक्तिरभिधीयते ।
मूढैर्गोपाङ्गनाभ्योपि तैर्मुक्तिरधरीकृता ॥ ४।२३१ ॥

शापश्चानुग्रहो मिथ्यावचनं परवञ्चनम् ।
खेलनाहङ्कृती वाद्यलास्यहास्यादिविप्लवाः ॥ ४।२३२ ॥

जले द्रुमे श्मशाने वा वासोऽर्कादिसुमाञ्जनम् ।
सोपहासस्तुतिस्तेषां व्यञ्जन्ति क्षुद्रदेवताम् ॥ ४।२३३ ॥

दत्वर्द्धिं दनुजेषु तद्विशसनं योषिद्भिरश्लीलता,
नाट्यं निर्भरमुग्रहास्यकरणं व्यामोहनं मायया ।
ईदृक्चेष्टितवद्भिरत्रपतया देवान्तरैरन्तरम्,
स्वस्यास्तं शिशुभिर्विटैरपि नटैर्वैहासिकैर्धूर्त्तकैः ॥ ४।२३४ ॥

मूर्ध्नि छत्रत्रयं सर्वे ग्रहाः प्रतिकृतेरधः ।
आस्या सिंहासने यस्य स्रक्चामरधराञ्चिते ॥ ४।२३५ ॥

स्थानं प्रायः पुरस्यान्तर्दृष्टिः पीयूषवर्षिणी ।
अष्टाग्रशतसीमानः प्रासादे मण्डपाः पुनः ॥ ४।२३६ ॥

भूषा सुवर्णमाणिक्यैः पूजा सत्पुष्पपल्लवैः ।
धूपनं काकतुण्डद्यैः काश्मीराद्यैर्विलेपनम् ॥ ४।२३७ ॥

पार्षद्यौर्विकथावैरहास्यवैकृतवर्जनम् ।
तस्य प्राप्तं परां कोटिं वदन्ति प्राभवं स्फुटम् ॥ ४।२३८ ॥

खाद्यवाद्यसमिल्लास्यरसः शेषनृपैः समः ।
न तेनातिशयः कोऽपि जिने विश्वविलक्षणे ॥ ४।२३९ ॥

हिंसासक्ता रतासक्ता ये ते सन्तु तदाश्रिताः ।
समाधिध्यानधौतानां वीतरागः पुनः प्रियः ॥ ४।२४० ॥

अन्धो यथा विलगितः पथि यत्र धूर्तैस्तस्य स्वरूपमविदन्नपि तेन याति
तद्वद्यदि प्रवरीवर्त्ति विचारवन्ध्यम् सल्लोचनोऽपि तदसौ खलु दैवदोषः

सम्यग्देवमवज्ञाय कः कुदेवं निषेवते ।
सति क्षीराम्बुराशौ न स्नाति क्षारोदधौ सुधीः ॥ ४।२४२ ॥

तत्रोपतिष्ठमानं तन्मां नोपालब्धुमर्हथ ।
भवादृशैर्न वञ्च्येऽहं पौरवद् ग्राम्यवाणिजैः ॥ ४।२४३ ॥

इति वाचैव तान् जित्वा विवेको नगरेऽविशत् ।
साधूनामाश्रये तस्थौ निवृत्तिस्तत्र निर्भयम् ॥ ४।२४४ ॥

अलक्ष्यं गूढसञ्चारादगुप्तीभूयान्तरान्तरा ।
पत्नीस्नेहेन तत्रैत्य निवृत्तेरमिलन्मनः ॥ ४।२४५ ॥

त्वं जिह्वासि प्रवृत्तिस्तु प्रकृत्या पाटवाश्रिता ।
ततस्तत्रादरो भूयान्मम त्वमपि पत्न्यसि ॥ ४।२४६ ॥

यद्यदारप्स्यते कर्म नवं तव तनूद्भवः ।
तत्र तत्राशुचारित्वान्मया साक्षी भविष्यते ॥ ४।२४७ ॥

अहमुद्वाहसमयेप्यस्य सन्निहितोऽभवम् ।
न मे गमागमौं वेगवतो दूरेऽपि दुष्करौ ॥ ४।२४८ ॥

मद्द्वारेणास्य वीरस्यै विज्ञाय चरितादद्भुतम् ।
भूपालोऽपि श्लथीभूतपाशः सुखमवाप्स्यति ॥ ४।२४९ ॥

आप्तसौख्योऽपि नेदानीं मोहं हन्तुमसौ क्षमः ।
सुतश्च बद्धमूलश्च सहसा न हि साध्यते ॥ ४।२५० ॥

मा स्म भू रोषभूस्तन्वि पक्षे वर्त्ते तवाप्यहम् ।
पुरस्कृत्य सुतं स्वेष्टं साधयेति च तां जगौ ॥ ४।२५१ ॥

सापि प्रकृतिगम्भीरा विस्मृतप्राक्पराभवा ।
भर्तुस्तयैव वाचाभूत्परमप्रीतिभाजनम् ॥ ४।२५२ ॥

सान्यदा तनयं प्रोचे श्रृणु वत्सैकवत्सल ।
त्वं योग्योसि हितोक्तीनां पक्वः कुम्भ इवाम्भसाम् ॥ ४।२५३ ॥

यस्मै तस्मै न रोचन्ते प्रायो भुवि गुरूक्तयः ।
कर्तुं न पार्यते येन तेन वा रत्नसंग्रहः ॥ ४।२५४ ॥

आपाते कटुकाः सन्तु कदाचन गुरूक्तयः ।
प्रान्ते पुनर्गुणकृतः क्वाथवत् ज्वरिणां नृणाम् ॥ ४।२५५ ॥

गुरूपदेशबाह्या ये स्वैराचारा निरङ्कुशाः ।
वेषान्तरितमेषानां तेषां जन्म निरर्थकम् ॥ ४।२५६ ॥

हिता वाचः सुकृतिनामेव क्रामन्ति कर्णयोः ।
विशति क्वापि किं कामगवी श्वपचपाटकम् ॥ ४।२५७ ॥

तद्वत्स ! यदहं वच्मि श्रृणु तत्परमादरात् ।
अनादृते वृथा वृद्धवाणी वृष्टिरिवोषरे ॥ ४।२५८ ॥

वत्स ! स्वच्छमते ! तुच्छपत्नीप्रेरणया प्रियः ।
आवयोरकरोद्यत्तत्प्रजल्पोपि त्रपाकरः ॥ ४।२५९ ॥

सन्त्येव शमनोपाया विषव्यालानलादिषु ।
सपत्नीशमनोपायः प्रायः क्वापि न वीक्षितः ॥ ४१२६० ॥

सपत्न्यामतिदुष्टायां प्रिये क्रुद्धेपि जीवितौ ।
यदावां तत्साधुवृत्ताद्यतो धर्म्मस्ततो जयः ॥ ४१२६१ ॥

स्थानभ्रंशं न शोचामि स्वामिनो वावहीलनम् ।
चेत्त्वां पश्यामि खेलन्तं पुरः प्रीतिस्पृशा दृशा ॥ ४१२६२ ॥

सर्वाण्यपि निधानानि क्षयं यान्ति व्यये सति ।
पवित्रचरितः पुत्रो गेहिनामक्षयो निधिः ॥ ४१२६३ ॥

यस्या एकोऽपि सत्पुत्रः सा स्वं निन्दति किं वशा ।
कस्य न स्यान्मुदे जातजात्यरत्नजनिः खनिः ॥ ४१२६४ ॥

भाग्यवानसि यत्तात ! विमातुर्निर्गतो मुखात् ।
यच्च पुण्यामिमां कन्यां लीलया लब्धवानसि ॥ ४१२६५ ॥

तव चिन्तां ध्रुवं कर्त्ता पिताप्येत्यान्तरान्तरा ।
स हि त्वयि रिपुः पत्नीनुन्न एव न तु स्वतः ॥ ४१२६६ ॥

त्वया सत्त्वाधिकत्वेन कृताहं स्त्रीषु पुत्रिणी ।
आयुष्मांस्त्वं ततो भूयाः प्रार्थ्यं मे किमतः परम् ॥ ४१२६७ ॥

कुलीन ! कुलधौरेय ! ततस्त्वं स्तूयसे बुधैः ।
यन्मातुश्चित्तसन्तापशमनाय प्रगल्भसे ॥ ४१२६८ ॥

स्त्रीणां भवति सन्तापो यः सपत्नीपराभवात् ।
न तं भानुर्बृहद्भानुरपि कर्तुं प्रभूयते ॥ ४१२६९ ॥

मित्रोद्धारेऽरिसंहारे शक्तिर्नान्यत्र भूभुजः ।
पद्मोल्लासे तमोनाशे कः क्षमस्तरणिं विना ॥ ४१२७० ॥

तदत्र पुरि सेवस्व क्षमाधीशं निरञ्जनम् ।
यस्य प्रसादलेशोऽपि सर्वसिद्धिनिबन्धनम् ॥ ४१२७१ ॥

अयं हि मोहभूपालं भेत्तुमेकोपि विक्रमी ।
तस्य ये सेवकास्तेपि वैरिनिग्रहसाग्रहा: ॥ ४।२७२ ॥

हिरण्यहरिहस्त्याद्योपदा प्रीतिपदास्य न ।
केवलं केवलज्ञानी हृत्प्रसत्त्या स तुष्यति ॥ ४।२७३ ॥

अस्य सेवाफलं यच्छत्यप्रमद्वरचेतसाम् ।
सेवाप्रमादयोर्जातिवैरं गोव्याघ्रवद्यत: ॥ ४।२७४ ॥

बन्दीकृत्य प्रमादेन लक्षशोऽमुष्य सेवका: ।
किंकरीचक्रिरे नीत्वा बलान्मोहस्य मन्दिरम् ॥ ४।२७५ ॥

ततो मा दा: प्रमादस्यावकाशं कुलधूर्वह ! ।
प्रस्तावे चास्य नि:शेषं स्वं वृत्तान्तं निवेदये ॥ ४।२७६ ॥

मातु: शिक्षामिमां श्रुत्वा प्रमोदोत्फुल्ललोचन: ।
विवेक: प्रोचिवानम्ब ! तवाज्ञा मेऽस्तु मूर्धनि ॥ ४।२७७ ॥

गर्भधारणपोषाभ्यां मातृत्वं पशुभि: समम् ।
स्तुत्या माता त्वमेवैका येदृग्बोधविधायिनी ॥ ४।२७८ ॥

एकैकमपि यद्वाक्यं हेमकोट्यापि दुर्लभम् ।
तव सर्वोपदेशानां तेषां स्यामनृण: कथम् ॥ ४।२७९ ॥

स्नात: सोहं सुधाकुण्डे भुक्तो दिव्यफलावलीम् ।
पीत: कामगवीदुग्धमासीनो नन्दने वने ॥ ४।२८० ॥

विलिप्तश्चन्दनरसै: प्राप्तो भुवनवैभवम् ।
त्वया मातर्हितोक्तीनां पात्रतां गमितोऽस्मि यत् ॥ ४।२८१ ॥

प्रागदृष्टकनीपाणिसंस्पर्शविषविह्वला: ।
जननीमवमन्यन्ते ये ते शोच्या महाधियाम् ॥ ४।२८२ ॥

तद्धितं कुरुते माता स्पष्टसर्वाङ्गलक्षणा ।
यद्भू: प्रत्ययसन्दोह: कस्य न ध्वनयेन्मन: ॥ ४।२८३ ॥

मातुः सञ्जातसाधूक्तिशकुनोथ कुमारराट् ।
जगाम जगतां नेतुः स्वभावविशदः सदः ॥ ४।२८४ ॥

जप्यं योगीश्वरैर्ध्येयं धीरैः सेव्यं सुरासुरैः ।
आलोकमात्रविध्वस्तसमस्तप्रणतापदम् ॥ ४।२८५ ॥

त्रिकालज्ञं त्रिलोकेशं छत्रत्रयविराजितम् ।
सिंहासनस्थं सोद्राक्षीत्तत्र ज्योतिर्मयं जिनम् ॥ ४।२८६ ॥

अनादिरागादिदुरन्तदोषक्षयादवाप्तस्फुटमाप्तनाम ।
स्वरूपसौख्यानुभवाद्भवस्थदौस्थ्यातिगं त्वां भगवन्नमामि॥ ४।२८७ ॥

साधारणे दैवतनाम्नि देव ! त्वमेव धत्सेऽधिकतां परेषु ।
धातुत्वसाम्येपि न किं सुवर्णं स्फुरत्यशेषानतिशय्य धातून्॥ ४।२८८ ॥

कृपा कृपाणस्तव पाणिवर्ती बाणः सदासंहित एव धर्मः ।
सच्चक्रमन्वेतितरां तदेते मोहाद्यमित्रास्तव नाभ्यमित्राः ॥ ४।२८९ ॥

भृशं भवान्तर्भ्रमताङ्गभाजां भवानवाप्तः किल कल्पवृक्षः ।
तथापि रज्यत्यमतिः करीरेष्विवान्यदेवेषु सकण्टकेषु ॥ ४।२९० ॥

हिंसानृतस्तैन्यकुशीलताद्याः श्लिष्यन्ति दोषास्त्वदुपास्तिवन्ध्यान् ।
दयादमौदार्यशमादिपुण्यकलाः फलानि त्वदुपासनायाः ॥ ४।२९१ ॥

दयादमं चोपनिबध्य शास्त्रे सखा सुखाय त्वमभूर्जनानाम् ।
प्रसूय हिंसाकलुषश्रुतानि व्यतानि चान्यै रिपुतैव तेषु ॥ ४।२९२ ॥

रवेरुलूकाः शिखिनो भुजङ्गा भूतादिदोषा इव मान्त्रिकस्य
कुतीर्थिवादा भयदायिनोपि भवन्ति न स्थातुमलं पुरस्ते॥ ४।२९३ ॥

अकर्मता निष्फलता च पञ्चकल्याणता विश्वविलोमता च ।
निर्मानताऽकिञ्चनतेति दोषा अपि त्वयात्ता गुणतां लभन्ते॥ ४।२९४ ॥

आशक्रमाकुन्थु कृपारसार्द्रे शत्रौ च मित्रे च समत्वभाजि ।
त्वय्यर्पितात्मा जगदर्त्तिदाहव्यपोहनेऽहं पटुतां भजेयम् ॥ ४।२९५ ॥

इति स्तुत्वा महाभक्तिपञ्चाङ्गस्पृष्टभूतले ।
तस्मिन्नमति सोत्कण्ठः स्वामी संमुखमैक्षत ॥ ४।२९६ ॥

जगदे जगदीशेन हंहो शृणुत पार्षदाः ।
योयं नमति मां वीरवरः स खलु भाग्यभूः ॥ ४।२९७ ॥

देवादिसदसद्भावपरीक्षणमना मनाक् ।
जनः सङ्गंस्यतेऽनेन यः स विद्वान् भविष्यति ॥ ४।२९८ ॥

अनीकं नायकेनेव सर्व्वाङ्गैरपि सुन्दरः ।
लोकेऽनेन विना धर्मः कर्म्म वा नाश्नुते फलम् ॥ ४।२९९ ॥

नायमेकेन्द्रियेष्वस्ति न पुनर्द्वीन्द्रियादिषु ।
न चासंज्ञिषु नानूनः पशुनारकनाकिषु ॥ ४।३०० ॥

मर्त्येष्वपि कुलाचार्यश्रद्धारोग्यादिसंभवे ।
स्वल्पेष्वेव स्फुरत्येष मुक्ता शुक्तिपुटेष्विव ॥ ४।३०१ ॥

नाहंकारो न च कृपणता नो कटूक्तानि लक्ष्म्याम् ।
दौःस्थ्ये नाधिर्न परविभवद्वेषिता नादयत्वम् ।
न स्वोत्कर्षापरपरिभवौ नो कुकाव्यं कृतित्वे ।
न ह्रीह्रासः श्रुतविरुचिता दुर्मतिश्चाल्पवित्त्वे ॥ ४।३०२ ॥

सुखे न गृद्ध्या विषयाभिषङ्गो दुःखे न दैन्यं न परोपतापः ।
न जीविते कर्म्म यशोविरोधि न चात्यये दुर्गतिदुर्गवासः॥ ४।३०३ ॥

श्रियां दौःस्थ्ये श्रुते भुयस्यणावपि सुखेऽसुखे ।
जीविते मरणे चैको विवेकस्तत्सतां प्रियः ॥ ४।३०४ ॥

निष्कारणोपकार्येष द्वेषकल्मषवर्जितः ।
संवर्द्धय मम साम्राज्यं प्राज्यमर्जयिता यशः ॥ ४।३०५ ॥

प्रतापाग्निज्वलद्द्वेषिशलभाः सुलभाः श्रियः ।
रामा अप्यभिरामाङ्ग्यः सङ्गमोस्य तु दुर्लभः ॥ ४।३०६ ॥

इष्टो यस्यैष तस्याहं यो योस्मिन् भक्तः स मय्यपि ।
द्वेष्यो यस्यैष तस्याहमपीत्यत्र न संशयः ॥ ४।३०७ ॥

मामुपस्थितवानेष प्रतिष्ठां काञ्चिदर्हति ।
तदसौ ग्रामणीरस्तु समस्तगुणमण्डले ॥ ४।३०८ ॥

एवं भगवतः प्राप्तप्रसादः सादरैस्ततः ।
पौरैरपि स्तुतश्चक्रे नित्यं वासं पुरेऽत्र सः ॥ ४।३०९ ॥

अन्यदावसरं वीक्ष्याधीश्वरं स व्यजिज्ञपत् ।
विश्वैश्वर्यधुराधुर्य ! जिग्यिरे ये त्वया द्विषः ॥ ४।३१० ॥

तेषु योऽभून्महामोहः स पुनः प्राप्तपाटवः ।
उद्दण्डचण्डदोर्दण्डखण्डितद्वेषिडम्बरः ॥ ४।३११ ॥

अविद्यादुर्गसंसर्गनिरर्गलभुजाबलः ।
पुत्रपौत्रादिविस्तारविडम्बितवडद्रुमः ॥ ४।३१२ ॥

कुसूलकौशैरकृशो वशीभूतजगत्त्रयः ।
भूरिरिभरथाश्वेभभटकोटीभयङ्करः ॥ ४।३१३ ॥

असंख्यसंख्यनिर्व्यूढोत्साहः साहससेवधिः ।
तृणतूलतुलानीतशक्रचक्रिपराक्रमः ॥ ४।३१४ ॥

तपस्विनां तपो निघ्नन् विघ्नं कुर्वन्महात्मनाम् ।
मृद्नन्मनस्विनां मानमहो माद्यति सम्प्रति ॥ ४।३१५ ॥

के हया हस्तिनः के वा हरयः शरभाश्च के ।
के व्यालाः के च वेतालाः पुरस्तस्य तरस्विनः ॥ ४।३१६ ॥

के भूता व्यन्तराः के वा के देवाः के च दानवाः ।
के शक्राश्चक्रिणः के वा पुरतस्तस्य पाप्मनः ॥ ४।३१७ ॥

के कुलीनाः कलावन्तः के स्मार्त्ताः, के च ऋत्विजः ।
के योगाः योगिनः के वा तस्य चण्डधियः पुरः ॥ ४।३१८ ॥

साम्प्रतं त्वां निषेवन्ते वासवाद्या महर्द्धयः ।
बहिर्गतास्तु तस्यैव सेवां सर्वेऽपि कुर्वते ॥ ४।३१९ ॥

निर्भरं ये तपस्यन्ति शून्यारण्यनिवासिनः ।
तेऽपि भीता इवामुष्य पक्षपातं त्यजन्ति न ॥ ४।३२० ॥

जपन्ति नाममन्त्रं ये तव हर्षान्महर्षयः ।
तेषामपि मनस्तस्यावस्कन्दाद्भृशभीरुकम् ॥ ४।३२१ ॥

यैरुत्पातैः क्षणाद्राज्यमन्यस्य भ्रश्यति ध्रुवम् ।
तैरस्योच्छ्रायमाप्नोति निमित्तज्ञः करोति किम् ॥ ४।३२२ ॥

हिंसास्तैन्यमसत्योक्तिब्रह्मद्रोहकुबुद्धयः ।
व्यसनानि भ्रूणघातास्तत्र संततवृत्तयः ॥ ४।३२३ ॥

नागान्नमन्ति निर्जीवान् जीवतो घ्नन्ति निर्दयाः ।
पुण्यं दवाग्निदानेपि मन्यन्ते तत्र केचन ॥ ४।३२४ ॥

आसतां बालिशास्तत्र नानाशास्त्रविदामपि ।
शौण्डानामिव वीक्ष्यन्ते निर्विचाराः प्रवृत्तयः ॥ ४।३२५ ॥

पूज्यन्ते देववत्तत्रोदुम्बरोदूखलादयः ।
अग्रकूरप्रदानाय वायसस्यापि पात्रता ॥ ४।३२६ ॥

पाशाद्वैतंसिकानां ये त्रातुं स्वमपि न क्षमाः ।
ते वयस्तित्तिरिप्रायाः प्रोच्यन्ते परमेश्वराः ॥ ४।३२७ ॥

जायन्ते योषितां कुक्षाववशा ये पुनः पुनः ।
सुरेभ्य इष्यते मूर्खैः पदं तेभ्योऽपुनर्भवम् ॥ ४।३२८ ॥

येषां परिग्रहो दारधनगोधनगोचरः ।
यतन्ते ते गुरूभूय भूयसां भवतारणे ॥ ४।३२९ ॥

अयता अयतेभ्यः स्वं ददाना वस्तु वल्लभम् ।
यद्भवाब्धिं तितीर्षन्ति तदन्धैरन्धकर्षणम् ॥ ४।३३० ॥

न विश्वेऽग्ने: समं शस्त्रमिति वेत्त्यखिलो जन: ।
अजस्रमेधने वह्नेरिन्धनैस्तत्र धर्मधी: ॥ ४।३३१ ॥

यस्य खाद्यं पुरीषाद्यमपि नाचमनाय च ।
पयोपि रोचते तत्र सोऽग्निर्मखभुजां मुखम् ॥ ४।३३२ ॥

त्वग्मात्रस्पृग्जलं बाह्यं मलं छेत्तुमलं स्फुटम् ।
पापक्षय: पय:स्नानै: प्रोक्तस्तत्राङ्गिमर्दनै: ॥ ४।३३३ ॥

संसारवृद्धिरारम्भबाहुल्यं पापधीर्यत: ।
तत्तत्रासूत्र्यतेऽगण्यपुण्यं कन्याविवाहनम् ॥ ४।३३४ ॥

शुकस्य योगिन: सम्यक् पीत्वापि चरितामृतम् ।
गृहाश्रमात्परो धर्मो नास्तीत्येके वदन्त्यहो ॥ ४।३३५ ॥

अहिंसा परमो धर्म इति संसदि वादिन: ।
छागादीन् घ्नन्ति धर्मार्थं तत्र ज्ञा अप्यविज्ञवत् ॥ ४।३३६ ॥

सरघाननिष्ठ्यूतमुद्भूतं जन्तुहिंसया ।
स्नानार्थमर्घ्यते हन्त विबुधानां बुधैर्मधु ॥ ४।३३७ ॥

पतिं मुक्त्वान्यतो यान्ती स्त्री दुष्टेति नये सति ।
पुरन्ध्री दीयते क्वापि पुण्यबुद्ध्या द्विजन्मनाम् ॥ ४।३३८ ॥

निर्विवेका पशुधेनुर्वृषस्यन्त्यपि नन्दनम् ।
अपवित्राशिनी तत्रोच्यते परमदैवतम् ॥ ४।३३९ ॥

पुच्छमूले गवां मूत्रमलक्लेदिनि कुत्सिते ।
वास्यन्ते सत्यपि स्वर्गालये तत्र शठै: सुरा: ॥ ४।३४० ॥

क्वचिद्दैवतयात्रायां यात्रिका जन्मिनां वधम् ।
बुम्बारवं सुरापानमेकाकारं च कुर्वते ॥ ४।३४१ ॥

द्रव: समुद्भवज्जन्तुजातघातनिबन्धनम् ।
रोप्यन्ते तत्र धर्मार्थमीषच्छायासुखार्थिभि: ॥ ४।३४२ ॥

लाक्षा पापा फलं क्रम्याकुलं मूलं सपीलुकम् ।
येषां ते पिप्पलास्तत्र पितृणां तृप्तिकारणम् ॥ ४।३४३ ॥

यथा जलैर्गवादीनां तृप्तिस्तद्वद्बकादिभिः ।
मत्स्यादीनां क्षयो यत्र तत्सरस्तत्र धर्मकृत् ॥ ४।३४४ ॥

कायेन कायिकं कर्म्म भोक्तव्यमिति निश्चये ।
तत्र केप्यादिशन्त्यंहःक्षयं स्वेन स्वलोभिनः ॥ ४।३४५ ॥

धेनुर्गुडतिलस्वर्णमयी मन्त्रेण जीविता ।
विभज्य गृह्यते लुब्धैः पापं भिन्द्धीति वादिभिः ॥ ४।३४६ ॥

मार्यमाणाः कणान् द्वित्रान् क्षेत्रेऽश्नन्ति पतत्रिणः ।
तत्ताद्दक्कर्षणारम्भान्मोक्षस्तत्रेयताप्यहो ॥ ४।३४७ ॥

स्पृष्टमेव करैर्भानोः सर्वं याति पवित्रताम् ।
इति स्मृतिवचस्येके कुर्वन्ति निशि भोजनम् ॥ ४।३४८ ॥

सुरसिन्धोरपि जलं न कल्मषहरं निशि ।
शुध्येयुस्ते तु भुञ्जानाः कथमाचमनोदकैः ॥ ४।३४९ ॥

स्युर्भिन्नगतयो जीवाः कर्मभेदादिति स्फुटम् ।
शठैस्तत्राबला भर्तुर्दह्यन्ते सङ्गमोक्तिभिः ॥ ४।३५० ॥

पृथग्गृहस्थिते ताते दत्तं पुत्रेण याति न ।
तथापि पिण्डदास्तत्र तातेऽन्यभवगे सुताः ॥ ४।३५१ ॥

न स्त्री दुष्यति जारेण धर्म्मशास्त्रस्य वागियम् ।
क्लिश्यद्भिः स्वकलत्राणां त्राणे तत्रावहील्यते ॥ ४।३५२ ॥

ऋषिपत्नीर्हरो गोपीर्गोविन्दस्तापसीं हरिः ।
परस्त्रीसङ्गवैगुण्यं वदन्तोऽपि सिषेविरे ॥ ४।३५३ ॥

तिरश्चामविवेकानामसंज्ञानां महीरुहाम् ।
तन्वानास्तत्र वीवाहं स्वमेवाहुरचेतनम् ॥ ४।३५४ ॥

अरण्यवासिनः शुष्कतृणाहारान्मरुत्पिबान् ।
घ्नन्तो मृगादीन्निर्मन्तूंस्तत्र लोकाः श्ववृत्तयः ॥ ४।३५५ ॥

निर्मांसं भोजनं राज्ञां न स्यादिति वचस्विनः ।
केचित्तत्र भवावर्त्ते मज्जयन्तीश्वरानपि ॥ ४।३५६ ॥

असन्तं केचिदात्मानं मन्यन्ते व्यापकं परे ।
क्षणक्षयिणमन्येऽन्ये चैकं तत्रावलेपिनः ॥ ४।३५७ ॥

राज्यं बलोत्कटं तस्य समन्ताच्चरवृत्तिना ।
वयस्येन विचारेण रहोऽभ्येत्य ममौच्यत ॥ ४।३५८ ॥

त्रिलोक्या नायकोऽसि त्वं सोपि वक्ति स्वमीश्वरम् ।
एकत्र हि प्रतीकारे करवालद्वयं किमु ॥ ४।३५९ ॥

लोकस्त्वां मन्यते नायं सोप्यागत्यान्तरान्तरा ।
बलादाक्रम्य तं स्वाज्ञां ग्राहयत्युग्रशासनः ॥ ४।३६० ॥

द्वैराज्यसङ्कटग्लानं किं कर्त्तव्यतयाकुलम् ।
समुद्धर जगन्नाथ ! लोकं द्वैधं निराकुरु ॥ ४।३६१ ॥

उवाच भगवानेवं वत्स ! स्वच्छमते ! शृणु ।
यत्त्वया गदितं सर्वं तद्ज्ञानान्मन्महे वयम् ॥ ४।३६२ ॥

किं कुर्म्मः कर्म्मसम्बम्धाद्बलवान्मोहभूपतिः ।
वीरैरायोधने क्षुण्णोप्येष दूर्वेव वर्द्धते ॥ ४।३६३ ॥

मोह एव महाशत्रुर्मोह एव महाखलः ।
मोह एव महाव्याधिर्मोह एव महाविषम् ॥ ४।३६४ ॥

या मत्ता मदनातुरेण पुरुषेणान्येन रन्त्वा धृतं,
गर्भं हन्त जिघांसति द्विषमिव क्षारोग्रतैलादिभिः ।
जातं तं मलवत्त्यजत्यविकलस्वार्थैकनिष्ठाविदु-
स्तामात्यन्तिकवत्सलां हि जननीं धिग्मोहविस्फूर्जितम् ४।३६५

सूनुत्वे सदृशेऽपि तत्र बहुलस्नेहो भवेद्यः सुतो,
विक्रान्तो व्यंवसायवानुपचितश्रीसंहतिर्नेतरे ।
सत्पुत्रेऽपि धनांशमिच्छति शपत्याक्रोशति द्वेष्टि य-
स्तं स्नेहोज्ज्वलमामनन्ति जनकं धिग्मोहविस्फूर्जितम् ४।३६६

या दृष्टापि मनोहरी धनहरी पाणिग्रहायादृता,
स्पृष्टा प्राणहरी प्रियं परिचरत्यास्वार्थलाभावधि ।
दूरक्षा दरकारणं तरलदृक् शङ्कास्पदं शाठ्यभूः,
स्त्रीं तामप्यधिगत्य नृत्यति जनो धिग्मोहविस्फूर्जितम् ॥ ४।३६७ ॥

यो गर्भार्त्तिकरोथ यौवनहरो मातुर्मलश्लेष्मविण्-
मूत्रैर्लिम्पति विब्रवीति पितरौ वश्यौ युवा योषितः ।
तौ वृद्धौ परिभूय तत्परिचितां लक्ष्मीं भुनक्ति स्वयं,
तं सूनुं सुखहेतुमिच्छति जनो धिग्मोहविस्फूर्जितम् ॥ ४।३६८ ॥

नायाताः सह ये प्रयाणसमये न स्युः समञ्चारिण-
श्छेत्तुंजन्मजरात्ययादिविपदो नेष्टं च दातुं क्षमाः ।
धात्रीधामधनार्थमाशु कलहायन्ते बलाद्बन्धुभि-
स्तैरक्ताबहु मन्यते न सुकृतं धिग्मोहविस्फूर्जितम् ॥ ४।३६९ ॥

यन्मज्जामलमूत्रमांसमलिनं यद्धौतमप्यम्बुभिः,
शुद्धिं नैति सदा ददाति वसतिं भूयिष्ठरोगद्विषाम् ।
यद्यत्नादपि पालितं न पदमप्यन्वेति नाथं विप-
द्यङ्गस्यास्य कृते क्रियेत दुरितं धिग्मोहविस्फूर्जितम् ॥ ४।३७० ॥

नानारम्भनिबन्धनं तनुमनःक्लेशार्जितं वैरकृद्-
भ्रातृणामपि दम्भलोभवितथद्रोहादिपापास्पदम् ।
भूपालानलचौरसंभवविभयं यद्वार्द्धिवीच्चीचलं,
तत्क्षेत्रेषु धनं व्ययन् लसति नो धिग्मोहविस्फूर्जितम् ॥ ४।३७१ ॥

सर्वेप्यमी यद्यति नेदृशाः स्युस्तथापि शङ्क्या ननु धीधनानाम् ।
ससर्प्पनिःशेषबिलं न सद्म तथापि भीयेत बिलं विलोक्य॥ ४।३७२ ॥

सुतरः सागरश्चण्डवातोद्धूतोर्मिसंकुलः ।
सुशमः शुष्ककक्षान्तर्दीप्यमानो दवानलः ॥ ४।३७३ ॥

सुरक्षं खलु रक्षोपि बुभुक्षाक्षामकुक्षिकम् ।
दुरपोहस्तु सर्वेभ्यो मोह एव ततः सताम् ॥ ४।३७४ ॥

भर्तुर्गुणेन सर्वेऽस्य सेवका अपि दुर्मराः ।
नारका इव जीवन्ति हता अपि पुनः पुनः ॥ ४।३७५ ॥

अयं सर्वगतोऽनादिरनन्तश्च प्रवाहतः ।
व्यक्त्यानन्तः क्वचित्सान्तोप्यनादिः सर्वतः पुनः ॥ ४।३७६ ॥

क्वचिद्भवसि तत्र त्वमनाद्यन्तः प्रवाहतः ।
स्वं स्वादिमन्तमन्तं च व्यक्त्या वत्स ! विचारय ॥ ४।३७७ ॥

अयमस्य च ये भक्तास्ते सर्वे बहुरूपिणः ।
एकैकशः प्रतिप्राणिपृष्ठलग्ना महाद्विषः ॥ ४।३७८ ॥

त्वं च ते भाविनो भक्ता ये तेऽपि बहुरूपिणः ।
सम्यग्दृशैव संबन्धशालिनो न परैः पुनः ॥ ४।३७९ ॥

ततस्त्वत्पाक्षिकेभ्योऽमी श्रुतेऽनन्तगुणाः स्मृताः ।
सर्वेप्येते कथं जय्यास्त्वया बलवताप्यहो ॥ ४।३८० ॥

तदलं चिन्तयाप्येषां साधो ! स्वार्थं प्रसाधय ।
आपन्नजनतात्राणात्परः स्वार्थो हि कस्तव ॥ ४।३८१ ॥

जानामि जगदालोक्य हन्त मोहकदर्थितम् ।
एतं सर्वापदां मूलमुन्मूलयितुमिच्छसि ॥ ४।३८२ ॥

जीवत्युन्मूलितोप्येष गुडूचीस्तम्बवत्पुनः ।
जनार्तिशमनोपायं परं किञ्चन ते ब्रुवे ॥ ४।३८३ ॥

अस्ति लोकान्तदेशस्थं निर्व्वाणं नाम पत्तनम् ।
न केपि विविधान् क्लेशान् सहन्ते तदवाप्तये ॥ ४।३८४ ॥

वासो भव्यैरपि स्वल्पैरेव तत्राधिगम्यते ।
लभते हेमसंबन्धं न सर्वोऽपि मणिगणः ॥ ४।३८५ ॥

नास्मिन् जन्मजरावसानविपदो नो गर्भवासव्यथा,
न श्रीयोषिदपत्यबन्धुवशता न स्रोतसां चापलम् ।
नाधिव्याधिवियोगशुक्परिभवा नो दौस्थ्यदास्ये न भी-
र्नापि क्षुन्न तृषा न मत्सरिगिरो नार्त्तिर्न शीतातपौ ॥ ४।३८६ ॥

केवलं केवलज्ञानजुषस्तिष्ठन्ति संततम् ।
सुधाघ्राता इवात्मानस्तस्मिन्नाह्लादनिर्भराः ॥ ४।३८७ ॥

यथा तथैव धावन्तो मोहभीतास्तदाशया ।
यान्ति मोहपुरीमेवानध्वज्ञा अध्वगा इव ॥ ४।३८८ ॥

अजानन्तोऽपि तन्मार्गमुक्त्वा केचन वञ्चकाः ।
भ्रमयन्ति भवारण्य एव विश्वासिनं जनम् ॥ ४।३८९ ॥

सम्यग्ज्ञानक्रिये तस्य पन्था वैराग्यसंगते ।
स एवासादयेत्तं यो विश्वस्तोऽस्माकमुक्तिषु ॥ ४।३९० ॥

गतोऽप्यामुक्ति निर्नाथो जनो मोहेन वाल्यते ।
पोतोऽब्धेर्लब्धतीरोऽपि भ्राम्यते वायुना न किम् ॥ ४।३९१ ॥

ये केचित् मोहतो भीताः पत्तनं तद्यियासवः ।
त्वं तेषां पथि पान्थानां भव रक्षैकदीक्षितः ॥ ४।३९२ ॥

त्वयि सन्निहिते यान्तु तेऽरिभ्यो निर्भयाः शिवम् ।
भीतिर्भवति भौजङ्गी किमारूढगरुत्मताम् ॥ ४।३९३ ॥

पुरापि त्वमिवानेके विवेका मामुपागताः ।
अनयैव दिशा तेऽपि स्वार्थसिद्धिं वितेनिरे ॥ ४।३९४ ॥

यदादिष्टं भगवता विवेकः प्रत्यपादि तत् ।
न रुद्धप्रसरं वज्रमिव सत्त्वं हि दोष्मताम् ॥ ४।३९५ ॥

तस्य वीरचरित्रेण तुष्टो लोकैकनायकः ।
पुण्यरङ्गाभिधानस्य पुरस्य प्राभवं ददौ ॥ ४।३९६ ॥

प्रभुस्तं स्माह विमलबोधो यः श्वशुरस्तव ।
तमेव नगरे स्वीये कुर्यास्त्वं दाण्डपाशिकम् ॥ ४।३९७ ॥

सेवकाः सन्ति ये केचित्तव मोहस्य चान्तिके ।
नैकरूपकरीं विद्धि सिद्धिमेषां स्वभावतः ॥ ४।३९८ ॥

ततोऽसौ वनपालत्वममुञ्चन्मामके वने ।
आदरीता तवाप्युच्चैस्तलारक्षकतां पुरे ॥ ४।३९९ ॥

अथासाद्य जिनेशस्य निर्देशं देशनानिधेः ।
तद्दत्तकतिचिद्द्रव्यभटमात्रपरिच्छदः ॥ ४।४०० ॥

देवध्यानध्वजालोकाभिव्यञ्जितसमागमः ।
गुरूपदेशवादित्रध्वनिवाचालिताम्बरः ॥ ४।४०१ ॥

मात्रा पुनः पुनर्वीक्ष्यमाणः सानन्दया दृशा ।
प्रेमद्रुमवनावन्या प्रणयिन्या समन्वितः ॥ ४।४०२ ॥

लीलयैव ददद्दानमर्थिनामर्थनावधि ।
गीयमानगुणग्रामो ग्रामणीभिर्महात्मनाम् ॥ ४।४०३ ॥

विवेकस्तत्पुरं प्राप विद्यासिद्ध इव क्षणात् ।
रूपेण केनचिद्भर्तुरप्यास्थानमनुत्सृजन् ॥ ४।४०४ ॥

महाजनेन तत्रत्येनानन्दोत्फुल्लचक्षुषा ।
साश्चर्यं वीक्षितोऽविक्षत्तत्पुरं सपरिच्छदः ॥ ४।४०५ ॥

तत्र चक्रे तलारक्षं श्वशुरं स्वं रयान्नृपः ।
न भर्तुरतिवर्त्तन्ते वचनं हि विशारदाः ॥ ४।४०६ ॥

ये दयारहिता दाण्डाजिनिका दम्भवृत्तयः ।
बैडालव्रत्तिकास्तीव्रबुद्धयो बकचेष्टिताः ॥ ४।४०७ ॥

ते न तत्र पुरे प्रापुः प्रवेशं पापचारिणः ।
उन्निद्रेऽस्मिंस्तलारक्षे श्वानो धाम्नीव नायके ॥ ४।४०८ ॥

तत्र राज्यं स भुङ्क्ते स्म मुक्तेर्मार्गं विमार्गयन् ।
जनयन् जननीं तृप्तां तत्तादृक्चरितामृतैः ॥ ४।४०९ ॥

यदा यदाऽभवत्साक्षि जङ्घालं स्नेहलं मनः ।
तदा तदानशे वृद्धिं राज्यं मोहविवेकयोः ॥ ४।४१० ॥

ध्यायन् भाग्यकलां सुतस्य सचिवोऽचित्रीयतान्तर्भृशं,
मायाद्याः कलुषं मुखं विदधिरे तिस्रोपि तस्योदये ।
तासु म्लानिमुपागतासु सुमतिः प्रापत्परं पाटवं,
राजापि श्लथबन्धनोऽधित चिरात्सौख्यं तदाश्लेषजम् ॥ ४।४११ ॥

## ॥ पञ्चमोऽधिकारः ॥

इतश्च मोहभूमीभृदविद्यानगरीस्थितः ।
कदाचित्सुहृदा साकं राज्यसूत्रमचिन्तयत् ॥ ५।१ ॥

स स्माह मोह ! सर्वोस्ति बन्धुवर्गो वशे तव ।
मन्दासुतमपास्यैकं विवेकं तं वराककम् ॥ ५।२ ॥

पूर्वानुभूततद्बाहुबलोन्मीलच्चमत्कृतिः ।
निश्वस्य गतसर्वस्व इव मोहो जगाद तम् ॥ ५।३ ॥

चार्वाकः स वराको न वराकोऽहं तदग्रतः ।
स मां कुरङ्गवद् द्वीपी तापयामास भूरिशः ॥ ५।४ ॥

ध्रुवं मूर्खो मनोमन्त्री यज्जीवन्तं मुमोच तम् ।
शिशुमप्युत्कटं मत्वा निघ्नन्ति हृदयालवः ॥ ५।५ ॥

जीवत्येकोपि विद्वेषी येषां तेषां कुतः सुखम् ।
स्थाय्येकोप्यामयो यस्य तस्याङ्गे निर्वृतिः कुतः ॥ ५।६ ॥

सति वैरिणि ये मूढाः स्वपन्ति सुखनिद्रया ।
ते मृता एव लग्नाग्निगेहान्तरिव शायिनः ॥ ५।७ ॥

क्षुद्रोऽयमिति संचिन्त्य मा विश्वसिहि वैरिणः ।
मशकः कृशकायोऽपि हन्त हन्ति मतङ्गजम् ॥ ५।८ ॥

अल्पोप्युपेक्षितो वैरी काले स्यात्सर्वनाशकृत् ।
न ध्वंसयति किं सौधं तनुरप्यङ्कुरस्तरोः ॥ ५।९ ॥

अमित्रो दूरवस्थोऽपि शङ्कनीयो मनीषिभिः ।
प्राणानुपलपिष्टोऽपि हरत्येव हलाहलः ॥ ५।१० ॥

सन्तः केपि क्वचित्सन्ति येषामस्म्यहमप्रियः ।
गूढशौर्या भविष्यन्ति ते तेन सह संगताः ॥ ५।११ ॥

आस्तां वीरोऽल्पवीर्योऽपि दुर्ग्रहो बहुसंहतः ।
प्रभूततन्तुस्तोमान्तर्व्यूतो वस्त्रे कचो यथा ॥ ५।१२ ॥

यद्यसौ जातु संप्राप्तः पुरीं प्रवचनाभिधाम् ।
शक्यः केन गृहीतुं तत्केशरीव दरीगतः ॥ ५।१३ ॥

कदाचिद्वाचि लग्नश्चेदसौ तद्धर्तुरर्हतः ।
ततः पीतामृतो दैत्य इव केन विशस्यताम् ॥ ५।१४ ॥

राजनीतिरियं सम्यक् स्वहस्तेन हतो वरम् ।
न पुनर्गृहजो दुर्हृदुपेक्ष्यः परसद्मगः ॥ ५।१५ ॥

यावच्छुद्धिं न जानाति जीवतोऽस्य मृतस्य वा ।
तावत् मोहः ससन्देहशल्यः क्व लभतां सुखम् ॥ ५।१६ ॥

ततः प्रेष्य चरान् प्रेक्ष्य जगतीं सचराचराम् ।
लभेयं तदुदन्तं चेत्तद्भवेयं समाहितः ॥ ५।१७ ॥

आकार्य कार्यविन्मोहः स्वामिभक्तान्विचक्षणान् ।
आदिशद्दम्भपाखण्डकुश्रुतादीश्वरांस्ततः ॥ ५१८ ॥

भुवं भ्रमं भ्रमं भो भो निभालयत भाक्तिकाः ।
उपलब्धुं विवेकस्य तस्योदन्तं दृढाग्रहाः ॥ ५१९ ॥

आदेशं स्वामिनः प्राप्य भटा भुजबलोत्कटाः ।
भूयसीं बभ्रमुर्भूमिं ते वनीमिव वानराः ॥ ५२० ॥

यत्नाद् गवेषयामासुर्विवेकं ते पदे पदे ।
यावद्वेदमुदन्तं च जनं तस्यान्वयुञ्जत ॥ ५२१ ॥

लेभिरे न पुनः शुद्धिं विवेकस्य महात्मनः ।
स ह्यल्पसाधुहृत्कोणवासी केनोपलक्ष्यते ॥ ५२२ ॥

ततश्च्युतेषव इव व्याकुलीभूतचेतसः ।
ययुर्बाह्यां भुवं यावत्पुण्यरङ्गपुरस्य ते ॥ ५२३ ॥

निषण्णा निश्चलीभूय दुरीहागर्त्तनिश्रयाः ।
तलारक्षस्य तेऽशृण्वन्निति डिण्डिकृतो वचः ॥ ५२४ ॥

हंहो सम्यक्त्वसौशील्यसमाधिप्रमुखा भटाः ।
मा प्रमादिष्ट भवतादृताः पश्यत पश्यत ॥ ५२५ ॥

एति मिथ्यात्वधूर्तोऽयं वार्यः सुश्रुतिहेतिभिः ।
विविक्षुर्नगरे वध्यः सोऽयमुन्मादतस्करः ॥ ५२६ ॥

अयमानीयतां वध्यभुवं दुर्भावदुर्जनः ।
असावसञ्चरो वैरी न मोच्यः शूलिकां विना ॥ ५२७ ॥

सर्वेऽप्येवंविधा मोहस्यैव सेवापरायणाः ।
विवेकस्वामिनादिष्टा हन्तुं तत्किं विलम्ब्यते ॥ ५२८ ॥

विवेकशुद्धिलाभेन तलारक्षरवेण च ।
ततो हर्षविषादाभ्यां युगपत्ते विडम्बिताः ॥ ५२९ ॥

निवृत्तेऽपि तलारक्षतुमुले ते मलीमसाः ।
नामुच्यन्त भिया यस्मात्परभूः परिभूतये ॥ ५।३० ॥

मृगा इव ज्वलत्कक्षे ते तत्र स्थातुमक्षमाः ।
व्यावृत्य सत्वरं जग्मुः सभां मोहमहीभुजः ॥ ५।३१ ॥

ततस्ते जीवितंमन्याः प्राप्तार्णवतटा इव ।
प्रणम्य स्वामिनं दीना यावत्किंचिद्बभाषिरे ॥ ५।३२ ॥

तावन्मोहो जगौ रे रे मा मा वोचत वोचत ।
मुखमेव व्यनक्त्येतद्युष्माकमकृतार्थताम् ॥ ५।३३ ॥

परं दम्भभटो योऽभूद्भवतां पारिपार्श्विकः ।
स किं न दृश्यते तत्रादृष्टे मे कम्पते मनः ॥ ५।३४ ॥

ममैश्वर्यं तदायत्तं स हि मे दक्षिणो भुजः ।
जातुचित्तस्य वीरस्य मा श्रौषं दुर्दशामहम् ॥ ५।३५ ॥

उत्पाताः केपि नाभूवन् दुःस्वप्नमपि नेक्षितम् ।
नेक्ष्यते राज्यसर्वस्वं स हि विस्मयते मनः ॥ ५।३६ ॥

तथोदित्वा स्ववृत्तान्तं सर्वं व्यावर्तनावधि ।
बह्वारम्भस्य दम्भस्योदन्तं वक्तुं प्रतुष्टुवुः ॥ ५।३७ ॥

राजंस्तदा तलारक्षातङ्के दम्भो जगाद नः।
भो भो वलध्वमल्पो हि गणः परपथे भिये ॥ ५।३८ ॥

अहं पुनर्विवेकस्य प्रविश्य नगरान्तरा ।
यथा तथा हरिष्यामि शुद्धिमालोक्य मूलतः ॥ ५।३९ ॥

एवमेव निवर्त्ते चेदकृतार्थोऽनया भिया ।
तादृक् स्वामिप्रसादानां तदा स्यामनृणः कथम् ॥ ५।४० ॥

इत्याकर्ण्य महीपालो विलक्षः शोकशङ्कुना ।
आकाशे लक्ष्यमाबध्य निजगाद सगद्गदम् ॥ ५।४१ ॥

नानाधियामवष्टम्भस्तम्भसाम्राज्यसद्मनः ।
अमोघारम्भसरम्भ ! दम्भ ! त्वं विजयी भव ॥ ५।४२ ॥

एह्येहि दर्शनं देहि प्रसादानृण्यमेव ते ।
परमण्डलपारीन्द्र ! किमेतदुदितं त्वया ॥ ५।४३ ॥

याते जम्बुकतां वैरिभीतभृत्यकदम्बके ।
सत्त्वधार ! त्वयैकेन तत्र पञ्चाननायितम् ॥ ५।४४ ।

प्राणानपि तृणीयन्ति स्वामिनोऽर्थे सुसेवकाः ।
सेवारीतिरियं सर्वैः श्रुता त्वयि पुनः स्थिता ॥ ५।४५ ॥

त्वामेवालम्ब्य भूपाला जयन्ति युधि शात्रवम् ।
त्वां विना लौकिकी सिद्धिर्भवन्तो क्वापि नेक्षिता ॥ ५।४६ ॥

रणे राजकुलेऽरण्ये हट्टे नाट्ये जलस्थले ।
त्वामेवैकं पुरस्कृत्य लभन्ते सम्पदं जनाः ॥ ५।४७ ॥

त्वयैकेन विना वीर ! सभा मेऽजनि निष्प्रभा ।
मुक्तास्रक् तरलेनेव प्रकृष्टतरतेजसा ॥ ५।४८ ॥

एवं शोकातुरे मोहराजे क्रोधादयो भटाः ।
स्वयमेव महासत्त्वा दम्भशुद्ध्यै दधाविरे ॥ ५।४९ ॥

ते सम्प्राप्ता विवेकस्य पुरः परिसरावनिम् ।
प्रवेष्टुमशकन्नान्तस्तस्या वारां निधाविव ॥ ५।५० ॥

एवमेव स्फुरन्माना वलमानास्त्रपामहे ।
इति कांश्चिद्विवेकीयांस्ते बन्दीचक्रिरे जनान् ॥ ५।५१ ॥

क्रोधोऽग्रहीत् कुरुट्यादीन्मानो बाहुबलेर्निभान् ।
लोभः केसरिसाध्वादीन् रथनेम्यादिकान् स्मरः ॥ ५।५२ ॥

तैर्धूर्तैस्तेषु दृप्यत्सु व्यावृत्तेष्वथ केचन ।
वीरा बाहुबलिप्राया नंष्ट्वा स्वस्थानमाययुः ॥ ५।५३ ॥

इतरे कुरुटिप्रायाः सविशेषं नियन्त्रिताः ।
तैर्निन्यिरे पुरो मोहमहीभर्तुर्महाभयाः ॥ ५।५४ ॥

एते विपक्षपक्षस्था इति निक्षिप्य तत्क्षणम् ।
तेन दुर्गतिकारायां कृतास्ते क्लेशभाजनम् ॥ ५।५५ ॥

तथापि भूभुजो दम्भशुचा नाभाजि तानवम् ।
लेष्टुलाभेन किं रत्नभ्रंशदुःखं विलीयते ॥ ५।५६ ॥

भूयस्तथैव भूकान्ते शोकाक्रान्ते प्रजल्पति ।
सहसा दम्भ आयात एव दृष्टः सभाजनैः ॥ ५।५७ ॥

तं दृष्ट्वा हर्षहल्लेखस्नेहौत्सुक्यादिभिर्नृपः ।
प्रावृषीव नभोवर्णैर्भावैः संकीर्णतां गतः ॥ ५।५८ ॥

राज्ञा स प्रणमन्नेवोत्थाप्यालिङ्ग्य च निर्भरम् ।
पप्रच्छे स्वागतं कायकुशलं च ससंभ्रमम् ॥ ५।५९ ॥

सोप्यूचे स्वामिभक्तस्य मम नापायसंभवः ।
क्लेशः केशरिणां किं स्यादिन्दुनाङ्गीकृते मृगे ॥ ५।६० ॥

शृणु स्वामिन्नथैतिह्यं यथादृष्टं ब्रवीमि ते ।
यदा तत्र तलारक्षभियाऽमी वालिता मया ॥ ५।६१ ॥

पुरं सुरक्षितं दृष्ट्वा रक्षकस्य च तीव्रताम् ।
तदा प्रवेष्टुं नगरे नानोपायान् व्यचिन्तयम् ॥ ५।६२ ॥

उपायान्तरमप्रेक्ष्य प्रत्युत्पन्नमतित्वतः ।
सोहं बभूव तद्वासिभूरिधार्मिकवेषभाक् ॥ ५।६३ ॥

यतिवेषस्ततः क्वापि क्वापि श्रावकवेषभृत् ।
निःशङ्कोहं पुरेऽभ्राम्यं गृहीव निजधामनि ॥ ५।६४ ॥

तत्र चारित्रवेषस्थो भावनावन्ध्यमानसः ।
केवलाजीविकाहेतोर्व्रतकष्टानि सोढवान् ॥ ५।६५ ॥

क्वचिदुच्चासनारूढः सभान्तः सूरिमुद्रया ।
बन्दिभ्यः स्वान् गुणान् श्रुत्वाऽहसं स्वचरितैर्हृदि ॥ ५।६६ ॥

भुक्त्वा रहसि तीर्थादावजल्पं स्वमुपोषितम् ।
ज्ञानमस्फोरयं पृष्ट्वा परमज्ञः स्वयं क्वचित् ॥ ५।६७ ॥

आवश्यकादिकृत्यानि रात्रौ कुर्वन् यथा तथा ।
दिवाऽकार्षं विशिष्टानि लोके स्यां श्लोकभागिति ॥ ५।६८ ॥

अन्तर्मत्सरपूर्णोऽपि संकोचं नाटयन् दृशोः ।
भवभीत इवाकार्षं सभायां समदेशनाम् ॥ ५।६९ ॥

प्रहर्तुमुद्यतोप्यन्यं साधुं दृष्ट्वा जनागमम् ।
मुने ! मन्यस्व मा कार्षीस्तपांसीदृश्यऽदोऽवदम् ॥ ५।७० ॥

दिवा धर्मध्वजीभूत्वा श्राद्धवृन्दमवन्दयम् ।
कुस्थानेष्वभ्रमं रात्रौ कर्पासोष्णीषधारकः ॥ ५।७१ ॥

वैरिनिर्यापणाहेतोर्हेतीरूर्वोरधां क्वचित् ।
पठन् लुठन् गुरुपदोः शठ एव न भावितः ॥ ५।७२ ॥

श्राद्धवेषः क्वचित्कूटतुलामानाद्यतिक्रमान् ।
निन्दित्वाट्टेषु विश्वस्तममुष्णां ग्राहकं जनम् ॥ ५।७३ ॥

साध्वाश्रयं गतः क्वापि महामन्त्रं जपन्मुखे ।
निशि साधूपधीनिभ्यधनग्रन्थीनपाहरम् ॥ ५।७४ ॥

धौतप्रौतधरश्चैत्यमागत्य मुखकोशभृत् ।
अर्च्चाः शैलीः समभ्यर्च्याऽहरं धातुमयीः पुनः ॥ ५।७५ ॥

शठश्राद्धोऽन्यदानीतः सौधं साधर्मिकैरहम् ।
गाढं गौरवितो रात्रौ तत्सर्वस्वमलुण्टयम् ॥ ५।७६ ॥

धनाय लोभतः क्वापि बन्धून् बन्दीकृतान् वदन् ।
मृषा वनीपकीभूयायाचं प्रतिगृहं धनम् ॥ ५।७७ ॥

विचित्रभङ्गिभिः क्रीडन्नेवं तत्राकुतोभयः ।
यथाद्राक्षं पुरं सर्वं तथा विज्ञापयामि ते || ५।७८ ||

तस्मिन्नियमबन्धोऽस्ति पौररक्षार्थमुच्छ्रितः ।
प्राकारः सारसद्‌वृत्तकपिशीर्षालिमालितः || ५।७९ ||

अन्तःसंक्रान्तश्रीकान्तप्राकारास्ताघतामिता ।
परैर्दुराक्रमा तत्र खातिका पुण्यवासना || ५।८० ||

जिनाज्ञापायसंस्थानाविपाकविचयात्मिकाः ।
नगरश्रीमुखाकाराश्चतस्रोऽत्र प्रतोलयः || ५।८१ ||

आवासाः सत्परीणामाः साधूनां स्थितिहेतवः ।
शुभभावसुधाधौता उच्चोच्चतरभूमयः || ५।८२ ||

वर्णा अष्टादश ब्रह्मभेदा भान्ति व्यवस्थया ।
मघोनामपि मान्योऽस्ति सङ्घस्तत्र महाजनः || ५।८३ ||

योगियोग्यासनान्यट्टाः पुण्यपण्यौघपूरिताः ।
समताविशदा रथ्या निर्विशेषाः स्वके परे || ५।८४ ||

छायाभिरामा आरामा आलयाद्या बहिर्गुणाः ।
येषु क्रीडन्त्यलं पुण्या भोगिनः प्रमदान्विताः || ५।८५ ||

प्रत्योकः कूपिकास्तत्र सरसा ग्रन्थवीथयः ।
उच्चारोहकराः क्रीडाशैलन्ति विनया दश || ५।८६ ||

पयः पातुं परिक्षिप्तं नवभिर्गुप्तिपालिभिः ।
तत्र ब्रह्मसरः फुल्लकमलं हंससौख्यदम् || ५।८७ ||

या प्रभुर्बलिनाराद्धा सकलक्लेशवारणे ।
सा सदा यतनावासा विरतिः पद्रदेवता || ५।८८ ||

अमारिघोषणा क्वापि क्वापि साधुनिमन्त्रणा ।
क्वचित्तूर्यत्रयं चैत्ये क्वचिद्‌गुरुगुणस्तुतिः || ५।८९ ||

क्वापि श्रुतानुयोगश्च क्वापि सद्गुरुदेशना ।
क्वचित्स्वाध्यायनिर्घोषः स्मारणा वारणा क्वचित् ॥ ५।९० ॥

एवं देव ! पुरे तत्रीखिले कोलाहलाकुले ।
अविद्यायाः पुरस्ते च क्वापि नामापि न श्रुतम् ॥ ५।९१ ॥

भूयान् भवत्पुरस्येवाभोगस्तस्य न विद्यते ।
पुरन्दरपुरस्येव शोभा पुनरनीदृशी ॥ ५।९२ ॥

स्त्यानर्द्धिनिद्रया सुप्ता अनन्ता अत्र जन्तवः ।
अस्वप्न इव न स्वप्नक् तत्र लोकः सचेतनः ॥ ५।९३ ॥

कार्ये स्वल्पेऽपि लोकोत्र प्रायः कलिकुतूहली ।
कलेर्नामापि नो तत्र शुश्रुवे कृतवन्मया ॥ ५।९४ ॥

बद्धरुद्धहताक्रुष्टमुष्टप्राया जना इह ।
बध्यते कोपि केनापि तत्र युग्मिभुवीव न ॥ ५।९५ ॥

क्रन्दन् रुदन् वदन् दीनं दुःखी लोकोऽत्र दृश्यते ।
धयन्निव सुधां तत्र जनः सर्वः समाधिभाक् ॥ ५।९६ ॥

राजात्र सर्वमादित्सुर्लोकः किञ्चिन्न दित्सति ।
तत्र राज्ञः प्रजानां च सर्वेषामेकचित्तता ॥ ५।९७ ॥

विभवं वैभवं क्लेशेनोपार्ज्य सुखकाङ्क्षिणः ।
अक्लेशाः प्रसुखाः पौरान् स्वांस्तत्रत्या हसन्त्यलम् ॥ ५।९८ ॥

धनं धरान्तर्निहितं जनैरत्र विनश्यति ।
विहारव्याजतो व्यक्तमपि तत्र न याति तत् ॥ ५।९९ ॥

कष्टं ये पालिताः पुत्रास्तेपि पित्रोरिह द्विषः ।
विदेश्या अपि संप्राप्तास्तत्र सोदरतां गताः ॥ ५।१०० ॥

उपक्रमे कृतेप्यत्र लाभः संशयगोचरः ।
लाभः सुनिश्चितस्तत्रोपक्रान्तं चेन्मनागपि ॥ ५।१०१ ॥

द्विगुणेनापि लाभेन हर्षोत्र व्यवहारिणाम् ।
लाभे तत्राल्पयत्नेनानन्ते नोत्सेकभाग् जनः ॥ ५।१०२ ॥

ग्राहकेभ्यो भवन् लाभस्तत्र केनोपमीयताम् ।
दत्तैर्यन्माषकैर्लभ्याश्चञ्चत्काञ्चनकोटयः ॥ ५।१०३ ॥

ये महत्त्वाधिका राज्ये शक्रचक्र्यादयस्तव ।
तत्रत्यतनुऋद्धीनामपि ते दास्यकामिनः ॥ ५।१०४ ॥

एवं नेत्रोत्सवं तन्वन्नगरश्रीनिरीक्षणैः ।
ययौ राज्यसभावस्थोऽन्यदा राजसभामहम् ॥ ५।१०५ ॥

तत्र सद्भावसौधान्तः साधुसंगमपर्षदि ।
सत्त्वसिंहासनासीनमदीनद्युतिमण्डलम् ॥ ५।१०६ ॥

हृत्पाटवधृतश्वेतगुर्वादिशोष्णवारणम् ।
श्रीह्रीवारवधूत्क्षिप्ताचारचारिमचामरम् ॥ ५।१०७ ॥

वेत्रिणा कर्म्मविवरेणोपानीतमहाजनम् ।
ब्रह्मविद्गायनैर्गीयमानगौरगुणव्रजम् ॥ ५।१०८ ॥

शुभलेश्यानटीदब्धनाटकालोकलालसम् ।
निश्चयव्यवहाराक्षिपातज्ञातजगत्त्रयम् ॥ ५।१०९ ॥

अष्टभिर्धीगुणैर्वण्ठैः सोत्कण्ठैः सेवितक्रमम् ।
गुणाभरणसंभारसंभवाभासुभासुरम् ॥ ५।११० ॥

कृतषड्त्रिंशदाचार्यगुणस्मृत्यायुधश्रमम् ।
खारतर्यास्फुरत्खड्गदण्डदोर्दण्डमण्डनम् ॥ ५।१११ ॥

विचारबालमित्रेण सममैक्यमिवागतम् ।
विवेकाख्यं क्षमापालमदर्शं दर्शनप्रियम् ॥ ५।११२ ॥

तस्याग्रमहिषी तत्त्वरुचिर्नाम सदा शुचिः ।
आस्यमालोकते यस्याः प्रेम्णा प्रेयान् पदे पदे ॥ ५।११३ ॥

कार्यारम्भे स्त्रियो वक्त्रं यः पश्येत्पुरुषः स किम् ।
इत्युदित्वोपहासेन मोहः प्रोचे ततस्ततः ॥ ५।११४ ॥

सोवग्भवविरागोस्य प्रथमस्तनयो नयी ।
प्रभुपादैर्जिता येन जन्तवः के न धीरिताः ॥ ५।११५ ॥

अपरौ तस्य संवेगनिर्वेदौ जयिनौ सुतौ ।
एकैकशो जगत्सृष्टिसमूलोन्मूलनक्षमौ ॥ ५।११६ ॥

चतस्रोस्य कृपामैत्रीमुदितोपेक्षया सह ।
नन्दन्यस्तरसा वीररसाधिष्ठायिका इव ॥ ५।११७ ॥

सम्यग्दृष्टिर्महामात्यस्तस्य सद्भिः प्रशस्यते ।
अपि प्रसादितो राजा वृथा यद्दर्शनं विना ॥ ५।११८ ॥

मार्दवार्जवसंतोषाः सहिताः प्रशमेन ते ।
सामन्तास्तस्य साम्राज्यवंशावष्टम्भरज्जवः ॥ ५।११९ ॥

तस्य राज्यं च सप्ताङ्गं सप्ततत्त्वावबोधतः ।
दानादिधर्मभेदाश्च चतुरङ्गचमूबलम् ॥ ५।१२० ॥

बोधाख्यया तलारक्ष उत्साहो दण्डनायकः ।
कोशः सदागमः कोष्टागारश्च गुणसंग्रहः ॥ ५।१२१ ॥

क्षयोपशमिको भावः शौल्कशालिकतां गतः ।
न्यायसंवादनामास्य श्रेष्ठी सर्व्वजनप्रियः ॥ ५।१२२ ॥

पञ्चापि व्यवहारास्ते तस्य कारणिका नराः ।
सामायिकादिषट्कर्मानुष्ठानाख्यः पुरोहितः ॥ ५।१२३ ॥

रसभावविदस्तस्य सूदा धर्म्मोपदेशकाः ।
प्रायश्चित्ताख्यया नीराध्यक्षः कल्मषशुद्धिकृत् ॥ ५।१२४ ॥

समाधिजननो भावः शय्यापालः प्रकीर्तितः ।
स्थगीधरः स एवास्य धर्मरागविवर्द्धनः ॥ ५।१२५ ॥

ये शुभाध्यवसायाख्या भटास्तस्य बलोत्कटाः ।
कोटीशः सन्ति सन्तोपि तद्बलं वक्तुमक्षमाः ॥ ५।१२६ ॥

अमी सर्वेपि निष्णाताः ख्याता ध्राता न संयुगे ।
अविसंवादिनो वृत्तिं विना स्वाम्यनुवर्तिनः ॥ ५।१२७ ॥

एवं विवेकभूपस्य पश्यतः संसदं मम ।
आगत्य सहसा बोधारक्षः पूच्चक्रिवानिति ॥ ५।१२८ ॥

मयि सन्निहितेऽपि स्वान् पौरान् मोहस्य सैनिकाः ।
बकास्तिमीनिवाकस्मात्कांश्चनादिषत प्रभो ॥ ५।१२९ ॥

केचिद्द्रवलिरे तेषु तैरात्ता एव केचन ।
अहो साहसिकारब्धा मोघीभवति न क्रिया ॥ ५।१३० ॥

श्रुत्वा विवेकवीरस्तत्कोपकम्प्रोष्ठपल्लवः ।
अवक् परपराभूतिध्यानभग्नभुजस्मयः ॥ ५।१३१ ॥

द्विषद्विषधराशङ्का यत्र नैव निवर्त्तते ।
परपराभवायैव प्राभवं तद्व्यधाद्विधिः ॥ ५।१३२ ॥

महारिपुः स मे मोहक्ष्मापः पापनिकेतनम् ।
भोक्ता त्रिजगतोप्यल्पमेतद्राज्यं जिहीर्षति ॥ ५।१३३ ॥

मां स हिंसितुकामोऽभूत्कृशोऽपि व्याघ्रबालवत् ।
प्राप्तप्रौढिः पुनः सोढा कथं स्फार्तिं ममाधुना ॥ ५।१३४ ॥

राज्यं चास्ति रिपुश्चास्ति द्वयमेतद्विरुध्यते ।
तमः समस्तमच्छित्वा किमुदेति दिनेश्वरः ॥ ५।१३५ ॥

सति तस्मिन्महारातौ ममैश्वर्यकथा वृथा ।
शिरःस्थमुद्गरः कुम्भः कियन्नन्दति मार्त्तिकः ॥ ५।१३६ ॥

ततः श्रुणु महामात्य ! जात्यरत्नवदुज्ज्वल ! ।
शुद्धबुद्धिनिधे ! राज्यवल्लिविश्राममण्डप ! ॥ ५।१३७ ॥

तथा कुरु यथा राज्यं प्रथामञ्चत्यदश्चिरम् ।
उन्मूलयामि निर्मूलं वैरिवंशं भयावहम् ॥ ५।१३८ ॥

राजादेशादमात्योऽथापृच्छदेकान्तवत्सलः ।
गुरुं ज्योतिषिकं राज्यवृद्धिं वैरिकुलक्षयम् ॥ ५।१३९ ॥

स जगौ राजगौरव्य तदिदं हितकाम्यया ।
वृद्धावाप्तश्रुतज्ञानान्निरवैषं पुराप्यहम् ॥ ५।१४० ॥

तवास्ति विदितं तावत् पुरं प्रवचनाभिधम् ।
तत्पालयति सर्वज्ञो राजा दातोदयी दयी ॥ ५।१४१ ॥

केवलश्रीः प्रिया तस्य नित्यमव्यभिचारिणी ।
यद्दृशा लोकते लोकालोकवृत्तं नरेश्वरः ॥ ५।१४२ ॥

तया सह रहःसौख्यं स बुभुक्षुर्निरन्तरम् ।
निजां राज्यस्थितिं सर्वां विवेकाय प्रदत्तवान् ॥ ५।१४३ ॥

यावद्भवस्थितिं तं च विवेकं च परिच्छदः ।
सर्वोयं सेवते रूपद्वयभाक् सिद्धविद्यवत् ॥ ५।१४४ ॥

तस्य संवरनामास्ति सामन्तोऽनन्तविक्रमः ।
एकोऽपि यः क्षमो हन्तुं ससैन्यं मोहमाहवे ॥ ५।१४५ ॥

अमुष्य मुख्यतामाप्ता मुमुक्षा गेहिनीगुणैः ।
यस्याः स्वरूपसौंदर्यं योगीन्द्रा यदि जानते ॥ ५।१४६ ॥

तयोर्विश्वहिता सत्त्वसहिता दुहितास्ति या ।
संयमश्रीरिति ख्याता द्युसदामपि दुर्लभा ॥ ५।१४७ ॥

यदा तामनवद्याङ्गीं विवेकः परिणेष्यते ।
दृष्टस्तदैव दैवज्ञैरस्य दस्युकुलक्षयः ॥ ५।१४८ ॥

वयस्याः सन्ति या वश्या अस्याः समितिगुप्तयः ।
तासामेकैकया राज्यारोहो मोहस्य हस्यते ॥ ५।१४९ ॥

ईर्यासमितिरक्षुत्तं मोहं धर्मरुचेर्मुनेः ।
करकण्डूऋषेर्भाषासमितिर्यक्षसद्मनि ॥ ५।१५० ॥

वज्रर्षेरेषणा रेखामाप्ता सुरपरीक्षणे ।
चतुर्थी वल्कलचीरस्य वल्कलप्रत्युपेक्षणे ॥ ५।१५१ ॥

मृद्गतो मोदकानाप्तान् ढाण्ढणेयस्य पञ्चमी ।
मनोगुप्तिः प्रसन्नेन्दोर्निन्दतः कर्म्मकश्मलाम् ॥ ५।१५२ ॥

मेतार्यस्य च वाग्गुप्तिः क्रौञ्चमन्तुमजल्पतः ।
तनुगुप्तिरचलतश्चैलातेयस्य चापदि ॥ ५।१५३ ॥

यस्याः सख्यो रिपुक्षोदक्षमास्तस्याः श्रुते बले ।
सुरा अपि शिरो युक्तं धुन्वते संयमश्रियः ॥ ५।१५४ ॥

यस्याः परिणयारम्भादेव दम्भादिभिः समम् ।
लग्नोपजिह्वतरुवत्क्षेत्ता मोहः क्षणे क्षणे ॥ ५।१५५ ॥

इत्याकर्ण्य विवेकोऽवग् भार्योभयभयातुरः ।
एतत्तात ! प्रकृत्याहं मसृणो न शृणोम्यपि ॥ ५।१५६ ॥

सति सुतवती धाम्नि जायैका यस्य जीवति ।
स्वीकुर्वंस्तन्मनः शल्यं परां पापैः स लिप्यते ॥ ५।१५७ ॥

यस्य भार्याद्वयं तस्यावश्यं भ्रष्टं भवद्वयम् ।
जन्योरन्योन्यमागांसि निह्नुवानस्य संततम् ॥ ५।१५८ ॥

अनिष्ठितं कलिं कर्तुं कृष्णचित्रकमूलिका ।
परा पत्नी सुखं भर्तुर्हर्तुं बब्बूलशूलिका ॥ ५।१५९ ॥

सुखार्थं स्वीकृता योषित् द्वितया स्यात्सुखच्छिदे ।
ऊर्णायुः कम्बलायात्तक्षीरं चरितुमुत्थितः ॥ ५।१६० ॥

एकां प्राप्यापरां सन्ध्यां व्रजन् भ्रस्यति भास्करः ।
एकां मुक्त्वापरां प्राप्तो द्वितीयां क्षीयते शशी ॥ ५।१६१ ॥

वदत्येवं प्रिये तत्त्वरुचिरूचे कृतस्मितम् ।
केयं हृदीश ! सद्भावस्थाने कृत्रिमभीरुता ॥ ५।१६२ ॥

नोज्झन्ति सुस्त्रियो भक्तिं भूरिभार्येपि भर्त्तरि
वार्द्धौ बहुनदौ मन्दादरा मन्दाकिनी न हि ॥ ५।१६३ ॥

अन्ये धर्माः पुरन्ध्रीणां पुरुषाणां परे पुनः ।
वृक्षाणां च लतानां च धर्माः स्युर्न हि सन्निभाः ॥ ५।१६४ ॥

वृक्षेषु बद्धास्तिष्ठन्ति न तु वल्लीषु हस्तिनः ।
पुमांसः सर्वकर्मार्हा विलासैकरसाः स्त्रियः ॥ ५।१६५ ॥

भूयसीः प्रेयसीः कुर्वन् पुरुषो नापराध्यति ।
यदि नात्येति मर्यादां यादसामधिभूरिव ॥ ५।१६६ ॥

पत्यौ विकलदेहेपि भाव्यं तन्निष्ठया स्त्रिया ।
मत्सी शुष्यति कासारे म्लायति म्रियतेऽथवा ॥ ५।१६७ ॥

यस्यास्तव जयः सेव्या सा मयाहतसामया ।
स्वामिमानार्थिनी नाहमस्मि पत्युर्हितार्थिनी ॥ ५।१६८ ॥

तदाकर्ण्य विवेकोऽवग् जिता एवाथ वैरिणः ।
एवं यत्र सपत्न्योपि स्नेहलास्तत्र कोनता ॥ ५।१६९ ॥

जिनो मयि प्रसन्नोऽस्ति स हि मे दापयिष्यति ।
कुमारिकां द्विषद्वंशसमुच्छेदकुठारिकाम् ॥ ५।१७० ॥

तन्मन्त्रिन्मा विलम्बिष्ठा विशिष्टान् हितकारिणः ।
शोभनाध्यवसायाख्यान् प्रेषयोपजिनेश्वरम् ॥ ५।१७१ ॥

मन्त्र्यथो सज्जयामास जिनं प्रति निजान्नरान् ।
अहं तु ज्ञातनिःशेषवृत्तान्तस्त्वामुपागमम् ॥ ५।१७२ ॥

सांयुगीनोऽस्मि सम्पन्नोऽस्मीति मा मोह ! विश्वसीः ।
जानीहि स्वां दशां क्षीणां ज्वलद्दीपदशामिव ॥ ५।१७३ ॥

प्राज्यं राज्यं परीवारः सारः श्रीः पुष्कलं बलम् ।
कोशोऽकृशो विवेकस्य यथास्ति न तथा तव ॥ ५।१७४ ॥

दृग्गोचरं गते तस्य राज्ये राज्यं बुधास्तव ।
मन्यन्ते शबरावासं वासवस्य पुरः पुरः ॥ ५।१७५ ॥

ये बाला ये च तरुणाः पुरुषा येऽत्र याः स्त्रियः ।
ते जातिवैरिवत्सर्वे तत्र त्वय्याततायिनः ॥ ५।१७६ ॥

महामन्त्रान् जपन्त्येके श्राम्यन्त्यन्ये दिवानिशम् ।
उपवस्वादिशस्त्राणि शीशांसंतेऽपरे पुनः ॥ ५।१७७ ॥

लिखन्ति यन्त्रकान् केऽपि परभङ्गोपयोगिनः ।
सर्वेषामपि तत्रैवं त्वद्वधार्थमुपक्रमः ॥ ५।१७८ ॥

प्रलोभ्य सुखवार्त्ताभिस्त्वत्पुरीवासिनं जनम् ।
निवासयिषतीदानीं विवेको मुक्तिपत्तनम् ॥ ५।१७९ ॥

निगोदनगरीवासिजनताया बहुत्वतः ।
त्वया तनूभवन् वासो निजो नाथ ! न बुध्यते ॥ ५।१८० ॥

इत्याकर्ण्य गिरं दम्भान्मोहः किङ्कृत्यताजडः ।
निश्चलाङ्गोऽभवच्छाखाभ्रष्टप्लवगवत्क्षणम् ॥ ५।१८१ ॥

विपक्षवंशविस्तारचिन्ताकलुषिताननम् ।
व्यजिज्ञपन्नृपं पञ्चशरोऽवसरवित्सुतः ॥ ५।१८२ ॥

मयि जीवति भृत्याणौ किमेवं तात ! खिद्यते ।
खिद्यतां च तव द्वेषिवृन्दं बन्दीकृतं मया ॥ ५।१८३ ॥

सुते सति न चेत्मुञ्चेच्चिन्तां तातस्तदा ध्रुवम् ।
हेतुः सुतस्य दौर्बल्यमज्ञत्वं जनकस्य वा ॥ ५।१८४ ॥

मुक्ताः शुक्तिपुटस्येव केऽपि पुत्राः पितुश्छिदे ।
रविणेव शनिः केऽपि पित्रा वैराय निष्प्रभाः ॥ ५।१८५ ॥

पितुः श्रियेऽहं भूयासं सरसः कमलं यथा ।
मलं यथा शरीरस्य न पुनः क्लेशकर्मणे ॥ ५।१८६ ॥

अनङ्गोऽपि जगज्जेतुं त्वत्प्रसादादहं क्षमे ।
शीतं वपुर्विना कालविशेषात्कं न कम्पयेत् ॥ ५।१८७ ॥

अहं वैरिबलं वार्द्धिमिव वाग्भङ्गिमालिनम् ।
ग्रसिष्ये हेतिसंहत्या हव्यवाडिव वाडवः ॥ ५।१८८ ॥

सावष्टम्भा इमा वाचो निशम्य मधुसारथेः ।
साधु साधु सुधीरेवं स्तुवन्मोहस्तमभ्यधात् ॥ ५।१८९ ॥

विक्रमेणामुना वत्स ! वंशमुद्योतयन्नसि ।
निहंसि वसृसन्देहं श्रोतृणामपि संसदि ॥ ५।१९० ॥

धुरां राज्यस्य विन्यस्य कस्यांसे स्यामहं सुखी ।
इति चिन्ताब्धिमग्नं मां धर्त्तुं पोतन्ति ते गिरः ॥ ५।१९१ ॥

घुणः काष्ठस्य धूमोऽग्नेस्तनोर्व्याधिर्बुधो विधोः ।
लाक्षा द्रोः पयसः पङ्कः श्रीहान्यै कुसुतः पितुः ॥ ५।१९२ ॥

रेणोर्हेमाश्मनो बिम्बं पङ्कस्याब्जमहेर्मणिः ।
मृदः पूर्णघटश्चैवं सुपुत्रः स्वपितुः श्रिये ॥ ५।१९३ ॥

विजेष्यते त्वया नूनमनूनमरिमण्डलम् ।
दूरादपीक्षितो भीत्यै यतस्ते मकरो ध्वजः ॥ ५।१९४ ॥

एकोऽपि लब्धप्रसरः प्रियस्ते सारथिर्मधुः ।
विधातुं चेतनानिःस्वं विश्वविश्वं प्रभूयते ॥ ५।१९५ ॥

तव प्रियसुहृद्बाल्यादसावुन्मादसंज्ञकः ।
जगत्पीतासवमिव विवशीकुरुते क्षणात् ॥ ५।१९६ ॥

शिलीमुखास्ते धनुषा समं सक्तशिलीमुखाः ।
पौष्पाः स्पर्शेऽपि निघ्नन्ति चेतनां सविषा इव ॥ ५।१९७ ॥

कुविकल्पाः सहायास्ते प्राणायामासनादिभिः ।
वारिता अप्यमी वत्स ! विशन्त्येव नृणां हृदि ॥ ५।१९८ ॥

शृङ्गारोऽयं रसप्रष्ठस्त्वत्सैन्यं पार्श्वयोर्द्वयोः ।
सम्भोगविप्रलम्भाभ्यां द्विरूपो रक्षितुं स्थितः ॥ ५।१९९ ॥

मिथ्यादर्शननामायं मन्त्री ग्राह्यः सह त्वया ।
असौ तानेव देवादीन् वक्ता यैस्ते महोदयः ॥ ५।२०० ॥

इमे अनारतप्रीती रतिप्रीति प्रिये तव ।
विलोक्य स्निग्धया दृष्ट्या बलं युध्येधयिष्यतः ॥ ५।२०१ ॥

यास्ते नासीरचारिण्यः कामावस्थादशाङ्गजाः ।
स्वोजसा नाभिभूयेत किं ताभिर्नाभिभूरपि ॥ ५।२०२ ॥

अशुद्धोऽन्तर्बहिःशीतगोमुक् क्रोडस्फुरन्मृगः ।
विधुर्विधुरयत्येष धूर्त्तः कं न बले तव ॥ ५।२०३ ॥

स्त्रीगोष्ठीयोगिनी राज्यवृद्ध्यै ते कार्मणादिकृत् ।
एषात्तविकथाकन्था कस्य मूर्छां तनोति न ॥ ५।२०४ ॥

इमे गीतकला नाट्यकला च श्रुतिदृक्प्रिये ।
जगज्जनमनोधैर्यं ध्वंसिके व्यंसिके तव ॥ ५।२०५ ॥

पैरैरनात्तगन्धोऽयं बन्धुस्ते रागसागरः ।
निर्व्यूढप्रौढसंग्रामग्रामस्त्वामनुवर्त्तते ॥ ५।२०६ ॥

मण्डनस्निग्धभूयिष्ठाहाराद्या भूरिशो न किम् ।
वण्ठा अपि हि सोत्कण्ठा वैरिनिर्लोठनाय ते ॥ ५।२०७ ॥

सीधुयोधस्तवापूर्वः पूर्वं नयति निःस्वताम् ।
घूर्णयत्यथ विश्वं यो विचेतीकुरुते ततः ॥ ५।२०८ ॥

विसारिपाशहस्तोऽयं द्यूतनामा भटस्तव ।
जगज्जयति संसेव्यः कितवैस्तुमुलाकुलैः ॥ ५।२०९ ॥

प्रियकौतूहलो हास्यरसो वैहासिकस्तव ।
विडम्बयति निर्व्रीडो निबिडं भूभुजोपि यः ॥ ५।२१० ॥

क्रीडादासी तवाव्रीडा रोलयन्ती सदा नवा ।
सदानवानियं देवान् शक्या रोध्धुं न केनचित् ॥ ५।२११ ॥

अभ्यङ्गसवनोद्वर्त्तनाद्याः प्रणयिनस्तव ।
बीभत्सस्यापि देहस्य श्रीभरं वितरन्त्यमी ॥ ५।२१२ ॥

वाद्यानि श्रवणानन्दीन्यश्लीलवचनानि ते ।
क्षोभमेति परानीकं निर्घातादिव यद्ध्वनेः ॥ ५।२१३ ॥

सुखाभिमानसन्नाहः शंसन्नाहवयोग्यताम् ।
वैयात्यं च शिरस्कं ते परवाक्शरभीतिभित् ॥ ५।२१४ ॥

लीलालसपदन्यासा द्विरदाः सभिदा मदाः ।
ऊर्ध्वीकृतभुजादण्डशुण्डा गर्जन्त्यमी तव ॥ ५।२१५ ॥

अमी ते वर्द्धिताः काङ्क्षासरित्पुलिनवेल्लनैः ।
क्षुन्दाना विषयान् सर्वान् व्यापारा ऐन्द्रिया हयाः ॥ ५।२१६ ॥

कम्पयन्तः क्षमामेते रथाः पापमनोरथाः ।
अस्खलद्गतयो नद्धा नैस्त्रप्यद्वीपिचर्म्मणा ॥ ५।२१७ ॥

अष्टादशाब्रह्मभेदाः प्रेमदण्डाधिपाश्रिताः ।
सन्नद्धा रिपुभिर्योध्धुं सैन्ये तव पदातयः ॥ ५।२१८ ॥

धनुर्भ्रूरिषवः काङ्क्षाः कृपाणं वेणिरायता ।
प्रासो विलासाः पाशाश्च हाराश्चक्रं च कङ्कणम् ॥ ५।२१९ ॥

सुबद्धः कञ्चुको यासां केशहस्तश्च शीर्षकम् ।
दधानाः सात्त्विकान् भावान् योधास्ताः प्रमदास्तव ॥ ५।२२० ॥

अनया सेनया विद्धि विजितानेव विद्विषः ।
पात्रतैलदशायोगे दीपो हन्ति तमांतमः ॥ ५।२२१ ॥

तथापि राजनीतिज्ञ ! मा स्म कस्यापि विश्वसीः ।
विश्वस्तः पतितो राहोर्मुखे पूषा महस्व्यपि ॥ ५।२२२ ॥

अस्वतन्त्रो मतिमतां मतिग्राही प्रयत्नवान् ।
अल्पभाषी बहुकरो जवात्त्रिजगतीं जयेः ॥ ५।२२३ ॥

नग्ने कापालिके भिक्षौ जडे जटिनि योगिनि ।
स्त्रियां तपोवनस्थे च विप्रे वा मा कृथाः कृपाम् ॥ ५।२२४ ॥

ह्रीरर्थिनि क्षमा क्षत्रे तूष्णीकत्वं च वादिनि ।
वेश्यायां प्रेम कारुण्यं जिगीषौ नेष्टसिद्धये ॥ ५।२२५ ॥

गुणा अपि क्वापि भवन्ति दोषा दोषा अपि क्वापि गुणा भवन्ति ।
स्नानक्षणे द्वेषकरी विभूषा चिरायुषे चानृजुता महाद्रोः ॥ ५।२२६ ॥

अर्हता पालितं राज्यं पुरं प्रवचनं पुनः ।
तस्य दृक् श्रेयसेऽन्येषां स्वयूथ्यानां पुनर्भिये ॥ ५।२२७ ॥

राज्ये का न्यूनतास्माकं तदेकं नगरं विना ।
तरोरेकच्छदाभावे गता सच्छायता किमु ॥ ५।२२८ ॥

आस्तिघ्नुवानः शूरोऽपि वीक्षते स्थानयोग्यताम् ।
न दन्तकुशलोऽदन्तशैले परिणते गजे ॥ ५।२२९ ॥

इमां प्राप्य पितुः शिक्षामक्षामभुजवैभवः ।
मेने मनोभवः स्वस्मिन्नुपगूढां जयश्रियम् ॥ ५।२३० ॥

अथ चार्वाकनिर्दिष्टद्वितीयायां विधूदये ।
दत्ताशीः स्वसृभिर्भालविन्यस्ततिलकोम्बया ॥ ५।२३१ ॥

जनकेनाभ्यनुज्ञातो बन्धुभिर्बहुमानितः ।
उत्साहितः कलत्राभ्यां मित्रैः स्निग्धदृशेक्षितः ॥ ५।२३२ ॥

उद्गीयमानधवलः कुलवृद्धाभिरञ्जसा ।
पापश्रुतेन भट्टेन वर्ण्यमानगुणोत्करः ॥ ५।२३३ ॥

आरुह्य दुर्यशोघोषघण्टाटङ्कारडम्बरम् ।
कुमित्रसङ्गमातङ्गं प्रतस्थे मकरध्वजः ॥ ५।२३४ ॥

बुभुक्षिता इव जगत्त्रयग्रसनलालसाः ।
तमन्वगुः ससंरम्भं हस्त्यश्वरथपत्तयः ॥ ५।२३५ ॥

अहंपूर्विकया गर्वाज्जयलक्ष्मीं वुवूर्षवः ।
सर्वे तमन्ववर्त्तन्त योधाः क्रोधारुणेक्षणाः ॥ ५।२३६ ॥

अचलोच्चूलचूलाभिश्चतुरङ्गचमूचये ।
चलितेऽत्राचलाचक्रे के चिरं न चकम्पिरे ॥ ५।२३७ ॥

ये शूरा ये च संपन्नाश्चरटाः सुभटाश्च ये ।
जगत्सु युवतीयोधैर्युध्ध्वा ते जिग्यिरे जवात् ॥ ५।२३८ ॥

दर्शनस्पर्शनक्रोडक्रीडालिङ्गनचुम्बनैः ।
स्तनपाणिपदाघातैः स्त्रीभिर्विश्वं वशीकृतम् ॥ ५।२३९ ॥

भ्रूविभ्रमैर्दृग्विलासैर्हाकारैर्हुङ्कृतैर्हसैः ।
उपालम्भै रोदनैश्च स्त्रीभिर्विश्वं वशीकृतम् ॥ ५।२४० ॥

शक्त्या भक्त्या चाटुभङ्ग्या गीतनर्त्तनदेवनैः ।
कृत्रिमभ्रान्तिभीरोषैः स्त्रीभिर्विश्वं वशीकृतम् ॥ ५।२४१ ॥

अप्सरोभिः सुरा नार्या नरा मत्स्या पुनर्झषाः ।
नाग्या नागाः शाकुन्या च वयसो वशया गजाः ॥ ५।२४२ ॥

मृग्या मृगाश्च सिंह्या च पञ्चास्याः साधिताः सुखम् ।
किं बहूक्तेम रामाभिर्जिता एकेन्द्रिया अपि ॥ ५।२४३ ॥

लग्नः स्त्रीयोध एकैको यावद्वेदं जनं प्रति ।
समर्थं वीक्ष्य भूयांसोप्यहो तत्सांयुगीनता ॥ ५।२४४ ॥

सोऽपि स्वर्गसदां पाल्यशासनः पाकशासनः ।
भीमभग्नभ्रुवा शच्या चाटुकोटीरशिक्ष्यत ॥ ५।२४५ ॥

चक्रवर्त्यपि भूशक्रचक्रमौलीकृतक्रमः ।
स्त्रीरत्नेन रहः पादावामृशन् किङ्करीकृतः ॥ ५।२४६ ॥

ख्याता जगति ये क्ष्मापाः प्रतापाक्रान्तशात्रवाः ।
कामेनाकुलितास्तेऽपि प्रपन्नाः शरणम् स्त्रियः ॥ ५।२४७ ॥

शिरोभिमानिनां वज्रधरेणापि न नामितम् ।
नमत्क्रमयुगे रुष्टस्त्रीभिर्निर्लोडितं हठात् ॥ ५।२४८ ॥

महाकुलाः कलाभ्यासरुचयः शुचयो द्विजाः ।
अकार्यन्त भुजिष्याभिर्मार्ष्टिमापानभूमिषु ॥ ५।२४९ ॥

शक्ताः स्वशक्त्या संरोध्धुं सिन्धुसिंहादिविप्लवान् ।
त्याजिता एकवाचैव तपः स्त्रीभिस्तपस्विनः ॥ ५।२५० ॥

अक्षसूत्रपरावृत्तिवृत्तयो ब्रह्मवादिनः ।
अध्यापिताश्चौर्यरतं स्त्रीभिः सांन्यासिका अपि ॥ ५।२५१ ॥

श्रुतं श्रुतवतां धैर्यं धीराणां धीश्च धीमताम् ।
बलं च बलिनां सर्वं वामाभिः परिवर्त्तितम् ॥ ५।२५२ ॥

योषिद्योधबलादेवं जयन् युध्ध्वा जगत्त्रयम् ।
ब्रह्मलोकं स्मरः प्राप श्रूयमाणश्रुतिध्वनिम् ॥ ५।२५३ ॥

अस्याधीशश्चतुर्वक्त्रो वेदवादी प्रजापतिः ।
पुराणः स पुराणेषु जगज्जनक उच्यते ॥ ५।२५४ ॥

अस्य वर्चस्विनो विप्राः कोटिशः पारिपार्श्विकाः ।
युक्तो नात्राभियोगस्ते द्विजाः सर्वत्र निर्भयाः ॥ ५।२५५ ॥

एवं स वारितोऽप्यन्यैस्तत्राढौकिष्ट यत्नतः ।
कामो वारितवामो हीति किं मिथ्या जनश्रुतिः ॥ ५।२५६ ॥

ब्रह्मास्तु सात्त्विको नाम्ना सन्तु वर्चस्विनो द्विजाः ।
अतिसारेण मद्भीतिभुवा न पुनरोजसा ॥ ५।२५७ ॥

इत्युक्त्वा ढौकयद्यावद्योषिद्योधानसौ युधे ।
दूतीभूयागतस्तावद्रागः प्रोचे प्रजापतिम् ॥ ५।२५८ ॥

अकाले मा मृथा धातः स्मरोऽयं विश्वघस्मरः ।
बलीयसी हि मोहाज्ञा नाधुना कोऽपि मुच्यते ॥ ५।२५९ ॥

कटकेन कलिं कुर्वन् पितामह ! न पूर्यसे ।
सावित्रीयोधमस्यैकं मानं मुक्त्वा नयान्तिके ॥ ५।२६० ॥

तं क्रोडीकृत्य भुक्त्वा च चिरं जीव सुखी भव ।
गर्वं कुर्वन्ति बलिनाक्रान्ता न स्वहितार्थिनः ॥ ५।२६१ ॥

मेने विरञ्चिस्तद्वाचं सावित्रीं स्वीचकार च ।
बद्धा एकैकशः सर्वे ब्राह्मणीभिर्द्विजा अपि ॥ ५।२६२ ॥

जितकाशी विकासीव दधन्मधुसुहृन्मुखम् ।
ततः प्रचलितोऽपश्यत्पुरः पुरुषमद्भुतम् ॥ ५।२६३ ॥

रामरुग् रचितोरिष्टरत्नैरिव रमापतिः ।
कोयं क्रीडति कालिन्द्याः कूले लोकाधिकाकृतिः ॥ ५।२६४ ॥

इति तेनानुयुक्तोथ मागधोऽभिदधे श्रृणु ।
लोको वैकुण्ठनामास्ति दुरालोको विरोधिनाम् ॥ ५।२६५ ॥

श्रुतिपारायणं नारायणस्तस्यैष नायकः ।
अन्यपौराणिकैरुक्ता अवतारा अनेकशः ॥ ५।२६६ ॥

उदधाद्वसुधामेष धृत्वा कूर्मवराहताम् ।
व्यदारयन्नृसिंहत्वे हिरण्यकशिपोरुरः ॥ ५।२६७ ॥

बटूभूय बलिं बध्वा चिक्षेपायं क्षमातले ।
गतो भार्गवतां चक्रे धरां निष्क्षत्रियाङ्कुराम् ॥ ५।२६८ ॥

अयं दाशरथीभूय निजघान दशाननम् ।
स एवायं यदुकुलेऽवतीर्णः कृष्णसंज्ञया ॥ ५।२६९ ॥

अयं हि हिंसकः कंसकालकालियकेशिनाम् ।
पूतनारिष्टचाणूरयमलार्ज्जुनतर्जनः ॥ ५।२७० ॥

कम्पन्ते दानवा अस्मात्मारुतादिव भूरुहः ।
चैतन्यकलया सर्व्वभूतेष्वयमवस्थितः ॥ ५।२७१ ॥

ममन्थ पाथसां नाथमयं स्वर्भूमिभृन्मथाः ।
अस्य नीडजनीडन्ति भुवनान्युदरालये ॥ ५।२७२ ॥

पाञ्चजन्यनिनादेन रोदस्या उदरम्भरिः ।
अयं चतुर्भुजश्चक्रगदाशाङ्ग्गासिभीषणः ॥ ५।२७३ ॥

अस्मिन्मास्म भुजस्थाम त्वमनीदृशि दीदृशः ।
कष्टं करोत्ययष्टङ्कः कुलिशे निशितोपि किम् ॥ ५।२७४ ॥

अनेन वचसा क्रुद्धः पादस्पृष्ट इवोरगः ।
कृताहङ्कारहुङ्कारस्तमभाषत दर्पकः ॥ ५।२७५ ॥

गोष्टशिष्ट ! पयःपुष्ट ! गोपाल ! मधूसूदन ! ।
तिष्ठ तिष्ठ मया दृष्टः कथं यासि त्वमक्षतः ॥ ५।२७६ ॥

मत्तोऽसि मूढ ! वातूल ! विहितैर्यैर्विकत्थनैः ।
मत्तोऽसिप्रहतीरद्य तैरेव त्वमवाप्स्यसि ॥ ५।२७७ ॥

अथ संकेतितास्तेन गोपीयोधाः सहस्रशः ।
परितः परिवव्रुस्तं द्वीपमब्धेरिवोर्मयः ॥ ५।२७८ ॥

ऊचिरेऽथ मदं मुञ्च दामोदर ! दरं भज ।
अद्यापि ननु बालोऽसि यज्जानासि बलं न नः ॥ ५।२७९ ॥

वासवाश्चाश्रवा यस्य देवाः सेवापरायणाः ।
चक्रिणश्चाटुवचना राजानश्चौपजानुकाः ॥ ५।२८० ॥

तस्य मारस्य योद्धारो वयं विश्वैकजिष्णवः ।
धत्से बलमदं चेत्तत् सज्जः स्ताद्द्वन्द्वकर्मणि ॥ ५।२८१ ॥

त्वमेको वयमस्तोकास्त्वं मृदुः कर्कशा वयम् ।
त्वं बालोऽसि वयं प्रौढाः का स्पर्धास्माभिरस्तु ते ॥ ५।२८२ ॥

दृग्बाणविद्धो दोःपाशबद्धो वाग्भल्लिजर्जरः ।
उरुसंदंशकाक्रान्तोऽस्माभिस्त्वं कोऽसि केशव ! ॥ ५।२८३ ॥

आसाराशुचिबीभत्सं दर्शयामोऽन्यथा नृणाम् ।
वयं विद्मश्छद्मयोगानपि त्वं वेत्सि गोप ! किम् ॥ ५।२८४ ॥

अस्मानुपेत्य संगच्छ गच्छ वा तपसे वनम् ।
विनाङ्गनां गृहे वासं न सहिष्यामहे तव ॥ ५।२८५ ॥

इति तद्वचनैरेव ग्लानो वीक्ष्य बलं बहु ।
पद्मनाभः क्षमो नाभूदवस्थातुं पलायितुम् ॥ ५।२८६ ॥

चक्रचापधरोप्युच्चैः स सद्यः समगंस्त तैः ।
कंसादिध्वंसजां ध्यायन् प्रसिद्धिं स्वां मुधा हृदि ॥ ५।२८७ ॥

लास्यं हास्यं कलिं केलिं कार्यमाणो यदृच्छया ।
तैर्न चक्रेशिता चक्रेऽभिमानं स मनागपि ॥ ५।२८८ ॥

वस्त्राकर्षाञ्चलाक्षेपहस्ताघातपदाहतीः ।
सोऽपि निर्मितवांस्तेषां चिरं परिचयादभिः ॥ ५।२८९ ॥

यामिन्यां यमुनाकूले शारद्यां शशिरुक्शुचौ ।
नृत्यन् गोपीगणे गायत्ययं न व्यत्ययं व्यधात् ॥ ५।२९० ॥

जलस्थलजपद्मानां समं सौरभलोभिनीः ।
बुध्वा गोपीर्हरिर्वृन्दावनं तीर्त्वा यमीं ययौ ॥ ५।२९१ ॥

वनतः स्वयमानीतैः कुसुमैः स न्यवीविशत् ।
कस्याश्चिच्छेखरं मूर्ध्नि देवताया इवार्च्चकः ॥ ५।२९२ ॥

पुष्पाणि स्वयमादित्सुरुत्तुङ्गतरुशृङ्गतः ।
निश्रेणाविव तस्यांसदेशे कापि पदं ददौ ॥ ५।२९३ ॥

अन्यां वनविहारेण क्लान्तामेकान्तवत्सलः ।
विहङ्गिकामिवोदस्य बलवान् सोऽनयद्गृहम् ॥ ५।२९४ ॥

अर्पयन्त्युत्तरीयं स्वं भारभीरुः परा पथि ।
संव्यानमपि किं दत्से नेति स्मित्वामुना जगे ॥ ५।२९५ ॥

उत्कण्ठितेन तेनैका गोपीगोप्याङ्गवीक्षणे ।
नीवीं संयमयामासे सख्येव विगतत्रपा ॥ ५।२९६ ॥

एवं तस्मिन् वशं नीते वशायोधैरनन्यजः ।
अथ न क्वापि मे हारिरस्तीति निरवैष्ट सः ॥ ५।२९७ ॥

कंसारिसारसंहारस्फारदोर्दण्डचण्डिमा ।
ततः कृतप्रयाणोऽसौ पुरोऽपश्यन्महाचलम् ॥ ५।२९८ ॥

उच्चः शिलोच्चयः कोऽयं कश्चास्य प्रभुतास्पदम् ।
तेनेति पृष्टोऽवग् मन्त्री परतन्त्रीकृताङ्गकः ॥ ५।२९९ ॥

शैलः कैलासनामायं केवलस्फटिकोपलः ।
अकरग्राह्यमुकुरश्चरत्खेचरयोषिताम् ॥ ५।३०० ॥

अस्य मौलौ स्थितः पूर्वाचलस्येव दिवाकरः ।
अन्धकारातिविध्वंसी शम्भुर्विभ्राजतेतराम् ॥ ५।३०१ ॥

मा दिवोऽवतरन्तीयं पिप्लवत्पृथिवीमिति ।
गङ्गानेन जटाकूटमालिना मौलिना दधे ॥ ५।३०२ ॥

अत्राब्धिमथनोद्भूतगरलग्रासलालसे ।
भेजिरे भोगिनो भूषाभावं भुवनभीषणाः ॥ ५।३०३ ॥

विदग्धस्य जगद्दग्धुमप्येकज्वालयाखिलम् ।
कुण्डीयतेऽनलस्यास्य नेतुर्नेत्रं तृतीयकम् ॥ ५।३०४ ॥

विपक्षचक्षुषामान्ध्यं ये वितन्वन्ति भस्मना ।
शैवा दैवादभीरोस्ते परिवारोस्य रूक्षवाक् ॥ ५।३०५ ॥

अयं विश्वस्य विश्वस्य संहर्त्तेति न कौतुकम् ।
भार्गवोऽमुष्य शिष्योऽपि क्षत्रवंशक्षयं व्यधात् ॥ ५।३०६ ॥

पिनाकशूलखट्वाङ्गधरणव्यग्रबाहुना ।
अनेन त्वमपि क्वापि कुण्ठशक्तीकृतः श्रुतः ॥ ५।३०७ ॥

तन्मुञ्चामुं गिरिं दूरे वल्मीकमिव सोरगम् ।
न हि यत्र यशो धर्म्मो विग्रहः स कदाग्रहः ॥ ५।३०८ ॥

तच्छ्रुत्वा कुपितः काममाकृष्ट इव केसरी ।
कामोऽवादीदहो मन्त्रिन्मा मां भापय मन्मथम् ॥ ५।३०९ ॥

यद्यमुं विषमं मत्वा मुञ्चाम्यद्य कपालिनम् ।
तदा हन्त हता मोहकुलशौर्यकथाप्रथा ॥ ५।३१० ॥

मत्प्रभावबृहद्धानावालीढभुवनत्रये ।
एष पञ्चमुखस्त्यक्तकुशलः शलभायताम् ॥ ५।३११ ॥

इत्युक्त्वा सोऽकृषच्चापं सहसा सह सायकैः ।
शूरा हि न विलम्बन्ते वध्यकोटिं गते रिपौ ॥ ५।३१२ ॥

चापेऽधिज्यीकृते तेन संहिते मोहने शरे ।
दिगम्बरस्तपोध्याननिभृताङ्गोप्यकम्पत ॥ ५।३१३ ॥

मारस्तारं जगौ खण्डपर्शो पाखण्डमुज्झ्यताम् ।
जगज्जैत्रे मयि क्रुद्धे किं भो ध्यानं तपश्च किम् ॥ ५।३१४ ॥

गिरिणा गुरुणानेन न मृत्योरद्य रक्षसे ।
रक्षसे किन्तु मद्दत्तमृगनेत्रापरिग्रहात् ॥ ५।३१५ ॥

व्याजहार हरः श्रीमन्मोहभूपालनन्दन ! ।
पश्चाद्दद्या इमां बुद्धिं पूर्वं शृणु मम श्रियम् ॥ ५।३१६ ॥

मम प्रेतवने वासः प्रेतस्येव निरन्तरम् ।
भोजनं भिक्षुकस्येव भिक्षया शीतरूक्षया ॥ ५।३१७ ॥

करे कापालिकस्येव कपालो मम भाजनम् ।
चक्रीवत इवाङ्गे मे भसितेनावगुण्ठनम् ॥ ५।३१८ ॥

भूषा विषधरैर्लम्बमानैर्जीर्णतरोरिव ।
सैन्धवस्येव निःस्वस्य मम यानं जरद्गवः ॥ ५।३१९ ॥

अहमीदृगवस्थोपि स्वीकुर्व्वे वनिताः कथम् ।
योग्या रत्नाकरस्येव सरितः, श्रीमतो हि ताः ॥ ५।३२० ॥

जटाधराद्विरूपाक्षाद्रुण्डमालावलम्बिनः ।
मत्तो मृगाक्ष्यस्त्रस्यन्ति मराल्यो जङ्गलादिव ॥ ५।३२१ ॥

शालिं सूपं घृतं घोलं वटकान्मण्डकानपि ।
याचमाना इमा भिक्षाभोजिनं खेदयन्ति माम् ॥ ५।३२२ ॥

चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमादिकम् ।
याचमाना इमा भस्मोध्धूलनं खेदयन्ति माम् ॥ ५।३२३ ॥

स्वर्णप्रवालमाणिक्यमुक्ताभूषणमण्डलम् ।
याचमाना इमा व्यालमालिनम् खेदयन्ति माम् ॥ ५।३२४ ॥

दुकूलक्षौमकौशेयप्रायवासांसिनिर्भरम् ।
याचमाना इमाश्चर्मवसनं खेदयन्ति माम् ॥ ५।३२५ ॥

केशाध्वदत्तसिन्दूरा स्त्री सधूमानलाञ्चिता ।
विचेतनः पुमान् यत्र निलीनो याति भस्मताम् ॥ ५।३२६ ॥

वरं व्याघ्री विषधरी या दत्ते मृत्युमेकदा ।
नित्यं मृत्य्वधिकक्लेशकरी न तु नितम्बिनी ॥ ५।३२७ ॥

वलीतरङ्गिणी हास्यफेनिला स्त्री सरिन्नवा ।
यत्र मज्जति यूनां दृग्द्रोणी स्तनतटं गता ॥ ५।३२८ ॥

स्यादेकद्विदृशामेव रात्रिरालोकघातिनी ।
नवा नारीनिशा यत्र सहस्राक्षोऽपि मुह्यति ॥ ५।३२९ ॥

चलचित्तकपिः कामकिराता स्त्री नवाटवी ।
यद्भ्रूरागानलो द्रष्टुरपि सर्वस्वमोषति ॥ ५।३३० ॥

मोहव्याधो भवाटव्यां वागुरां व्यतताङ्गनाम् ।
आस्तां मुग्धमृगा यत्र बध्यन्ते विबुधा अपि ॥ ५।३३१ ॥

अलक्ष्यमध्या तमसां मन्दिरं सुन्दरीदरी ।
विलासाजगरो यत्र पुन्नागानपि चर्वति ॥ ५।३३२ ॥

बिभेम्यहं तदेताभ्यो मां विमुञ्च तपस्विनम् ।
इन्द्रोपेन्द्रादिभिः किं ते युद्धश्रद्धा न पूर्यते ॥ ५।३३३ ॥

इति तद्वचसा जातकृपोऽवददिति स्मरः ।
मा कातर्यं कृथाः शूलिन्मखभित्कालघात्यसि ॥ ५।३३४ ॥

सतीमभूरिप्रसवामपर्णामचलात्मजाम् ।
महिलामाद्रियस्वैकां मुक्तोऽस्येतावता मया ॥ ५।३३५ ॥

ॐमिति प्रतिपद्याथ भूतनाथस्तथाकरोत् ।
काले जातेऽङ्गजे भिक्षाशनोद्विग्ना शिवावदत् ॥ ५।३३६ ॥

भिक्षा भवत्यभिख्यायै भिक्षोरेव न गेहिनः ।
देहि मे देहनिर्वाहक्षमं श्रीकण्ठ ! भोजनम् ॥ ५।३३७ ॥

सुयोषितेव जन्माहर्नृणां श्लाघ्यं सुवल्भया ।
तस्यैय तस्व नालस्यभाजां क्वाप्युदयः प्रिय . ॥ ५।३३८ ॥

कृष्णात्प्रार्थय मेदिनीं धनपतेर्बीजं बलाल्लाङ्गलम्,
कीनाशान्महिषं वृषोऽस्ति भवतः फालः त्रिशुलादपि ।
शक्ताहं तव भक्तपानकरणे स्कन्दश्च गोरक्षणे,
दग्धाहं हर ! भिक्षया कुरु कृषिं गौरीवचः पातु वः ॥ ५।३३९ ॥

अथ दध्यौ हरो हन्त यत्प्रागुक्तं तदागतम् ।
स्त्रियो हि लब्धप्रसराः कं न भिन्दन्ति नीरवत् ॥ ५।३४० ॥

दरीगुरूदरी गोत्रजेयं पुत्रस्तु षण्मुखः ।
कथं पोष्याविमौ धिग्मां कामः शस्त्रं विनाऽवधीत् ॥ ५।३४१ ॥

यथा तथा वा निर्वक्ष्यत्यङ्गभूरङ्गना पुनः ।
दुर्भरा निर्भरार्त्यब्धौ मग्नोऽस्मि करवाणि किम् ॥ ५।३४२ ॥

ततो जातमतिः शम्भुर्विरहासहतामिषात् ।
भार्ययाभूदभिन्नाङ्गो द्व्युदरीभरणाक्षमः ॥ ५।३४३ ॥

वंशवृद्ध्या विभग्नस्यामनस्यं जनकस्य मे ।
ध्यात्वेति तनयोप्यस्य प्रपेदे ब्रह्मचारिताम् ॥ ५।३४४ ॥

अपां पावित्र्यदः सर्वदेवपूजाप्रवर्तकः ।
ध्वंसको ध्वान्तचक्रस्य साक्षी सकलकर्म्मणाम् ॥ ५।३४५ ॥

निशाचरजयी दृष्टिसृष्टिसाफल्यकारणम् ।
पूज्यः पुरभिदो लोकप्रकाशः पङ्कशोषणः ॥ ५।३४६ ॥

श्रीदः स्वेष्टसरोजानां कोकशोकापनोदकः ।
स्वयोधैर्विधुरीकृत्य सूर्योऽप्युल्लेखितोऽमुना ॥ ५।३४७ ॥

जितेष्वमरमुख्येषु मन्मथेन महर्षयः ।
भृगुवत्सवशिष्टाद्याः स्वस्थानस्थाश्चकम्पिरे ॥ ५।३४८ ॥

मारस्य मारतो भीता एकैकं महिलाभटम् ।
गत्यन्तरमपश्यन्तः शरणं ते प्रपेदिरे ॥ ५।३४९ ॥

एवमास्वर्गमास्वभ्रं विश्वं वश्यं विधाय सः ।
पुण्यरङ्गपुरं ध्वंसबद्धसंधोऽभ्यषेणयत् ॥ ५।३५० ॥

इतश्च नगरे तत्र शालः सकपिशीर्षकः ।
अकम्पततरां भाविद्रङ्गभङ्गभयादिव ॥ ५।३५१ ॥

स्थूलस्थूलाश्रुभिर्व्यक्तमरुदत्पद्रदेवता ।
स्वाधिकारपरिभ्रंशदुःखाब्धिपृषतोपमैः ॥ ५।३५२ ॥

विच्छायतामविचच्छायन्नारामाः सहसाखिलाः ।
विश्वव्यापिस्मरक्ष्मापप्रतापोष्णहता इव ॥ ५।३५३ ॥

दुराशयशशो मौग्ध्यमृगो निशूकशूकरः ।
सत्वाः पुरोऽभितो भ्रेमुर्भवारण्यनिवासिनः ॥ ५।३५४ ॥

आविरासन्नसद्दृष्टिरागशोणितबिन्दवः ।
न्यविक्षत नृणां मौलिकोटौ कौलीनमौकुलिः ॥ ५।३५५ ॥

उत्पातैरभिराग्नेयीवातैरिव महोदधौ ।
क्षोभः सर्वत्र समभूदनुत्तानेऽपि पत्तने ॥ ५।३५६ ॥

विवेकोऽथ विचारेण व्यमृशत्सुहृदा समम् ।
स्मरो महाद्विषन् भूमिमास्कन्दत्यधिकाधिकाम् ॥ ५।३५७ ॥

मोहोप्यस्य बलाधानं पुत्रप्रेम्णा तनोत्यलम् ।
परिवारोऽप्यमुष्योष्णः स्वेन वासौ जगज्जयी ॥ ५।३५८ ॥

तदनेन समं युद्धं मया नारप्स्यतेऽधुना ।
ज्ञात्वा यानासने तन्वन् जिगीषुर्जयमश्नुते ॥ ५।३५९ ॥

प्रातर्भूमानिवोदेति भास्वान् भित्त्वा तमांस्यहो ।
काले तमस्सु पुष्टेषु सोऽपि नश्यति चौरवत् ॥ ५।३६० ॥

तस्मादवसरं वेत्ति यस्तस्येष्टार्थसिद्धयः ।
शालेः काले न गोधूमः सुसिक्तोऽपि फलेग्रहिः ॥ ५।३६१ ॥

गेयं नाट्यं रमा रामा भूषा भक्तं पयः सिता ।
धत्तेऽनवसरे सर्वं प्रीतिवारुधिपर्शुताम् ॥ ५।३६२ ॥

अश्मा भस्म तृणं तूलं धूलिर्ध्वान्तं शिखी विषम् ।
भवत्यवसरे वस्तु समस्तं प्रीतिवर्धनम् ॥ ५।३६३ ॥

तस्मात्संप्रत्युपेष्यामि शरणं स्वामिनोऽर्हतः ।
तद्भक्त्या परिणेष्यामि कन्यकां संयमश्रियम् ॥ ५।३६४ ॥

तया स्वीकृतयाहं च सर्वोऽपि च परिच्छदः ।
त्यक्त्वा जिह्मत्वमाप्स्यावः पाटवं रिपुपाटने ॥ ५।३६५ ॥

गुरुनैमित्तिकोक्तं तन्मम दन्ध्वन्यते हृदि ।
नेष्यामि क्षमतां तस्योपदेशादेव दुर्हृदः ॥ ५।३६६ ॥

वक्ष्यन्ति केऽपि चतुरमितरे कातरं तु माम् ।
अबद्धमुखलोकोक्तीः कियतीर्हृदये दधे ॥ ५।३६७ ॥

कोका नन्दन्तु निन्दन्तु निरानन्दा द्विकारयः ।
न मुञ्चति पुनः स्वीयां सूरः स्वाभाविकीं गतिम् ॥ ५।३६८ ॥

नलस्य त्यजतः पत्नीं स्वस्थानं मुञ्चतो हरेः ।
स्खलना खलु नाऽवे रे विसंस्थुलजनोक्तिभिः ॥ ५।३६९ ॥

त्वं मयि प्रस्थिते पौरगणं तत्र समानयेः ।
मा कोऽपि कोपिनस्तस्यास्मद्गृह्यः प्रपतद्ग्रहे ॥ ५।३७० ॥

अत्रान्तरे विशिष्टास्ते प्राप्ताः प्राक् प्रहिता नराः ।
नत्वा व्यजिज्ञपन्मौलिकरम्बितकरद्वयाः ॥ ५।३७१ ॥

प्रसीदतितरामद्य स्वामिन् स भगवांस्त्वयि ।
गोष्ठ्या गुणानामाधारमेकं त्वामेव शंसति ॥ ५।३७२ ॥

गुणगौर ! न गौरव्यस्त्वत्परस्तस्य कश्चन ।
जातैवेष्टार्यसिद्धिस्ते दृष्टे तस्मिन्न संशयः ॥ ५।३७३ ॥

इति तद्वचनं मन्यमानः शकुनमुत्तमम् ।
विवेकः प्रस्थितः प्राप सुखं प्रवचनं पुरम् ॥ ५।३७४ ॥

विचारोऽपि विवेकस्य वियोगं सोढुमक्षमः ।
पौरानार्त्तान् पुरस्कृत्य दधावे तस्य पृष्टतः ॥ ५।३७५ ॥

सर्वेऽर्हतः पुरीं प्राप्ताः क्रमान्मुमुदिरेतराम् ।
तस्य दृष्टिर्हि निःशेषद्वेषिविप्लववारिणी ॥ ५।३७६ ॥

अनाथमथ तत्प्राप नगरं मकरध्वजः ।
अविवेष्टदविक्षच्च व्यलुलुण्टदलुप्त च ॥ ५।३७७ ॥

उपार्हद्गमने भूत्वाऽलसास्तत्रैव ये स्थिताः ।
बन्दीचकार तान् जीवन्मृतप्रायान् जडानसौ ॥ ५।३७८ ॥

तैर्वराकैर्धृतैरन्तरुत्कर्षमभजन्नसौ ।
*बभार च बहिर्वृत्त्या पुमर्थेषु पुरोगताम्* ॥ ५।३७९ ॥

ऊचे च ही विवेकेन मम नाम्नैव नश्यता ।
अद्य क्षत्रकुलाचारकथाकन्था श्लथीकृता ॥ ५।३८० ॥

मन्त्रिणस्तनयो ह्येष राज्ञः सूनुरहं पुनः ।
मत्तोऽयमनशद्युक्तं शौर्यं वंश्यान्विना कुतः ॥ ५।३८१ ॥

पूर्वं तातभियानेन यदभ्यस्तं पलायनम् ।
सुशिक्षितमिवाद्यापि सुधियस्तन्न विस्मृतम् ॥ ५।३८२ ॥

एवं पलायितेऽमुष्मिन् महौजसि ममाथ कः ।
दोर्दण्डरणकण्डूतेरगदङ्कारतां गमी ॥ ५।३८३ ॥

यद्वा जिनस्य भक्तोऽयं निर्मदस्यास्तु निर्मदः ।
युक्तं हि प्रकृतिर्नेतुः संक्रामति सुसेवके ॥ ५।३८४ ॥

समीपमेतस्य हि नेतुरेताः सिंहादयोऽप्यल्पमदा भवन्ति ।
संसर्गतः शीतजलस्य वह्नेरह्नाय तिग्मत्वमुपैति शान्तिम् ॥ ५।३८५ ॥

विषमास्त्र इति ख्यातिः कृता कविभिरेव मे ।
अन्यथा क्व स्फुटा साभूदुन्दिरै वा पुरन्दरे ॥ ५।३८६ ॥

जानेऽर्हतो गतोऽङ्घ्री स शरणं मय्युपस्थिते ।
तत्राप्यहेरिव बिलस्थाखुर्मे नैष दुर्ग्रहः ॥ ५।३८७ ॥

परं पुरं प्रवचनं गन्तुं मे नादिशत्पिता ।
जितं जगत्त्रयं हंहो निवर्त्तध्वं चमूचराः ॥ ५।३८८ ॥

अथो मुखरयन् सर्वा दिशो दुर्वाक्यनिःस्वनैः ।
कृतकृत्यानि शस्त्राणि भृत्यैः कोशे निवेशयन् ॥ ५।३८९ ॥

हैयङ्गवीनं ग्रामीणैर्नानाभक्ष्याणि नागरैः ।
वनेचरैर्वनफलान्युपदीकृत्य रञ्जितः ॥ ५।३९० ॥

स्वभटाभ्यर्चनं वीक्ष्य प्रतिगेहं मुदं वहन् ।
संभावयन् दृशावज्ञालसया वासवानपि ॥ ५।३९१ ॥

नाग्न्यं तपस्विनां भिक्षाभुक्तं चारण्यवासिताम् ।
स्वाज्ञालोपकृतां प्रेक्ष्य पौरुषोत्कर्षमावहन् ॥ ५।३९२ ॥

आरोपयन् विरञ्च्यादीन् जयस्तम्भान् पदे पदे ।
जगज्जययशः शृण्वन्वैतालिकमुखान्निजम् ॥ ५।३९३ ॥

रसानामादिमं कुर्वन् शृङ्गारं स्वानुवर्त्तकम् ।
तेषां निवेशयन्नन्ते रसं शान्तं निजाऽप्रियम् ॥ ५।३९४ ॥

अन्येषामपि वीराणां दिशन्मानं यथोचितम् ।
अविद्यां नगरीं मारकुमारः प्राप लीलया ॥ ५।३९५ ॥

अपि भ्रूभङ्गेन प्रणयिनि सुपर्वाधिपगणे
कराम्भोजे भृङ्गीभवति भुवनैश्वर्यविभवे ।
तथा तुष्टो नाभूद्विषमशरवीरः स्वनगरे
पितुः पादैः पूते गतवति यथा लोचनपथम् ॥ ५।३९६ ॥

## षष्ठोऽधिकारः

अथ मोहमहीपस्तमभ्यगात्सपरिच्छदः ।
स्नेहाधिक्यं गुरुलघुव्यवस्थां न ह्यपेक्षते ॥ ६।१ ॥

मन्मथस्तातमायातमुपेत्य प्रणनाम तम् ।
अग्रेस्वगुरु दासन्ति सुपुत्रा बलिनोपि हि ॥ ६।२ ॥

तौ प्राक् हृदा ततो वाचा ततोऽङ्गेन तथा युतौ ।
यथा भेदस्तयोर्नाभून्नद्यब्धिजलयोरिव ॥ ६।३ ॥

अथ नागरिकव्रातारब्धातुच्छमहोत्सवम् ।
प्रतिमन्दिरमुत्तब्धभवभ्रान्तिपताकिकम् ॥ ६।४ ॥

वञ्चनावचनोदञ्चन्मञ्चसञ्चयसंकुलम् ।
सर्वतोऽश्लीलवाग्वाद्यनादजागरनागरम् ॥ ६।५ ॥

विचित्रविक्रियावारवधूविहितनर्त्तनम् ।
हावभावस्तम्भबद्धगृद्धिचन्दनमालिकम् ॥ ६।६ ॥

मोट्टायितादिसन्मुक्तास्वस्तिकाङ्कितपद्धति ।
अगाराग्रस्थाप्यमानकौशीलाकलशावलि ॥ ६।७ ॥

लास्यहास्यरसोत्तालनटवैहासिकव्रजम् ।
*आश्रवाख्यगवाक्षस्थनरनारीकदम्बकम्* ॥ ६।८ ॥

हर्षाकुलमिलल्लोललोककोलाहलाकुलम् ।
स विवेश पुरं पौरैर्वीक्ष्यमाणः सविस्मयम् ॥ ६।९ ॥

त्वं कुसुमशरैर्मन्मथ ! जगन्ति जितवान् यथा तथा कोऽन्यः ।
तदसि खलु वीरवृत्त्या भुवनभटानामुपरिभूतः ॥ ६।१० ॥

परिभूतभूतपतिगणविलास ! कृतब्रह्मवेदवाणीनिरास ! ।
उपहसितचतुर्भुजचापचक्र ! विधुरीकृतकरधृतकुलिशशक्र ! ६।११ ॥

तनुतन्तुतुलितजलनाथपाश ! मन्दीकृतसूरकरप्रकाश ।
अवहीलितचन्द्रकलाकलाप ! मोघीकृतमहऋषिसबलशाप !६।१२ ॥

अवधीरितविषधरविषमलाल ! परिवर्त्तितदुर्द्धरसिंहफाल ! ।
अवगणितगरुडगुरुपक्षवात ! परिशिटितविकटभटशस्त्रघात ! ६।१३ ॥

कृतशौचवादिशौचावसान ! खण्डितसमग्रपाखण्डिमान ! ।
योगीशयोगभञ्जनसमर्थ ! जय जय तृतीय ! मन्मथ ! पुमर्थ! ६।१४ ॥

प्रियबन्धुवर्गजननीजनकचरणभक्त ! सेवकसफल ! ।
श्रीमोहराजनन्दन ! मदन ! जीव जीव चिरमतुलबल ! ॥ ६।१५ ॥

एवं च्छन्दोऽन्तरैः स्तूयमानो बन्दिकदम्बकैः ।
कामस्तातं पुरस्कृत्य मौलमावासमासदत् ॥ ६।१६ ॥

क्रोडीकृत्य कुमारेन्द्रं नृपो हंसमिवोत्पलः ।
स्वमासनमलञ्चक्रे सत्प्रभाम्बुसरोवरम् ॥ ६।१७ ॥

कथं दिग्विजयं वत्स ! व्यधास्त्वमिति भूभुजा ।
पृष्टो ह्रिया स्ववृत्तोक्तौ भेजे मौनमनन्यजः ॥ ६।१८ ॥

बन्दी मन्दीकृताम्भोधिकल्लोलः स्वीयलोलया ।
जगौ विवेकनाशान्तं तस्य वृत्तं यथातथम् ॥ ६।१९ ॥

प्रमदोदञ्चिरोमाञ्चसञ्चयोऽथ महीपतिः ।
स्वाजिरेऽकारयत्तूर्यत्रयेणातुच्छमुत्सवम् ॥ ६।२० ॥

ततः पितुर्निदेशेन स चिराद्विरहातुराम् ।
ववन्दे मातरं पुत्रदिदृक्षातृषितेक्षणाम् ॥ ६।२१ ॥

सापि प्रीतिभरोत्फुल्लप्रमोदश्रवदश्रुभिः ।
स्नपयन्ति तमालिङ्ग्यावददाशीःपुरस्सरम् ॥ ६।२२ ॥

त्वं जात ! जायायुग्मेनावियुक्तो विजयी भव ।
तैस्तैः स्वविक्रमैर्वत्स ! मनो मातुश्चमत्कुरु ॥ ६।२३ ॥

गुरूणां कुर्वते प्राप्य प्राभवं ये पराभवम् ।
त्वं तेषां विपरीतोऽसि सृष्टिवल्लीव वीरुधाम् ॥ ६।२४ ॥

पौष्पैरस्त्रैस्त्रिभुवनक्षोभसोत्साहबाहुना ।
स्त्रीषु सत्त्ववतां धुर्य ! धुर्यहं स्थापिता त्वया ॥ ६।२५ ॥

बलवत्कर्म्मजातत्वात् प्रागहं वीरनन्दिनी ।
मोहेन वीरपत्नीति त्वया वीरप्रसूः कृता ॥ ६।२६ ॥

साथ स्वं सकलस्त्रीषु व्यञ्जितुं वीरमातरम् ।
कृष्णाविनीलकापोतीलेश्यादासीरवोचत ॥ ६।२७ ॥

हंहो हला जगन्त्यत्र जेतुं यातु तनूरुहे ।
कदाशागोत्रदेवीं प्रागभ्यर्च्याहं व्यजिज्ञपम् ॥ ६।२८ ॥

वर्धापनं विधास्येऽहं भगवत्यग्रतस्तव ।
द्रक्ष्यामि यदि जीवन्ति तनयं जयवादिनम् ॥ ६।२९ ॥

अभूत्फलेग्रहिः सोऽद्य मनोरथतरुर्मम ।
उत्सवार्थमथामन्त्र्या मन्त्र्यादिमहिलागणाः ॥ ६।३० ॥

प्राक् प्रिया युवराजस्य भ्रान्तिराहूयतां ततः ।
तत्त्वरुचिरमात्यस्यावज्ञा सैन्याधिपस्य च ॥ ६।३१ ॥

आरक्षस्य प्रिया दुर्वाक् साधुनिन्दा पुरोधसः ।
श्रेष्ठिनश्च त्वरा कोशाधीश्वरस्य कदर्यता ॥ ६।३२ ॥

बालता बालमित्रस्यानवस्था शौल्किकस्य च ।
सामन्तानां तत्तदीहाः शय्यापालस्य जिह्मता ॥ ६।३३ ॥

देशपालप्रिया ईर्ष्याहङ्क्रियावञ्चनाधयः ।
वण्ठानां लालसा च्छत्रभृतो भार्या कुभावना ॥ ६।३४ ॥

गुप्तिपानामतृष्णिश्च लोलता सुखशीलता ।
सूदानां दुष्टघटना रुचः करणचारिणाम् ॥ ६।३५ ॥

अथ ताभिस्तदादेशादानीते वनितागणे ।
मौढ्यमैरेयमुन्मादप्रदं सानाययद् द्रुतम् ॥ ६।३६ ॥

सपत्न्यः स्नेहलत्वेन तदा तत्रराययुः स्मयम् ।
आययुश्च रतिप्रीत्यसूयार्त्तिप्रमुखाः स्नुषाः ॥ ६।३७ ॥

ताः समस्ताः समभ्यर्च्य सद्भक्त्या गोत्रदेवताम् ।
आकण्ठपीतमैरेयरसघूर्णितलोचनाः ॥ ६।३८ ॥

उपर्युपर्यनङ्गोक्तिताम्बूलैरुन्मदिष्णवः ।
हल्लीसकेषु गायन्त्यो गुणालीं पुष्पधन्वनः ॥ ६३९ ॥

भूषणक्वणितैर्हस्ततालैः सोत्प्रासभाषणैः ।
स्त्रीराज्यमिव तन्वाना व्यधुर्वर्धापनोत्सवम् ॥ ६४० ॥

तदाखिले राजकुले हर्षकोलाहलाकुले ।
विमृशन्नायतिं मोहमहीन्द्रो दध्याविवानिति ॥ ६४१ ॥

उत्सवानच्छवामाक्ष्यो वितन्वन्तु यथारुचि ।
विवेको यद्गतो जीवन्नेतन्मां व्ययते पुनः ॥ ६४२ ॥

बाला इवाबला बुद्धिविकला नायतिं विदुः ।
अल्पे पुंस्स्वपि ते येषां मतिरायतिमञ्चति ॥ ६४३ ॥

आर्यैः प्रशस्यते कार्यं यत्परीणामसुन्दरम् ।
क्वाथः कटुरसोऽप्युच्चै रुजां हर्तेति वल्लभः ॥ ६४४ ॥

दुःखावहं विपाके यत्कार्यं कार्यं न तत् बुधैः ।
अप्यादौ स्वादु किम्पाकमन्ते मृत्युदमुझ्यते ॥ ६४५ ॥

राज्यं यन्निःसपत्नं स्यात्तत्र भान्ति महोत्सवाः ।
अन्यथोत्सवनिर्माणं स्वप्नमोदकसन्निभम् ॥ ६४६ ॥

नंष्ट्वा गतो विवेको यत्तच्छाठ्यान्न पुनर्भयात् ।
अपसृत्य ददत्फालां सिंहः किं हन्ति न द्विपान् ॥ ६४७ ॥

असावुपजिनं गत्वा विवोढा संयमश्रियम् ।
ततो जातबलो वंशमामूलं नः खनिष्यति ॥ ६४८ ॥

सहसा सहनः शूरो नश्यन् भवति दुःसहः ।
अकस्माद्दृष्टनष्टो हि दुर्व्रणो मृत्युकारणम् ॥ ६४९ ॥

इत्यायतिविमर्शोत्थचिन्तयाचान्तचेतसम् ।
दौवारिकः समागत्य नरनाथं व्यजिज्ञपत् ॥ ६५० ॥

कालरूप: समस्तारिविस्तारितरुपर्श्वध: ।
भूपाल ! कलिकालस्त्वां चिरायातो दिदृक्षते ॥ ६।५१ ॥

द्रुतं तमानयात्रेति तेन प्रोक्तेन वेत्रिणा ।
द्वीपीव पीवरस्कन्ध: स आनिन्ये सभान्तरम् ॥ ६।५२ ॥

रोषरूक्षमुखो लोहेनाविद्ध इव कर्कश: ।
दृष्टोऽप्यनन्यतुल्योऽभूत्सोऽद्भुताय सभासदाम् ॥ ६।५३ ॥

सोऽप्यानमत्क्रमौ तस्य निरस्य मदगौरवम् ।
स हि भीष्मो विपक्षेषु तं प्रति प्रणयी पुन: ॥ ६।५४ ॥

स्वागतप्रश्नपूर्वं तं भूपोऽभाषत किं सखे ! ।
त्वं चिराद्दृश्यसे किं वा तवागमनकारणम् ॥ ६।५५ ॥

सोऽवग् भवन्ति भाग्यानि पक्त्रिमाणि यदा तदा ।
स्वामी संगम्यते हेतुद्वयं चात्र समागमे ॥ ६।५६ ॥

एकं ते तनयं श्रुत्वा जगत्त्रितयजित्वरम् ।
दिदृक्षेऽहं महावीरमुखवीक्षा महाफला ॥ ६।५७ ॥

अपरं च गते जीवत्यहिते दु:खिनस्तव ।
पक्षे प्राप्तोऽस्मि सन्नह्य स हि प्रागपि मे रिपु: ॥ ६।५८ ॥

यद्यादिशसि तत् कुर्वे स्थितिमत्र त्वदन्तिके ।
उच्छिनद्मि तवारातीन् वर्धयामि च वैभवम् ॥ ६।५९ ॥

यदभूद्दुर्ग्रहं देव ! तव प्रवचनं पुरम् ।
हत्वा ज्ञानतलारक्षं तत्करिष्ये विसंस्थुलम् ॥ ६।६० ॥

उच्छ्वसन्तो हसन्ति त्वां संवेगाद्या द्विषोऽधुना ।
हासयिष्ये स्वयूथ्यैस्तान्मोघीकृत्य च्युतेषुवत् ॥ ६।६१ ॥

यद्दृशा वारिणेवाद्रिद्रुमा: सर्वेऽपि विस्तृता: ।
तमभ्रमिव वातूल: क्षेप्स्ये दूरं जिनेश्वरम् ॥ ६।६२ ॥

विवेकं विधुरीकृत्य दुष्टाश्व इव सादिनम् ।
करिष्याम्यचिरान्मुक्तिदुर्गमार्गमसञ्चरम् ॥ ६।६३ ॥

तच्छ्रुत्वा भूपतिर्दध्यावस्मिन् संभाव्यतेऽखिलम् ।
अमुष्यानुपमा स्फूर्त्तिराकृत्या वचसापि च ॥ ६।६४ ॥

अत्यौद्धत्येन न त्वेष चिरायुर्मे घटिष्यते ।
अत्युद्धता विनेशुर्द्राक् वैद्दुर्योधनादयः ॥ ६।६५ ॥

मया तदपि धार्योऽयं राज्योपष्टम्भकारणम् ।
प्राप्तो द्व्यहमपि प्रीत्यै न किं चिन्तामणिर्नृणाम् ॥ ६।६६ ॥

निश्चित्येति स सत्कृत्य स्वान्तिके तमतिष्ठिपत् ।
रत्नकोशादपि प्रेयान् जिगीषोर्योधसंग्रहः ॥ ६।६७ ॥

ततः प्रसृत्वरे तस्मिन् ज्ञानी दूरं ययौ जिनः ।
यानासने जिगीषूणां काले षाड्गुण्यविज्ञता ॥ ६।६८ ॥

गते दूरं जगन्नाथे कलिः स्वैरं व्यजृम्भत ।
दिनेश्वरे तमःपुर इव सत्पथरोधकः ॥ ६।६९ ॥

निवेश्योभयतो रागद्वेषौ पथि महाभटौ ।
स्वाक्रान्तक्षेत्रतो मुक्तिं गन्तुं कस्याप्यदान्न सः ॥ ६।७० ॥

मनःपर्यायविज्ञानं केवलं परमावधि ।
क्षपकोपशमश्रेणी संयमत्रयमग्रिमम् ॥ ६।७१ ॥

जिनकल्पः पुलाकर्द्धिस्तेनादौ निन्यिरे क्षयम् ।
एषु सत्सु हि जैनेन्द्रः प्रतापः किल जागरी ॥ ६।७२ ॥

स चतुर्दशपूर्वित्वं दशपूर्वित्वमप्यथ ।
क्रमात्पूर्व्वानुयोगं चावधीन्मोहमहाद्विषम् ॥ ६।७३ ॥

अविरोधेन जैनानां मिलन्मोहजुषामपि ।
आद्यं संहननं तेन व्यभेद्युभयचेतनम् ॥ ६।७४ ॥

हत्वा संहनानान्यन्यान्यपि तेनैव हेतुना ।
निःसारमबलं चेति तदन्त्यं व्यग्रहीन्न सः ॥ ६।७५ ॥

यन्मुहूर्त्तेन पूर्वाब्धिपारप्रापणतत्परम् ।
तेनास्तं तन्महाप्राणध्यानमानञ्च पञ्चताम् ॥ ६।७६ ॥

एवं प्रतिदिनं स्फूर्जदधिकाधिकतेजसम् ।
कलिं प्रत्यन्यदा प्राप संप्रतिक्ष्मापतिः क्रुधम् ॥ ६।७७ ॥

स्थाने स्थानेऽमुना जैनागारप्राकारकारिणा ।
समुत्तस्थे युधे सङ्घचतुरङ्गचमूजुषा ॥ ६।७८ ॥

अनार्येष्वपि देशेषु प्रवर्त्त्यार्हतशासनम् ।
स कलिं विकलीचक्रे सामदानाद्युपायवित् ॥ ६।७९ ॥

एवमभ्युदिते तस्मिन्नकस्मादुद्भटे भटे ।
कालवेदी किल क्वापि कलिर्नादर्शयद् बलम् ॥ ६।८० ॥

काले संप्रतिभूपालः कालेन कवलीकृतः ।
किं ब्रूमहे विधेर्वाम्यं यच्छूरा न चिरायुषः ॥ ६।८१ ॥

पुनः केऽपि महीपालाः कलिमोहवशंवदाः ।
सद्य उल्लाघयाञ्चक्रुरुपचारैर्नवैर्नवैः ॥ ६।८२ ॥

ततो वितस्तरे लक्षशाखं पाखण्डमण्डलम् ।
प्रमादः प्रापदुन्मादं मिथ्यात्त्वं मानमानशे ॥ ६।८३ ॥

स दुर्भिक्षादियाष्टीकान् प्रेष्य निष्ठुरकर्म्मणः ।
प्रवर्त्तकं जिनाज्ञाया आगमं खण्डशो व्यधात् ॥ ६।८४ ॥

अनुयोगान् पृथक्कृत्य चतुरः संगतानपि ।
व्यपोहितुं प्रवृत्तोऽसौ नैकोपाया हि तादृशाः ॥ ६।८५ ॥

उद्योतनाय नायान्ति तीर्थस्यात्र सुरासुराः ।
जागर्त्ति महिमा नोग्रतपसामपि तद्बलात् ॥ ६।८६ ॥

सामाचारीविभेदेन तेन व्यामोहितो जनः ।
आससाद न विश्वासमागमस्य वचस्यपि ॥ ६।८७ ॥

गच्छान्तर्वर्त्तिसाधूनां सौभ्रात्रेऽप्युदपाद्यत ।
अकारणं कलिस्तेन स्तेनश्चारित्रसंपदः ॥ ६।८८ ॥

एकश्रीवीरमूलत्वात् सौहृदस्योचितैरपि ।
सापत्न्यं धारितं तेन पृथग्गच्छीयसाधुभिः ॥ ६।८९ ॥

मुक्त्वाङ्घ्रिचारभूशय्याम्लाद्यं बाह्यडम्बरम् ।
साधूनां निष्कषायत्वं यत्सारं तद्धि सोऽग्रहीत् ॥ ६।९० ॥

अन्योन्यमनिवृत्तास्ते मत्सराद्वत्सरावधि ।
मिथ्यात्वं प्रापितास्तेन साधवो निश्चयान्नयात् ॥ ६।९१ ॥

निर्ग्रन्थाः केऽपि तेनासेऽप्यमोहे जिनशासने ।
शिष्यश्राद्धोपधिक्षेत्रशालामोहैर्विडम्बिताः ॥ ६।९२ ॥

मिथ्यादृशां महत्त्वस्य मथने श्लथशक्तयः ।
लिङ्गिनो विहितास्तेन स्वजातिस्फातिविद्विषः ॥ ६।९३ ॥

सावद्याहारिणः शौचवादिनो हठकारिणः ।
गुणान् विना गुरुंमन्याः कर्म्ममार्गोपदेशिनः ॥ ६।९४ ॥

वैद्यकज्योतिषप्रायधनोपायपरायणाः ।
शिक्षिता व्रतिनस्तेन केचन द्विजचेष्टितम् ॥ ६।९५ ॥

गृहं गत्वा चटून्युक्त्वा लिखित्वा चोपजीविनः ।
गजवृत्तिं परित्याज्य श्ववृत्तिं ग्राहिताः परे ॥ ६।९६ ॥

विकथाभिर्जनाक्षेपं वार्त्ताभिः केऽपि देशनाम् ।
आगमाध्ययनं गाथादोधकैस्तेन कारिताः ॥ ६।९७ ॥

गर्भाधानवशीकारकार्मणादिकुकर्मभिः ।
देवस्वेन च कुर्वन्ति कलौ वृत्तिं कुलिङ्गिनः ॥ ६।९८ ॥

संग्राह्यार्थमनर्थोयमित्युक्तिचतुरैरपि ।
विनाशिता हताशैस्तैर्विनेयाः श्रावका अपि ॥ ६।९९ ॥

श्रावका अपि नो यान्ति विश्वासं संयमिष्वपि ।
अनिश्चितकृताद्धर्मात्तत्कालं फलकाङ्क्षिणः ॥ ६।१०० ॥

एकरूपकलाभार्थमुज्झन्ति प्रस्तुतामपि ।
ते रैकोट्याधिकं देवपूजां सामायिकक्रियाम् ॥ ६।१०१ ॥

कूटक्रयतुलामानशपथान् करलाघवम् ।
कुवणिज्याः कुकर्माणि कुर्वन्ति च धनैषिणः ॥ ६।१०२ ॥

व्ययमानाः कुपात्रेषु धनलक्षा यशोऽर्थिनः ।
आपन्नधार्मिकायोक्ता आविष्कुर्वन्ति निःस्वताम् ॥ ६।१०३ ॥

परमेष्ठिमहामन्त्रस्मृत्यरोचकिनश्चिरम् ।
क्षुद्रमन्त्रान् पठन्त्येके मणिं मुक्त्वोपलाग्रहाः ॥ ६।१०४ ॥

उत्तमौ धर्मकृत्येषु यौ सामायिकपौषधौ ।
श्रुत्वापि कामदेवादिकथास्तत्रालसन्ति ते ॥ ६।१०५ ॥

द्यूतवार्त्ताविनोदेन गमयन्त्यखिलां निशाम् ।
घूर्णन्ते निद्रयासीना धर्मश्रुत्यै गुरोः पुरः ॥ ६।१०६ ॥

श्रुत्वा चित्रकथा हास्यहेतूरुल्लसिताननाः ।
नीरसा इति नेच्छन्ति निर्वेदजननीः कथाः ॥ ६।१०७ ॥

पुत्रे भ्रातरि वैराग्याद्व्रतं वाञ्छति वैरिवत् ।
उच्चावचवचःपांशुवृष्टिं साधुषु तन्वते ॥ ६।१०८ ॥

हरत्यङ्गरुहः प्रेतपतिर्नः पश्यतामपि ।
गुरूनेकोप्युपास्ते चेत्तत्प्रार्थ्यं किमतः परम् ॥ ६।१०९ ॥

भक्तभैषज्यसिक्पुत्रगृहोपकरणेषु यत् ।
साधूपयोगि तत्सारमिति रीतिं न ते विदुः ॥ ६।११० ॥

उदूढां तरुणीं कुल्यां तृणीयन्तः सधर्म्मिणीम् ।
विटकोटिनिघृष्टायां रज्यन्ति पण्योषिति ॥ ६।१११ ॥

यद्भाव्यं तद्भवत्येव किं देवैर्मे जिनेतरैः ।
इत्यापद्यपि ये धीराः स्तोकास्ते श्रावकाः कलौ ॥ ६।११२ ॥

जीवाजीवौ तथा पुण्यपापे आश्रवसंवरौ ।
निर्जरा बन्धमोक्षौ ते प्रायस्तत्त्वानि नो विदुः ॥ ६।११३ ॥

येषां लक्ष्मीर्महत्त्वं च तान् विडम्बयितुं कलिः ।
मिथ्यात्वं विरतिद्वेषं कुपात्रासक्तिमन्वशात् ॥ ६।११४ ॥

आरम्भान् क्लेशबहुलान्विधाप्य निखिलं दिनम् ।
स क्षणे धर्म्मकृत्यस्य तेषां जनयति श्रमम् ॥ ६।११५ ॥

धर्मः समाधिजन्मेति समाधिध्वंसनाय सः ।
कलः कलिप्रियश्चक्रे क्ष्मां लसड्डिम्बडम्बराम् ॥ ६।११६ ॥

लोकग्रासाय राजानो जज्ञिरे राक्षसा इव ।
तैर्नियुक्ता नरा आसन् रक्षका भक्षका इव ॥ ६।११७ ॥

पुत्राः पितृष्वभक्तास्तेऽप्यमीषां विश्वसन्ति न ।
युध्यन्ते सोदराः शण्डा इवान्योन्यं धनाशया ॥ ६।११८ ॥

वृश्चिकीव स्नुषां श्वश्रूरश्रूणि किरतीं सदा ।
तुदत्यल्पापराधेऽपि पुत्र्यां कामगवीयति ॥ ६।११९ ॥

सापि गेहे विभुंमन्या तस्यां सुष्ठु न वर्त्तते ।
भेदयन्ती नदीवाद्रिं शीतलैर्वाग्जलैः पतिम् ॥ ६।१२० ॥

सगोत्रेभ्योऽभ्यसूयन्ति श्यालकैर्बद्धसौहृदाः ।
वशावशंगता मातर्यपि मर्त्त्याः खरोक्तयः ॥ ६।१२१ ॥

सरस्यम्भ इव ग्रीष्मे कलौ तुच्छं धनं नृणाम् ।
बह्वारम्भं बहुक्लेशं बह्वाधीनं तदप्यहो ॥ ६।१२२ ॥

काले वर्षन्ति नाम्भोदा अकाले कृतवृष्टयः ।
इभ्याः पराङ्मुखाः पात्रे कुपात्रे कुर्वते व्ययम् ॥ ६।१२३ ॥

पुंसां स्नेहः सधर्मिण्यां विषयार्त्तिशमावधिः ।
पोषणावधिरत्रास्या धूर्त्तमैत्री द्वयोः कलौ ॥ ६।१२४ ॥

स्वार्थसिद्ध्यवधिर्मैत्री नियमः संकट्यवधिः ।
काठिन्यावधि सम्यक्त्वं ख्यातिलाभावधिः क्रिया ॥ ६।१२५ ॥

पुराणि ग्रामवद्ग्रामा अपि नाहलवासवत् ।
नागरा ग्राम्यवद्ग्राम्या भूतवज्जज्ञिरे कलौ ॥ ६।१२६ ॥

करदाश्चौरवज्जाताः कुलजा अपि षिङ्गवत् ।
कुलवध्वोपि वेश्यावद् गतिवेषस्मितादिभिः ॥ ६।१२७ ॥

भूरल्पसस्या गावोऽल्पक्षीरा अल्पफला द्रुमाः ।
अल्पवासा जनपदा अल्पतोया जलाशयाः ॥ ६।१२८ ॥

पैशुन्यबहुला वाचः कन्यकाबहुलाः प्रजाः ।
आरम्भबहुला वृत्तिर्व्ययबहुलं सुखम् ॥ ६।१२९ ॥

अनमर्षं तपो धर्मो निर्दम्भो निर्मदं श्रुतम् ।
क्व कलौ श्रीरकार्पण्या निर्विकारं च यौवनम् ॥ ६।१३० ॥

इत्यासावसरेऽवन्यां वन्यां दावाग्निवत्कलौ ।
स को गुणैर्घनो योऽधात्तन्निर्वापणनैपुणम् ॥ ६।१३१ ॥

इतश्च गुणगम्भीरवीरश्रीहृदयप्रियः ।
कुमारपालभूपालोऽवततारावनीतले ॥ ६।१३२ ॥

जेता श्वेताम्बराचार्योपदेशाद्विषमद्विषः ।
स विहारच्छलात्तेने स्वान् यशःस्तबकान् भुवि ॥ ६।१३३ ॥

मज्जाजैनेन येनोच्चै राजर्षिख्यातिमीयुषा ।
अष्टादशसु देशेषु मारिशब्दोऽपि वारितः ॥ ६।१३४ ॥

स्वं पुत्रीयत्सु भूपेषु निर्वीराया धनेच्छया ।
यः संतोषेण तन्मुञ्चन्नभूद्राजपितामहः ॥ ६।१३५ ॥

निर्वीराणां धनान्युज्झन् वीराणां च हरन्नसून् ।
यो धर्म्मयुद्धवीराणामभवन्मौलिमण्डनम् ॥ ६।१३६ ॥

यं चिरायुषमाकाङ्क्षन्मर्त्या एव न केवलम् ।
मृगलावकमीनाद्या अपि घातभयोज्झिताः ॥ ६।१३७ ॥

न केवलं नरानेवाध्वनि धर्म्ये न्ययुक्त यः ।
परित्याज्यामिषस्याशां बलात् दुर्दैवतान्यपि ॥ ६।१३८ ॥

श्रुत्वा पुनः कलिं जातबलं पुष्टवपुष्टरम् ।
हन्तुं चचाल चौलुक्यचक्रवर्त्ती सचेतनः ॥ ६।१३९ ॥

कलिना बलिना स्वीयबलस्याग्रेसरीकृतान् ।
द्यूतमद्यामिषाखेटभटनादौ जघान सः ॥ ६।१४० ॥

कलेः कलेवरे भक्तपानदानेन ये हिते ।
ते हते अमुना सूनाभ्राष्ट्र्यौ मोहस्य वल्लभे ॥ ६।१४१ ॥

अमारिशब्दभल्लीभिः कलिर्विद्धोपि भूभुजा ।
यदक्षतः स्थितस्तत्किमस्यायुर्निरुपक्रमम् ॥ ६।१४२ ॥

आद्यं संहननं किं वा किं वा प्राप्तं रसायनम् ।
किं वा सख्यं यमेनास्तीत्यूहाञ्चक्रे महाजनः ॥ ६।१४३ ॥

कलिर्गलिरिवोत्थातुमक्षमोऽथ क्षमोचितम् ।
आचरन् मुमुचे राज्ञा ग्लानघाती न हि प्रभुः ॥ ६।१४४ ॥

ततो निष्कण्टकीभूते जगति प्रतिमण्डलम् ।
जैनीं मृदुपदामाज्ञामचिखेलदिलापतिः ॥ ६।१४५ ॥

संजातमार्हतं चातुर्वर्ण्यं हिंसां जहौ जनः ।
सर्वत्र साधवोऽर्च्यन्तेऽधीयते धार्मिकी श्रुतिः ॥ ६।१४६ ॥

कुमारपालभूपालो यावत् पृथ्वीं शशास सः ।
अङ्गुल्यग्रेण भूस्पर्शी तावत्कृच्छ्रं स्थितः कलिः ॥ ६।१४७ ॥

भाग्यैरप्यसरसां स्वर्गसौधाध्यासिनि भूधवे ।
कलिस्तपात्यये शुष्कभेकवद्व्यलसत्पुनः ॥ ६।१४८ ॥

गुरुभक्तिं बलं बुद्धिं धर्ममायुः श्रुतं सुखम् ।
हापयामास सोऽनन्तगुणहान्यान्वहं नृणाम् ॥ ६।१४९ ॥

विरोधक्रोधदुर्बोधकूटोक्तीः कैतवं कलिम् ।
बर्द्धयामास सोऽनन्तगुणवृद्ध्या दिने दिने ॥ ६।१५० ॥

भूपानामप्यजय्योऽसौ रक्षोवत् क्षोभयन् जगत् ।
अध्रौव्यात्सर्वभूतानां कालेनानञ्च पञ्चताम् ॥ ६।१५१ ॥

जाते कलौ कथाशेषे व्यलापीन्मोहभूपतिः ।
स्मारं स्मारं गुणांस्तस्य स्वामिभक्तिबलादिकान् ॥ ६।१५२ ॥

रिपूणां च समुच्छेदं स्वजनानां च पोषणम् ।
यथासौ कृतवान्वीरमानो कोऽपि क्रियात्तथा ॥ ६।१५३ ॥

महारूपं महाप्रज्ञं महाशौर्यं महाबलम् ।
नरं न कुरुते प्रायश्चिरायुषमहो विधिः ॥ ६।१५४ ॥

फणिनेव तरुर्ग्राहिणेव वारि त्वया विना ।
आक्रम्यते सुखं जातदैन्यं सैन्यं परैर्मम ॥ ६।१५५ ॥

यद्वा स्त्रीबालसुलभैरमीभिः क्रन्दितैरलम् ।
यद्येतौ मे भुजौ क्षेमयुजौ तत्कोऽपरः क्षितौ ॥ ६।१५६ ॥

भित्त्वा शोकतमः सावष्टम्भमुत्थाय भूपतिः ।
गोभिरुर्वीचमूं सूर्यसमभाः समभावयत् ॥ ६।१५७ ॥

तेनाश्वासितमुल्लासमासदन्निखिलं बलम् ।
अहो आपद्गतस्यापि प्रभोः किमपि पाटवम् ॥ ६।१५८ ॥

कलौ व्युपरते वीतरागः प्रादुरभूत्पुनः ।
अर्यमेव तमःपूरे समस्तार्थप्रकाशकः ॥ ६।१५९ ॥

प्राग् ये मुक्तिपुरीपान्थाः कलिना बलिना धृताः ।
आसन्मोहगृहे दासास्तेषु केऽपि तदानशन् ॥ ६।१६० ॥

अभ्येत्य वीतरागं ते योजिताञ्जलिसंपुटाः ।
व्यजिज्ञपन्निजां मोहादनुभूतां विडम्बनाम् ॥ ६।१६१ ॥

ऊचुश्च त्वद्गतस्वान्ता मोहव्याधिमहौषधीम् ।
यथा लभामहे मुक्तिं कृपाकर तथा कुरु ॥ ६।१६२ ॥

जगाद जगतामीशस्ततः कारुणिकाग्रणीः ।
भव्या अव्याहता भूयाद्भवतां मुक्तिकामना ॥ ६।१६३ ॥

यदेष सिद्धिसंबन्धप्रतिबन्धकरः स्वयम् ।
कलिर्विलिल्ये तद्वित्थ स्वभाग्यं जातजागरम् ॥ ६।१६४ ॥

युष्माकमाकलय्याहं सकलाः कलियातनाः ।
उदासामास यं वाञ्छन् प्राप्तः सोऽवसरोऽधुना ॥ ६।१६५ ॥

विवेकवीरः स्वीकृत्य यदासौ संयमश्रियम् ।
उत्थास्यते युधे ध्वस्त एव मोहस्तदा ध्रुवम् ॥ ६।१६६ ॥

विवेक ! श्रृणु वत्स ! त्वं सत्त्वं धत्सेऽसमं यदि ।
दर्शयित्वा द्रुतं वीरचर्यामेतां समुद्वह ॥ ६।१६७ ॥

इयं वीरकुले जाता स्वयं वीरव्रताश्रया ।
वुवूर्षति वरं वीरमेव क्लीबेषु रोषिणी ॥ ६।१६८ ॥

अस्यामुल्लसति ज्ञानमुदूढायां महत्तमम् ।
न ह्येषा शेषयोषावद्बुद्धिबोधविरोधिनी ॥ ६।१६९ ॥

दूरे स्युर्देवता वश्या अप्यन्यवनितारसात् ।
एतत्सङ्गजुषामङ्घ्री सेवन्ते त्रिदशेश्वराः ॥ ६।१७० ॥

पुरुषाणां पथि प्रायः प्रमदाः पदबन्धनम् ।
एतत्सक्तो जनो मुक्तिमपि गेहाङ्गणीयति ॥ ६।१७१ ॥

नृणामाजीविकार्थं हि कामिन्यः क्लेशकारणम् ।
हरतीयं तु तां चिन्तां बाह्यवृत्त्याप्युरीकृता ॥ ६।१७२ ॥

प्रायो युवैव रामाणां रमणः स्यान्मनोरमः ।
एषा तु जरसि प्रीतिं धत्ते प्रत्युत साधुषु ॥ ६।१७३ ॥

लब्धयो बीजबुद्ध्याद्या अणिमाद्यास्तु सिद्धयः ।
अस्या एव प्रसादेन प्रादुःष्यन्ति स्वयं नृणाम् ॥ ६।१७४ ॥

दोषा अपि गुणायन्ते ह्येतया समवेतया ।
मुक्ता मुक्तावलौ काचमणिर्मरकतायते ॥ ६।१७५ ॥

कार्श्यं क्षुत्प्रभवं कदन्नमशनं शीतोष्णयोः पात्रता,
पारुष्यं च शिरोरुहेषु शयनं मह्यास्तले केवले ।
एतान्येव गृहे वहन्त्यवनतिं तान्युन्नतिं संयमे,
दोषाश्चापि गुणीभवन्ति हि नृणां योग्ये पदे योजिताः ॥ ६।१७६ ॥

विना स्नानं विशुद्धाङ्गी विना भूषां मनोरमा ।
विनाऽऽहारं बलवती सगुप्ता वसनं विना ॥ ६।१७७ ॥

विनैकान्तं कृतश्लेषा सुखदा मोहनं विना ।
विना यानं सहचरी प्रीतिभूः प्रणयं विना ॥ ६।१७८ ॥

न देवे न च देवेन्द्रे न चोपेन्द्रेऽपि कामुकी ।
इयं गुणाग्रहा शुद्धाशय एवानुरज्यति ॥ ६।१७९ ॥

तदेषा शेषयोषिद्भ्यो लक्षणैः स्वैर्विलक्षणा ।
न लोकोत्तरवृत्तेन विना संबन्धमर्हति ॥ ६।१८० ॥

अनया प्राक् प्रतिज्ञातमिति कामयतां स माम् ।
राधावेधं विधातास्येनाग्निज्वालां पिबंश्च यः ॥ ६।१८१ ॥

इमामत्रागतां पश्य भवद्वरणसाग्रहाम् ।
वीरवृत्त्या समानन्द्य तदेतां द्रुतमुद्वह ॥ ६।१८२ ॥

तच्छ्रुत्वा विकसल्लोमा मल्लो मानविवर्जितः ।
विवेकः प्रत्यवग् नाथ ! त्वं सर्वज्ञोऽसि किं ब्रुवे ॥ ६।१८३ ॥

अस्तु किं नाम सामर्थ्यमर्थ्यं मृदुहृदो मम ।
नीतोऽस्मि गुरुतां देव ! केवलं तव सेवया ॥ ६।१८४ ॥

नाथेऽतुलबले भृत्येष्वपि संभाव्यते बलम् ।
यान्ति चन्दनतां निम्बादयः श्रीखण्डखण्डगाः ॥ ६।१८५ ॥

भो भोः पश्यत पार्षद्या वीरकेलिकुतूहलम् ।
मया प्रसूयते भर्त्तुः पदातिपरमाणुना ॥ ६।१८६ ॥

अनन्तभवसंतानमण्डपेऽस्ति महोदयः ।
विशिष्टहृदवष्टम्भ इति स्तम्भः सदाकृतिः ॥ ६।१८७ ॥

तदाधाराणि कर्माणि परिवर्तीनि वेगतः ।
वामावामगतीन्यष्टौ चित्रं चक्राणि कुर्वते ॥ ६।१८८ ॥

तेषां परस्तादस्त्रस्तस्थैर्या तत्त्वकलाभिधा ।
राधा निरपराधापि ख्याता वेध्यतया सताम् ॥ ६।१८९ ॥

न्यस्तं स्तम्भाददूरेऽस्ति क्षमायां विबुधाधिपैः ।
गुरुस्नेहभृतं साधुवृत्तं सिद्धान्तकुण्डकम् ॥ ६।१९० ॥

स्वचिन्तनधनुर्धैर्यसायकेन समन्वितम् ।
तदन्तिके लभन्ते ते येषां तुष्यति सद्गुरुः ॥ ६।१९१ ॥

अनेके तं महास्तम्भमुपेताः पण्डितब्रुवाः ।
वेद्धुं राधां दुराराधां चिक्षिपुः स्वमनःशरान् ॥ ६।१९२ ॥

च्युतेषवो गलन्माना हस्यमाना महाजनैः ।
व्यावृत्ता मूढचित्तास्तेऽभूवन्नित्यानुतापिनः ॥ ६।१९३ ॥

विवेकस्तु जगन्नाथप्रणिधानपरायणः ।
राधावेधोपदेष्टारं स्वगुरुं पर्यवदन्त ॥ ६।१९४ ॥

तन्वन्नक्षोभया गत्या मौलिकम्पं महात्मनाम् ।
ययौ यत्रास्ति कोदण्डकाण्डमण्डितकुण्डकम् ॥ ६।१९५ ॥

तत्तथा स्थापयामास स यथा तत्र संक्रमात् ।
चक्राणि स्पष्टमैक्षिष्ट रूपाणीव सुदर्पणे ॥ ६।१९६ ॥

पुष्पैरष्टभिरानर्चाहिंसाद्यैः स धनुःशरम् ।
कथमिष्टार्थसिद्धिः स्यात्पूज्यपूजाव्यतिक्रमे ॥ ६।१९७ ॥

सगुणीभूतकोदण्डसंयोजितशिलीमुखः ।
सोऽदादानन्दनिर्वेदौ सत्सु मोहच्चरेषु च ॥ ६।१९८ ॥

ऊर्ध्वदिक्कृतसन्धानोऽधोदृग् जन्तुहितेच्छया ।
चिरं चक्रभ्रमीः पश्यन्निभृतं स समस्थित ॥ ६।१९९ ॥

धैर्येषुणा स चक्रौघविवरावसरं विदन् ।
सहसा साहसी राधामविध्यत्समितौ पटुः ॥ ६।२०० ॥

तदा जयजयारावं तन्वानास्त्रिदशेश्वराः ।
तद्यशोविशदैः पुष्पैर्वृष्टिं तन्मूर्ध्नि चक्रिरे ॥ ६।२०१ ॥

प्रीताः प्रावृट्पयोवाहपयसा पादपा इव ।
प्रमोदं परमं प्रापुः पौराः प्रेक्षापरायणाः ॥ ६।२०२ ॥

सर्वसङ्गपरित्यागवाचं वाचंयमाग्रणीः ।
स्वमुखेनाददे सैष सुखं शिखिशिखासखीम् ॥ ६।२०३ ॥

तद्वीरवृत्तिवीक्षोद्यदौत्सुक्याथ निचिक्षिते ।
उपसृत्याथ तत्कण्ठे संयमश्रीर्वरस्रजम् ॥ ६।२०४ ॥

गीतेऽथ धवलैः कीर्त्तिपूरे नृसुरयौवतैः ।
अभये घोषिते विष्वक् चराचरतनूमताम् ॥ ६।२०५ ॥

अविश्लेषधिया चित्ताञ्चले संबन्धिते मिथः ।
पुरोधसा गुणाहूत्या वर्द्धिते पावकार्चिषि ॥ ६।२०६ ॥

चिरादिष्टार्थसंसिद्धिजातप्रीतिविहस्तयोः ।
महस्तयोर्विवाहस्याभवत्त्रिभुवनोत्तरः ॥ ६।२०७ ॥

अस्मादस्माकमङ्गस्य भद्रं भावीति भावतः ।
उदूढेऽत्र जगज्जीवाः सर्वे मुमुदिरेतराम् ॥ ६।२०८ ॥

विवेकस्तत्सुखं लेभे कान्तयादृतया तया ।
यन्न चक्रिणि शक्रे वा कामिनीकुञ्जकुञ्जरैः ॥ ६।२०९ ॥

तन्नित्याश्लेषसञ्जातमहोत्साहः पदे पदे ।
एवं संदर्शयामास वर्धमानपराक्रमम् ॥ ६।२१० ॥

द्वाविंशतिमतिक्रूरानभ्युपेतान् परीषहान् ।
द्वीपिनो दमयामास मृगानिव स लीलया ॥ ६।२११ ॥

काङ्क्षाकूलङ्कषां विश्वप्लाविनीं वेगवाहिनीम् ।
विनावलम्बनं तीर्त्वा परं पारं जगाम सः ॥ ६।२१२ ॥

महाव्रतानि पञ्चापि मन्दरान्मन्दरागधीः ।
अविश्रामं समुद्दध्रे स एकतृणलीलया ॥ ६।२१३ ॥

निसर्गादुपसर्गाणां द्विषां सोऽनर्गलं बलम् ।
बलान्ममन्थ मन्थानो दधीवोदधिरोजसः ॥ ६।२१४ ॥

व्युत्सर्गकरपत्रस्य धारामध्यारुरोह सः ।
अच्छिन्नचरणः कस्य करोति स्म न विस्मयम् ॥ ६।२१५ ॥

निर्दयत्वाग्निना दीप्ते सर्वतो लोकसद्मनि ।
वसन्नपि न तत्ज्वालावलीढस्तापमाप सः ॥ ६।२१६ ॥

विललास विवेकस्य साहसिक्यं यथा यथा ।
तथा तथा प्रथामाप प्रेमास्मिन् संयमश्रियः ॥ ६।२१७ ॥

पत्न्याः स्नेहेन संसिक्तो विवेको वह्निवत् ज्वलन् ।
निःशेषद्वेषिवंशस्य विनाशार्थमुदस्थित ॥ ६।२१८ ॥

अतिमात्रं समं मात्रा मया ये मोहहेतुकाः ।
हृदन्तर्निहिताः सन्ति परोलक्षाः पराभवाः ॥ ६।२१९ ॥

सर्वान्निर्वासयिष्यामि तानद्येति कृताश्रवः ।
विवेकः सत्कथां नाम जयभम्भामवीवदत् ॥ ६।२२० ॥

तनयामात्यसामन्तारक्षा अक्षामशक्तयः ।
तत्रानभ्यर्थिताः संजग्मिरे संग्रामकामुकाः ॥ ६।२२१ ॥

हस्त्यश्वरथपत्तीनां सर्वसन्नाहशालिनाम् ।
वारैस्तारैरिवैणाङ्कः परिवव्रे स सर्वतः ॥ ६।२२२ ॥

न श्राव्या मे दुराभोगा भोगावल्यधुनेति ताम् ।
त्यजन् जयजयारावं तेने सुश्रुतमागधः ॥ ६।२२३ ॥

अचलानपि सद्बोधैर्ध्वनयन्ति क्षमाभृतः ।
गुरूपदेशवाद्यानि न्यनदन्नुच्चकैस्तदा ॥ ६।२२४ ॥

निवृत्तिजननीक्लृप्तसांपरायिकमङ्गलः ।
वधूद्वयदृगापानजातद्विगुणपौरुषः ॥ ६।२२५ ॥

आस्याद्विचारमित्रस्य पिबन् वीरकथारसम् ।
तृणवद्गणयन् वैरिबलं तज्जनितौजसा ॥ ६।२२६ ॥

धृत्वा निश्चयसन्नाहमासन्नाहवसंभ्रमः ।
इष्टसिद्ध्यै विवेकोऽथ ववन्दे परमेश्वरम् ॥ ६।२२७ ॥

उवाच भगवान् वत्स ! विनयादिगुणाकर ! ।
जाने ज्ञानेन ते नास्ति दुरपोहः स मोहराट् ॥ ६।२२८ ॥

योग्योऽसि जन्मतस्तत्ते मया प्राभवमर्पितम् ।
स्थामदं राज्यमाज्यं च कुपात्रे निदधीत कः ॥ ६।२२९ ॥

मोहस्तीव्रतया जैत्रस्त्वं प्रशान्ततया पुनः ।
तुल्यौजसौ वनप्लोषे हिमवह्नी हिमाहिमौ ॥ ६।२३० ॥

भिनत्ति भूभृतोऽप्युच्चैः शीतोऽपि सलिलप्लवः ।
एवं शान्तरसस्थस्त्वं हंसि मोहभटान् युधि ॥ ६।२३१ ॥

विध्यापनीयः पानीयस्यानुष्णस्याहिमोऽनलः ।
शीतप्रकृतिरप्येवं त्वं पराजेष्यसे परान् ॥ ६।२३२ ॥

उष्णः सूर्यः सदैकाकी शशी शीतो गणान्वितः ।
शीता छाया न कस्येष्टा तापकृच्चातपः पुनः ॥ ६।२३३ ॥

सद्भृत्य ! तन्निजं शैत्यमत्यजन् रुज दुर्हृदः ।
सोऽद्य सोद्यमसाफल्यं यायात्तव मनोरथः ॥ ६।२३४ ॥

निवृत्तिजननीं मा स्म कार्षीः क्वापि दवीयसीम् ।
अस्या आलोकमात्रेण यासि लोकोत्तरं ततः ॥ ६।२३५ ॥

अयं भवविरागस्ते ज्यायान् स तनयो नयी ।
जातमात्रस्य यस्यौजो न सोढं मोहसैनिकैः ॥ ६।२३६ ॥

इमौ संवेगनिर्वेदौ दारकौ द्विट्विदारकौ ।
युध्यमानौ रणक्षेत्रे विश्वं विस्मापयिष्यतः ॥ ६।२३७ ॥

सम्यग्दृष्टिरमात्यो यः स धार्यः स्वान्तिके त्वया ।
यत्साफल्यमनेनैव यान्ति सर्वा रणक्रियाः ॥ ६।२३८ ॥

चत्वारस्तव सामन्ताः समन्ताद्ये शमादयः ।
एष्वेकैकोऽपि निर्जेतुं प्रभूष्णुर्मोहमाहवे ॥ ६।२३९ ॥

ज्ञानाख्यो यस्तलारक्षो बहुमान्यः सदा स ते ।
योऽरिर्युद्धे यथा जेयः सर्वं वक्ता स एव ते ॥ ६।२४० ॥

सामायिकादिकर्म्माणि प्रयुञ्जानः परान् प्रति ।
पुरोहितोऽयं सद्धर्म्मः कस्तवास्मात्परो हितः ॥ ६।२४१ ॥

यशोधर्मरदाः स्फूर्जत्कराः सद्गतिहेतवः ।
अमी धर्मादिदांनेभास्तव सह्याः कथं परैः ॥ ६।२४२ ॥

रथाः सुसूत्रनिष्पन्नाः शीलाङ्गानि सहस्रशः ।
व्याहन्यन्ते रणे केन युक्ता जयपताकया ॥ ६।२४३ ॥

उष्णास्तेजस्विनश्चामी तपोभेदास्तुरङ्गमाः ।
क्षणात् क्षुन्दन्त्यरिचमूं खरताखुरताडनैः ॥ ६।२४४ ॥

ये शुभाध्यवसायाख्याः स्वामिभक्ता भटा अमी ।
स्वकार्यं साधयन्त्येभिरेवोपात्ता इभादयः ॥ ६।२४५ ॥

सेनानीर्योऽयमुत्साहो वत्साहोरात्रमुद्यमी ।
रणश्रान्तान् भटानेष एव योधयिता तव ॥ ६।२४६ ॥

प्रायश्चित्ताख्यया नीराध्यक्षो लक्ष्योऽयमात्मवत् ।
भटेष्वपि प्रहारार्त्तेष्वयमेव चिकित्सकः ॥ ६।२४७ ॥

शय्यापालादयोन्येऽपि तव ये पक्षपातिनः ।
ते सर्वेऽप्युपकर्त्तारस्त्वामसंबन्धवत्सलाः ॥ ६।२४८ ॥

जाये ते सहचारिण्यौ जायेते यदि संयुगे ।
स्त्रीबुद्ध्या नावगण्येते सर्वयोधाधिकौजसौ ॥ ६।२४९ ॥

अथानुज्ञाप्य लोकेशं विवेकोऽभाषत प्रिये ।
युवां किं नु विधास्येथे यास्यामः समरे वयम् ॥ ६।२५० ॥

ते प्रोचतुः प्रिय ! प्रश्नप्रयासोऽयं वृथा तव ।
त्वां विनाऽऽवां क्वचिन्न स्वः स्वो वा सद्यो म्रियावहे ॥ ६।२५१ ॥

ग्राह्या सह न सा नारी या नारीनर्दितुं प्रभुः ।
आवां पुनर्द्विषां सेनां सेनां विद्वस्तृणोपमाम् ॥ ६।२५२ ॥

दयितेनाभ्यनुज्ञाते ततस्ते प्रस्थिते सह ।
व्यतीयन्ते स्त्रियः काश्चित् पुंसः सत्त्वपरीक्षणे ॥ ६।२५३ ॥

प्रशमेन समं क्षान्तिर्नम्रता मार्दवेन च ।
प्रसत्तिरार्जवेणापि संतोषेन समं धृतिः ॥ ६।२५४ ॥

अनुप्रेक्षा विचारेणामलबोधेन मार्गणा ।
त्रिशुद्धयः कारणिकैः समं तपैरुपक्रियाः ॥ ६।२५५ ॥

ओजस्विता बलेशेनास्तिक्यबुद्धिः पुरोधसा ।
श्रेष्ठिना सत्यवाग्नीराध्यक्षेणावद्यभीरुता ॥ ६।२५६ ॥

एकत्वधीब्रह्मविद्याभवनिन्दाः प्रियाः सुतैः ।
उत्तस्थिरे महामात्येनामारामा गुणज्ञता ॥ ६।२५७ ॥

एवं युद्धाय सन्नद्धे विवेको योधमण्डले ।
प्रतिवैरिप्रयाणार्थमुपाक्रमत विक्रमी ॥ ६।२५८ ॥

विविधान्यायुधान्यासन्नासन्नरणसिद्धये ।
सर्वेषामपि वीराणां शुक्लध्यानभिदास्तदा ॥ ६।२५९ ॥

गुरुशिक्षास्तनुत्राणि तनुत्राणं वितेनिरे ।
सुसंबद्धाः प्रवीराणां विज्ञानघटनोचिताः ॥ ६।२६० ॥

नाथेनाथाभ्यनुज्ञातो जनन्या जनितोत्सवः ।
दत्ताशीः कुलवृद्धाभिर्मित्रेणात्यक्तसन्निधिः ॥ ६।२६१ ॥

विवेकः प्राचलत्कीर्तिपटुघण्टारवोत्कटम् ।
आरूढः प्रौढमुत्तुङ्गयोगिसङ्गमतंगजम् ॥ ६।२६२ ॥

एकैकोऽहं पराजेष्ये मोहराजं महौजसम् ।
इति प्रतिज्ञां कुर्वाणा वीरास्तं परिवव्रिरे ॥ ६।२६३ ॥

नव्यनव्यगुणस्थानभूमिखण्डविहारिणि ।
तस्मिन्नवापदामोदममन्दं सज्जनो जनः ॥ ६।२६४ ॥

येऽदयाः क्रूरकर्माणः सकूटाः कुटिलाशयाः ।
ते सर्वेऽपि व्यलीयन्त तत्प्रतापपराहताः ॥ ६।२६५ ॥

मिलितैर्भूरिभिर्भव्यभटैस्तस्य वरूथिनी ।
प्रतिक्षणमवर्द्धिष्ट वाहैरिव महानदी ॥ ६।२६६ ॥

मानोन्नतजनक्ष्माध्रचिंत्तगह्वरवासिनः ।
तच्चमूतुमुलास्त्रेसुः कदाग्रहमृगारयः ॥ ६।२६७ ॥

श्रद्धालुतोपदायुक्तान् प्रियवाग्गोरसाञ्चितान् ।
ग्राम्यानपि समायातान् पुण्यवाचा प्रमोदयन् ॥ ६।२६८ ॥

स्वप्रतापयशोमञ्जुगुञ्जामौक्तिकधारिणः ।
पुलिन्दानपि सस्नेहमीक्षमाणो वनस्थितान् ॥ ६।२६९ ॥

मा भैषीत्कोऽपि मा त्याक्षीज्जनः स्वं स्थानमित्यसौ ।
उद्घोषयन्वशीचक्रे विश्वं वीरो विनाहवम् ॥ ६।२७० ॥

तस्मिन् वैरिविधाय धावति जनाः सर्वे तदाज्ञाधना,
आधिव्याधिविरोधरोधमदधुर्नो युग्मिजाता इव ।
योगज्ञा इव नाध्यशेरत वियोगानङ्गसङ्गव्यथां,
वैशद्यं परमार्थदं परिगता मुक्ता इव भ्रेजिरे ॥ ६।२७१ ॥

## सप्तमोऽधिकारः

इतश्च मोहभूपालः कदागमचराननात् ।
शुश्राव विक्रमारम्भं विवेकस्य सुदुःश्रवम् ॥ ७।१ ॥

अमर्षपूरितः सोऽथ सर्वान् सामन्तमन्त्रिणः ।
सदा सन्निहितानूचे हंहो शृणुत भाक्तिकाः ॥ ७।२ ॥

वीरव्रतं वहन्नेष विवेको वरविक्रमः ।
अनिरुद्धो भुवं क्रामत्येष तत्किं विधीयताम् ॥ ७।३ ॥

ते प्रोचुः के वयं कर्मकिङ्कराः पुरतस्तव ।
प्रभोऽल्पानपि नः प्रौढिं नयसि पश्नतोऽमुतः ॥ ७।४ ॥

विद्वानप्यनुयुञ्जानः सेवकान्मेदिनीपतिः ।
स्वं च तांश्च धियः प्रेम्णश्चापि भाजनतां नयेत् ॥ ७।५ ॥

तद्ब्रूमहे यथावस्तुतत्त्वं सात्त्विकपुङ्गव ।
नाभिषेणयितुं युक्तो विवेकस्तव सांप्रतम् ॥ ७।६ ॥

यतः परां प्रभुत्वस्य कोटिमारूढवानसि ।
अद्य त्वया समः कोऽपि न शक्तश्चक्रवर्त्यपि ॥ ७।७ ॥

लीलया जिगेथ यथा जगत्त्वं कस्तथापरः ।
अथ त्रिभुवनेशस्य न काचिन्न्यूनतास्ति ते ॥ ७।८ ॥

अयं कुतोऽपि निर्मूलमासाद्य प्राभवं नवम् ।
कुरुते श्रीभरोन्मत्तो विवेकष्टिट्टिभायितम् ॥ ७।९ ॥

भवान् पुनर्महाम्भोधिरिव न क्षोभमर्हति ।
नेतुर्दुर्यशसां हेतुः क्षुद्रेण सह विग्रहः ॥ ७।१० ॥

पित्रा निर्वासितः पूर्वं ततो लब्धोदयस्तव ।
सुतेन त्रासितोऽप्येष योधाख्यां दधतेऽत्रपः ॥ ७।११ ॥

उपेक्ष्यपक्षे निक्षेप्यस्तदसौ स्वामिनाधुना ।
इत्यस्माकं मतिर्देवाशयस्याथ प्रमाणता ॥ ७।१२ ॥

मोहोऽवदन्महाभागा विवेकः किमुपेक्ष्यते ।
पोष्या उपेक्ष्याः पेष्या हि प्रियोदासीनविद्विषः ॥ ७।१३ ॥

अयं महाविरोधी नो वध्य एव यथा तथा ।
उपेक्षितो हरिव्याधिरिव प्राणप्रहाणकृत् ॥ ७।१४ ॥

प्राप्तकालस्ततोऽनेन समं संग्राम एव मे ।
अमोहमविवेकं वा भवत्वद्य जगत्त्रयम् ॥ ७।१५ ॥

हंहो पाखण्डिनः सर्वैः शृण्वद्भिः किं विलम्ब्यते ।
मिथ्यावाचोऽभिताड्यन्तां रयात्प्रस्थानभेरयः ॥ ७।१६ ॥

भेरीभाङ्कारतोऽभीयुर्योधाः सद्यः स्मरादयः ।
अहंपूर्विकया सर्वे जयलक्ष्मीं जिघृक्षवः ॥ ७१७ ॥

स्मरेण सह युद्धवानो येऽभूवन् सुभटाः पुरा ।
समग्रान् सह जग्राह मोहस्तान् जितकासिनः ॥ ७१८ ॥

विवेकं प्रति यानाय मोहे प्रोत्साहशालिनि ।
विश्वमाबालगोपालमासीदाशीर्वचःप्रदम् ॥ ७१९ ॥

अथ जडतया पत्न्यान्वीयमानः पदे पदे ।
हिंसादिहरिणाक्षीभिर्गीयमानगुणव्रजः ॥ ७२० ॥

प्रयुक्तव्यक्तकल्याणवाणिः कुश्रुतबन्दिना ।
अपिनद्धदुरावेशसन्नाहः साहसोल्बणः ॥ ७२१ ॥

अनर्थदण्डकोदण्डदण्डमण्डितदोर्लतः ।
दधन्मतिश्रुताज्ञानतूणीरौ बाणपूरितौ ॥ ७२२ ॥

निष्कृपत्वकृपाणेन कम्पयन्नमरानपि ।
अक्षामं तामसं भावं शिरस्कं दधदायसम् ॥ ७२३ ॥

सर्वतो निनदन्मिथ्यावादवादित्रडम्बरः ।
आरूढो यमयानाभमसत्सङ्गमतङ्गजम् ॥ ७२४ ॥

विरोधिरोधसाहाय्यकृति दत्ते पुरोधसा ।
गुरुकर्मोदये लग्ने प्रतस्थे मोहभूपतिः ॥ ७२५ ॥

पुरः प्रतस्थिरे तस्य कुविकल्पाः पदातयः ।
अदभ्रसंभ्रमाद्भूमिमस्पृशन्त इव क्रमैः ॥ ७२६ ॥

परितः प्रावृता रौद्रदुर्ध्यानव्याघ्रचर्मणा ।
रथा दधाविरे तेषां पृष्ठतो दुर्म्मनोरथाः ॥ ७२७ ॥

प्रियप्राप्त्यप्रियाप्राप्तिकामाः पवनवेगिनः ।
तरलास्तुरगास्तेषामनुगाः कोटिशो बभुः ॥ ७२८ ॥

उच्चोच्चतरसंपत्त्यभिलाषा प्रसरन्मदाः ।
चेरुर्मेरुसमास्तेषां पृष्ठतो गन्धसिन्धुराः ॥ ७।२९ ॥

आययुस्तस्य सामन्तमन्त्रिमित्रपुरोधसः ।
कोशाध्यक्षतलारक्षद्वाःस्था आस्थानमण्डपम् ॥ ७।३० ॥

प्रमादमादरान्मोहः क्षमोऽहमिति मानिनम् ।
तदा चक्रे मुदा चक्रे स्वे समस्तेऽपि नायकम् ॥ ७।३१ ॥

अमी गजा अमी अश्वा अमी रंहस्विनो रथाः ।
एते योधा अयं कोशः सर्वमेतद्वशे तव ॥ ७।३२ ॥

मार्गे संग्रामशीर्षे वा वीर ! त्वमखिलं बलम् ।
यथार्हं विनियुञ्जीथाः स्नेहादित्यादिशच्च तम् ॥ ७।३३ ॥

नृपादेशात्प्रमादोऽपि सेनामव्यथितः पथि ।
सुखेन नाविको नावमिवाम्भोधौ व्यहारयत् ॥ ७।३४ ॥

सर्वत्र प्रसृताप्येषा दक्षिणेन सुमेरुतः ।
बाहुल्येन स्थिता सेना निजरक्षापरायणा ॥ ७।३५ ॥

एवमाकर्ण्य मोहस्य महिमानं महामनाः ।
विवेक एकतानोऽभूदथ तस्याभिषेणने ॥ ७।३६ ॥

दृग्गोचरं चिरात्प्राप्ते परचक्रे स कश्चन ।
मनस्विनः प्रमोदोऽभून्नाभूत्पाणिग्रहेऽपि यः ॥ ७।३७ ॥

श्रुतिमार्गेण वीराणां प्राप्य क्षेत्रमवीवृधत् ।
रोमाङ्कुरोद्गमं वाद्यध्वनिर्धारा घनोद्भवा ॥ ७।३८ ॥

झात्कारभाञ्जि शस्त्राणि दृश्यमानानि दूरतः ।
कदलीपत्रवत्त्रासं न वीराणां वितेनिरे ॥ ७।३९ ॥

मनो मोहे विवेके च यदा यत्र दृशं ददौ ।
पुत्रप्रेम्णा तदा तत्रैवेहाञ्चक्रे जयश्रियम् ॥ ७।४० ॥

तथाविधाध्यवसायास्तदानीं सन्धिपालकाः ।
विवेकभूपमभ्येत्यावसरज्ञा व्यजिज्ञपन् ॥ ७४१ ॥

न वयं देव ! कस्यापि वारिवन्नित्यसेवकाः ।
यं श्रयेम यदा वृक्षवत्तदा वर्धयेम तम् ॥ ७४२ ॥

तत्त्वां हिताशया ब्रूमो यद्यपि त्वं विभूयसे ।
तथापि मोहराजस्ते न ह्यवज्ञातुमर्हति ॥ ७४३ ॥

अयं चिरन्तनोऽनेकानीकनिर्व्यूढसाहसः ।
पुत्रैः परिवृतः पत्रैरिव वैश्रवणालयः ॥ ७४४ ॥

व्याकोशैरकृशः कोशैः कमलैरिव पल्वलः ।
सौभाग्यसुन्दरः शूरः साक्षी सकलकर्मणाम् ॥ ७४५ ॥

प्रतापाक्रान्तदिक्चक्रः शक्रचक्रिनमस्कृतः ।
कृतिस्ततः सहानेन घटते नाहवस्तव ॥ ७४६ ॥

चेन्नैकेन त्वयाऽमानि मोहस्तन्न्यूनतास्य का ।
असंमतोऽपि हंसस्य वारिदो विश्ववल्लभः ॥ ७४७ ॥

यो बहूनां प्रियस्तेन विरोधो न सुखावहः ।
अन्नं जगत्प्रियं तस्मिन्नरुचिः किं न मृत्यवे ॥ ७४८ ॥

यामः स्वैरविहारेण यत्र यत्र जगत्त्रये ।
पश्यामस्तत्र तत्रैतन्मोहसैन्यमवस्थितम् ॥ ७४९ ॥

क्व विश्वव्यापिनी मोहसेना सागरजित्वरी ।
क्व च ते गोष्पदप्रायं सैन्यमत्यल्पभूस्थितम् ॥ ७५० ॥

त्रिलोक्यां मानुषक्षेत्रे प्रायेणावस्थितिस्तव ।
तत्रापि कर्म्मभूमीषु तत्रापि विमले कुले ॥ ७५१ ॥

तत्रापि भव्यजीवेषु तत्राप्युद्बुद्धबोधिषु ।
मोहस्य तु स्थितिं पश्य त्रिलोके सचराचरे ॥ ७५२ ॥

मिलितं मोहसैन्येन त्वत्सैन्यं लप्स्यते दशाम् ।
स्रोतःप्रतिपतत्श्रोतस्विनीस्रोतःसहोदरीम् ॥ ७५३ ॥

सत्संगत्यागमश्रुत्या त्वं विवेक ! प्रकाशसे ।
शश्वद्भास्वर एवायं स्वभावेन शरीरिषु ॥ ७५४ ॥

नाभव्यैः श्रीयते भव्यैरपि नामुक्तिगैर्भवान् ।
वद कोऽसौ जनो येन नायं नित्यं निषेव्यते ॥ ७५५ ॥

त्वं चिराज्जायसे जातोऽपि न जीवसि निर्भरम् ।
अनादिरयमापीतामृतवन्म्रियते न हि ॥ ७५६ ॥

त्वं भक्तेस्तत्सुखं दत्से यदक्षाणामगोचरम् ।
स तु दत्तेऽङ्गिनामक्षाह्लादसंपादनक्षमम् ॥ ७५७ ॥

ये त्वय्यतिरतास्ते स्युर्गिरिगह्वरचारिणः ।
मृगाक्षीभिः समं सौधेष्वस्य खेलन्ति सेवकाः ॥ ७५८ ॥

भवन्त्येकाकिनस्त्यक्तकुटुम्बास्त्वद्वशा विशः ।
पुत्रपौत्रादिसंतत्या प्रसरन्ति च तद्वशाः ॥ ७५९ ॥

यौवने व्यक्तसंज्ञानां मोहो देहे नृणां नवे ।
विवत्सुं त्वामपाकृत्य वासमासूत्रयत्यसौ ॥ ७६० ॥

जरसा जर्जरं जानन्मुञ्चत्येष वपुः स्वयम् ।
यदा तदापि केषांचित्त्वं तस्मिन् वासमश्नुषे ॥ ७६१ ॥

का ते स्पर्धा समं तेन तन्निवर्त्तस्व विग्रहात् ।
व्रजस्व स्थानमेषोऽपि भवतु स्वार्थसाधकः ॥ ७६२ ॥

इत्युक्त्वा बद्धमौनेषु तेषु प्रोचे विवेकराट् ।
युष्माभिर्यदिहोक्तं तद्युक्तं निःसीमधीमताम् ॥ ७६३ ॥

मोहस्य महिमाशंसि यत्तत्तद्गुणवर्णनैः ।
तद् ज्ञातमेव मे यत्प्रागेकत्रैवावयोः स्थितिः ॥ ७६४ ॥

दुर्दिनं मलिनं तन्वन्नन्वहं पङ्कवर्द्धनः ।
कथमिष्टो घनो हंसे शुक्लपक्षे विवेकिनि || ७१६५ ||

बहूनां संमतो मोह उत्कटानामिवासवः ।
किं तस्मिंश्चेतनाचौरे सक्तव्यं विबुधैरपि || ७१६६ ||

तस्य सैन्यमसारत्वाद्विष्वग्धूलीव विस्तृतम् ।
सारा मम चमूश्चामीकरवत्प्रमिताश्रया || ७१६७ ||

उच्छितं व्यथितुं मोहसेनां मत्सैन्यमाप्स्यति ।
विश्वव्यापितमःस्तोमध्वंसितिग्मांशुतीव्रताम् || ७१६८ ||

मामेव भास्वरं ब्रूत देवादीन् योऽवबोधये ।
किं मोहो भास्वरो येन विद्वानपि विमुह्यति || ७१६९ ||

सर्वस्योपरिवर्त्यस्मि भव्यैः स्तोकैरपि श्रितः ।
श्रीमानेकोऽपि वश्योऽस्तु निःस्वकोट्यापि किं फलम् || ७१७० ||

अपटौ मयि मोहेन विजजृम्भे यदृच्छया ।
ज्ञास्यतेऽस्य चिरायुष्टा मय्यथ (मय्यद्य) प्राप्तपाटवे || ७१७१ ||

दत्ते मोहः सुखं बाह्यं परप्रत्ययमित्वरम् ।
अन्तरङ्गं स्वसंवेद्यमविनाशमहं पुनः || ७१७२ ||

ये सौधेषु विलासास्ते तत्त्वतो मत्प्रसादजाः ।
निवासो नरकेष्वेव मोहे तुष्टे नृणां ध्रुवम् || ७१७३ ||

पलायने द्विषद्भ्यो वा तरणे वा महाम्भसः ।
एकाकी वा कुटुम्बी वा कः सुखी सत्यमुच्यताम् || ७१७४ ||

बिभ्यतः कर्मवैरिभ्यो भवाब्धिं वा तितीर्षतः ।
एकाकित्वमहं मोहः कुटुम्बं राति को हितः || ७१७५ ||

तनौ तारुण्यमैरेयपानगोष्ठ्या वसामि न ।
विस्रसाविमलीभूतां मत्वा तामाश्रयाम्यहम् || ७१७६ ||

यौवनेऽपि शिवादीनामिव येषां वपुः शुचि ।
वसामि तत्र हंसो हि न वसत्याविले जले ॥ ७।७७ ॥

आद्ये वयसि यः शान्तः स शान्त इति मे मतिः ।
धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥
अयं स्वयं नयं लुम्पल्लम्पटत्वकरोङ्गिनाम् ।
समाधिध्वंसनो दुःखद्रुमसंदोहदोहदः ॥ ७।७८ ॥

अमुष्यानीकमुख्या ये तेऽपि लोकसुखद्विषः ।
यद्वा युक्तमिदं जात्यभृत्याः स्वामिसमक्रियाः ॥ ७।७९ ॥

तयाह्यात्यन्तिको मोहः प्राज्ञमप्येककुण्डलम् ।
षण्मासीं कृष्णकुणपोत्पाटनेन व्यडम्बयत् ॥ ७।८० ॥

क्रोधात्कंसादयः क्षीणा मानाद्दुर्योधनादयः ।
दम्भादुदायिमाराद्याः सुभूमाद्यास्तु लोभतः ॥ ७।८१ ॥

प्रमादात्कण्डरीकाद्याः प्रद्योताद्याश्च कामतः ।
रागतो विक्रमप्राया द्वेषतः कूणिकादयः ॥ ७।८२ ॥

व्यसनान्मूलदेवाद्या मिथ्यात्वात्कपिलादयः ।
पाखण्डिसंस्तवाच्चारुदत्ताद्याः सुखतश्च्युताः ॥ ७।८३ ॥

जगत्कदर्थयत्येवमस्मिन्निष्कारणद्विषि ।
शक्तः कथमहं तिष्ठाम्यौदासीन्येन सैन्ययुक् ॥ ७।८४ ॥

ब्रूत सैन्ये ममानेकभटेष्वारभटेष्वपि ।
किं क्वचित्कोपि केनापि कदापि क्लेशितो जनः ॥ ७।८५ ॥

धर्माज्जयः क्षयः पापादित्युक्तिर्यदि वास्तवी ।
मोहो द्रोहोत्सुकः सत्सु तन्मया जेष्यते ध्रुवम् ॥ ७।८६ ॥

प्रौढाः परिभवाः सोढा येऽस्मादस्माभिराजनुः ।
मोहस्योन्मूलने जातास्त एव सहकारिणः ॥ ७।८७ ॥

योऽयं सारपरीवारः पार्श्वतः संगतोऽस्ति मे ।
रणे रिपुमपिष्ट्वाहं जीवंस्तेभ्यस्त्रपे न किम् ॥ ७।८८ ॥

एवं निश्चयमाकर्ण्य विवेकस्य महात्मनः ।
यथागतं गताः सन्धिपाला अकृतसन्धियः ॥ ७।८९ ॥

अथ प्रतिक्षणोल्लासिरणाशाविकसत्तनुः ।
सैन्यानदैन्यालम्बिन्या वाचा प्रोचे विवेकराट् ॥ ७।९० ॥

हंहो नः सह मोहेन युद्धं तावदुपस्थितम् ।
युद्धमेव हि शूराणां सत्त्वस्वर्णकषोपलः ॥ ७।९१ ॥

आरेभे युद्धकर्मेदं सहायानां बलेन वः ।
स मोहः सोऽहमेतावदन्यथा किं विलम्बितः ॥ ७।९२ ॥

लावण्यपुण्यकन्याया विवाहे न तथोत्सवः ।
वीराणां रणवेद्यन्तर्जयश्रीवरणे यथा ॥ ७।९३ ॥

वीराणां वपुषः शोभा न तथा चन्दनद्रवैः ।
युद्धे यथायुधाघातस्रवदस्रभरप्लवैः ॥ ७।९४ ॥

हारार्द्धहारकेयुरैर्न तथा मोदते मनः ।
समरे संमुखैः शस्त्रप्रहारैर्दोष्मतां यथा ॥ ७।९५ ॥

न हि बाहुभवाः प्राहुस्तीर्थमाहवतः परम् ।
यत्र सत्त्वाधिका देवभूयं यान्ति गतासवः ॥ ७।९६ ॥

अङ्गनागजराज्यश्रीस्पृहया क्षत्रिया रणम् ।
विशन्तो नैव रुध्यंते वीरुधेव वनं गजाः ॥ ७।९७ ॥

खड्गतालैर्धनुर्ध्वानस्फुरन्मुरजनिःस्वनैः ।
रणरङ्गे नरीनर्त्ति वीराणां कीर्त्तिनर्त्तकी ॥ ७।९८ ॥

तावत्प्रियतमाः प्राणा यावद्दूरे द्विषद्बलम् ।
दृष्टे द्विषद्बले प्राणांस्तृणीयन्ति मनस्विनः ॥ ७।९९ ॥

भर्त्रा सप्रश्रयं भृत्या भोजिता भो जिताहवाः ।
यान्त्यानृण्यं कथं स्वामिक्लेशेऽप्यतृणितासवः ॥ ७।१०० ॥

वाहनं कवचः शस्त्रमयं बाह्यो हि डम्बरः ।
औरसं साहसं येषां वस्तुतस्ते जयास्पदम् ॥ ७।१०१ ॥

भूत्वा सत्त्वाधिका यूयं युध्यध्वे मोहसैनिकैः ।
अपास्तशत्रवो मन्ये जयश्रियमवाप्स्यथ ॥ ७।१०२ ॥

ब्रूत किं कस्य सामर्थ्यं को वा कस्य परिच्छदः ।
जय्यो वा कस्य को वैरी कस्योत्थापनिका कदा ॥ ७।१०३ ॥

उचे भवविरागोऽस्य तनयो विनयोज्वलम् ।
भर्तुः पुरो न भृत्यानां युक्तं स्वगुणवर्णनम् ॥ ७।१०४ ॥

परं यदीशितुः प्रश्नोत्तरदानेऽलसायते ।
तत्स्यादाशातना पापबीजं तत्किञ्चिदुच्यते ॥ ७।१०५ ॥

स्वामिन्नहं भवावर्त्तगर्त्तकुक्षिमितं क्षमे ।
भक्तं जनं समुद्धर्त्तुं नानारूपविधानतः ॥ ७।१०६ ॥

चलेऽचले परे दुःखहेतौ वस्तुनि देहिनाम् ।
वैपरीत्येन या बुद्धिस्तामुच्छेत्तुमहं क्षमे ॥ ७।१०७ ॥

ममान्तरः परीवारो भृत्याः श्रोत्रजयादयः ।
भूभुजः करकण्ड्वाद्या नैकशो बहिरङ्गकः ॥ ७।१०८ ॥

प्राप्य देशविरत्यादिगुणस्थानभुवं ध्रुवम् ।
शत्रून् संहर्तुमुत्थास्ये पुरस्तव रणक्षणे ॥ ७।१०९ ॥

अथ संवेगनिर्वेदावस्तखेदाववोचताम् ।
मोहस्नेहमपाकर्तुमावां देव क्षमावहे ॥ ७।११० ॥

असंमोहावधाद्रोहप्रायान्तरपरिच्छदौ ।
युधिष्ठिरादयो भूपा वेलां प्राप्य भजन्ति नौ ॥ ७।१११ ॥

अप्रमत्तादगुणस्थानात्कृतोत्थानौ शनैः शनैः ।
रागद्वेषौ कथाशेषौ विधास्यावो वधोचितौ ॥ ७।११२ ॥

एवं पुत्रैस्त्रिभिर्व्यक्तमुक्ते भुजबले निजे ।
सम्यग्दृष्टिरथामात्योऽवदत्स वदतां वरः ॥ ७।११३ ॥

स्वामिन्ननादिसंसारस्रोतःपूरानुपातिनः ।
जनानुध्धृत्य शक्त्याहमचिरात्प्रापये तटम् ॥ ७।११४ ॥

देवे धर्मे गुरौ तत्त्वे दिग्मूढानां शरीरिणाम् ।
मीमांसाञ्जनयोगेन व्यपोहेऽहं मतिभ्रमम् ॥ ७।११५ ॥

आस्तिक्यस्थैर्यनैपुण्यमुख्यान्तरपरिच्छदम् ।
मां सेवन्तेऽनिशं भूपाः सत्यकिश्रेणिकादयः ॥ ७।११६ ॥

मयि तुर्यं गुणस्थानमासाद्योत्थानशालिनि ।
मोहामात्यस्य मिथ्यादृग्नाम्नो भावी ध्रुवं क्षयः ॥ ७।११७ ॥

शमोऽवददहं दाहं देहिनां हर्तुमीश्वरः ।
मां विना दाहनालीढमिव संतप्यते जगत् ॥ ७।११८ ॥

स्वास्थ्यशैत्यजगन्मैत्र्यमुख्यान्तरपरिच्छदे ।
सागरेन्दुनागदत्तादयो वीराः स्थिता मयि ॥ ७।११९ ॥

नवमेऽहं गुणस्थानेऽनवमेऽदभ्रसंभ्रमः ।
क्रोधयोधमसद्रोधः प्रापयिष्ये यमालयम् ॥ ७।१२० ॥

अथोचे मार्दवेनोच्चैः स्वौजषा देव ! सत्वरम् ।
स्तम्भीभूतं जगन्मानाद्वेत्रवन्नामयाम्यहम् ॥ ७।१२१ ॥

प्रश्नप्रणामसंमानप्रायान्तरपरिच्छदः ।
सौनन्देयेन्द्रभूत्याद्या भटा मां बहु मन्वते ॥ ७।१२२ ॥

अनिवृत्तिगुणस्थाने कृतोत्थाने रयान्मयि ।
अहङ्कारो न हुङ्कारमपि कर्तुं क्षमिष्यते ॥ ७।१२३ ॥

उवाचार्जवसामन्तो मनांसीष्टशरीरिणाम् ।
प्रभूयेऽहं समीकर्तुं विषमान्यपि लीलया ॥ ७।१२४ ॥

सरलालापविश्वासविश्ववाल्लभ्यसन्निभाः ।
अन्तरङ्गा भटा नैके जीवन्ति मयि जीवति ॥ ७।१२५ ॥

प्रकाशयन्तः सद्भावं पृच्छतो भूपतेः पुरः ।
भटाः क्षुल्लकुमाराद्या मम बाह्यास्तु सेवकाः ॥ ७।१२६ ॥

अनिवृत्तिगुणस्थाने दीक्षितस्याजिदीक्षया ।
ममोत्थानवतो हन्त दम्भः किं भविता पुरः ॥ ७।१२७ ॥

संतोषः स्माह गम्भीरां गुर्वीमच्छिन्नसंततिम् ।
स्वामिन् ! शोषयितुं शक्तः सोऽहं काङ्क्षातरङ्गिणीम् ॥ ७।१२८ ॥

समाधिधृतिमाधुर्यं धुर्यान्तरपरिच्छदम् ।
मां भजन्ति भटा भक्त्यातिमुक्तकपिलादयः ॥ ७।१२९ ॥

नवमे दशमे तन्वन् गुणयोर्विग्रहाग्रहम् ।
अपि लोभमहं क्षोभमानेष्येऽनीक्षितक्षितिम् ॥ ७।१३० ॥

उत्साहः स्माह सेनानीरहं मानी मनस्विषु ।
सर्वेषामपि शूराणामहं सिद्धिनिबन्धनम् ॥ ७।१३१ ॥

अनिर्वेदाशुकारित्वप्रायान्तरपरिच्छदम् ।
इन्द्रानुजमहागिर्यादयो भृत्या भजन्ति माम् ॥ ७।१३२ ॥

सर्वेषु सद्गुणस्थानेष्वलमुत्थानशालिना ।
झञ्झयेव जरद्धेनुर्धूतैवारिचमूर्मया ॥ ७।१३३ ॥

प्रोचे बोधस्तलारक्षोऽपरक्षोभकरं वचः ।
सर्वानहं पटूकर्तुं बन्धूनीशे स्वतेजसा ॥ ७।१३४ ॥

सूक्तनिर्णयसच्छास्त्रप्रायान्तरपरिच्छदम् ।
मां सेवन्ते धर्मरुचिशिववज्रार्यरक्षिताः ॥ ७।१३५ ॥

युयुत्सूनां चतुर्थादिगुणस्थानेषु दोष्मताम् ।
सहायोऽहं भविष्यामि वैरिसंघातघातने ॥ ७।१३६ ॥

पुरोभूय बभाषेऽथानुष्ठानेन पुरोधसा ।
योद्धुरुत्थानसन्धानलाघवं करवाण्यहम् ॥ ७।१३७ ॥

स्वाध्यायपाटवोद्योगप्रायान्तरपरिच्छदम् ।
शीतलानन्दकामाद्या मां भजन्तेऽखिला भटाः ॥ ७।१३८ ॥

उत्थितं पञ्चमाद्येषु गुणस्थानेषु वीक्ष्य माम् ।
विद्विषो नालमालस्यप्रायाः स्थातुं पुरः क्षणम् ॥ ७।१३९ ॥

एवं शेषा अपि भटा अशेषाः स्वस्वविक्रमम् ।
क्रमज्ञा ऊचुरौचित्यमत्यजन्तो महाशयाः ॥ ७।१४० ॥

तेषां प्रिया अपि प्रोचुरसंकोचमिदं वचः ।
युध्यमाना वयं वीक्ष्याः स्वामिन् ! साकं स्वभर्तृभिः ॥ ७।१४१ ॥

कुर्व्वाणाः संप्रहारेऽसिप्रहारैः प्रलयं द्विषाम् ।
अबलेति परीवादं स्त्रीणां रोत्स्यामहे वयम् ॥ ७।१४२ ॥

एवं श्रुत्वा स्वतन्त्रस्य वाचमाचरणक्षमाम् ।
विवेकभूपतिर्जातः प्रमोदोत्फुल्ललोचनः ॥ ७।१४३ ॥

तदा चापूर्वपूर्वार्थपर्यालोचनसंज्ञिका ।
ध्वनयन्त्यच्युतपदं रणतूर्यालिरध्वनत् ॥ ७।१४४ ॥

तेनातिव्याकुलीभूतो जाङ्गुल्येव भुजङ्गमः ।
उदतिष्ठत युद्धाय मोहो रोषारुणेक्षणः ॥ ७।१४५ ॥

तारस्वरमथ प्रोचे हंहो शृणुत सैनिकाः ।
विवेकस्तावदायात एव केनाप्यवारितः ॥ ७।१४६ ॥

अश्ववारा अमी तस्य परितः शिबिरं मम
प्रसरन्त्युद्भटा द्वीपं कल्लोला इव वारिधेः ॥ ७।१४७ ॥

अयं तत्तूर्यनिर्घोषः कथं श्रुतिपथं गतः ।
अयःशलाकानिक्षेपसखीं मे कुरुते व्यथाम् ॥ ७।१४८ ॥

तदेवं किं विलम्बध्वं त्वरध्वं रणकर्मणे ।
ग्रसध्वं सैनिकानस्य शालीन् पारापता इव ॥ ७।१४९ ॥

ग्रस्तेषु सैनिकेष्वेषु छिन्नशाख इव द्रुमः ।
स वराको विवेकोऽपि सुखमुच्छेत्स्यते मया ॥ ७।१५० ॥

प्रथमं ब्रूत कः कस्यान्तरङ्गो बहिरङ्गकः ।
परिवारोऽरिवारौघसेतुः कस्य च किं बलम् ॥ ७।१५१ ॥

अथ प्रसर्प्पद्दोर्दर्प्पः कन्दर्प्पस्तमभाषत ।
तातानुज्ञाप्यसे स्फार्तिं यथास्वां वच्मि काञ्चन ॥ ७।१५२ ॥

अमी रिपुभटाः सर्वेऽवश्यं त्रस्यन्ति वीक्ष्य माम् ।
न हि दावानले दीप्ते तृण्यारण्यान्तरानिति ॥ ७।१५३ ॥

आषाढभूतिर्मुनिनन्दिषेणः श्रीआर्द्रको नेमिजिनानुजश्च ।
स कूलवालोऽपि मम प्रभावं जानन्ति किं नाम परैर्नृकीटैः ॥ ७।१५४ ॥

अनात्मज्ञो विवेकोऽयं यो नंष्ट्वा पुनरागतः ।
यदि वासन्नमृत्यूनां विपर्येति मतिर्नृणाम् ॥ ७।१५५ ॥

ताम्बूलपुष्पाम्बुदकालहास्यश्रृङ्गारसम्भोगरहोवनान्ताः ।
स्नानामृताहारमुखाश्च मेऽन्तरङ्गाः सरङ्गाः सुभटाः स्फुरन्ति॥ ७।१५६ ॥

प्रद्योतो गर्दभिल्लश्च कमठो विक्रमो नृपः ।
मधुर्मणिरथाद्याश्च बाह्या मे बहुशोऽनुगाः ॥ ७।१५७ ॥

रागोऽवददहं देव ! जगदन्धयितुं क्षमः ।
अहं कामस्य कामोऽपि ममान्योन्यं बलप्रदौ ॥ ७।१५८ ॥

क्व विकसितसरोजं क्वाक्षिणी दूषिकाढ्ये,
क्व शरदि शशिबिम्बं क्वास्यमत्युग्रगन्धम् ।

क्व घसृणिररुणाश्मा क्वाधरः ष्ठीवनार्द्रः,
क्व रुचिरुचिरहीरा धौतपूताः क्व दन्ताः || ७१५९ ||

क्व शुचिकनककुम्भौ क्व स्तनौ मांसपिण्डौ,
क्व विमलजलवापी स्वेदसद्म क्व नाभिः ।
इति हि मम नियोगादङ्गनाङ्गानि विज्ञै-
रपि विकलवदेषां निर्विशेषाः क्रियन्ते || ७१६० ||

यत्सदाच्छादितं कुत्सास्पदं क्लेदमलाविलम् ।
विद्वांसोऽपि मया तस्मिन्नेवाङ्गे लिप्सवः कृताः || ७१६१ ||

उपार्ज्य क्लेशतः स्वर्णराशीन् दासीकृता मया ।
क्षिपन्ति वनितावाच्यदेशनिर्द्धमने जनाः || ७१६२ ||

वक्रदृग्मन्मनालापहृल्लेखाश्लेषसम्भ्रमाः ।
चाटूक्तिसक्तिप्रयणप्राया मे नित्यसेवकाः || ७१६३ ||

इन्दुषेणबिन्दुषेणौ चिलातीलाततनूरुहौ ।
सामायिकनलक्ष्मापौ ममापि ब्राह्यसेवकाः || ७१६४ ||

द्वेषोऽवादीदथो दम्भैर्दशन् दशनवाससी ।
रिपुसेनाकवलनाभ्यासमासूत्रयन्निव || ७१६५ ||

दृश्यमानोऽप्यहं विश्वभिये कालाग्निसोदरः ।
नेष्टे स्थातुं पुरः कोऽपि ममोद्रेकवतो दृशि || ७१६६ ||

मत्सरामर्षपैशुन्यमर्म्मचालनविग्रहाः ।
आक्रोशनिरमुक्रोशाद्याश्च मेऽभीक्ष्णसेवकाः || ७१६७ ||

कौशिकर्षिः कूलबालः कमठः कौरवाग्रणीः ।
सङ्गमः पालकश्चेति बाह्या नैके ममानुगाः || ७१६८ ||

मन्त्र्यभाणीद्भवावर्त्ते तथाहं त्रिजगत्क्षिपे ।
यथा शक्नोति निर्गन्तुं नानन्तेनाप्यनेहसा || ७१६९ ||

न सा जातिर्न सा योनिर्न तत् स्थानं जगत्त्रये ।
मया विमोहितो जन्तुर्यत्र भ्राम्यति नान्वहम् ॥ ७।१७० ॥

कुदेवः कुगुरुर्धर्मपर्वव्रतविपर्ययाः ।
धर्मद्वेषपराक्षेपावमी नित्यानुगा मम ॥ ७।१७१ ॥

पर्वतो निह्नवाः सप्त कपिलः पालको वसुः ।
सर्वेऽप्यनार्याः सेवन्ते मां सदा बाह्यपार्षदाः ॥ ७।१७२ ॥

लाक्षारससदृशाक्षिपातैः संक्षोभयन् जगत् ।
धूमस्तोमसमानाङ्गयष्टिः कोपस्तदावदन् ॥ ७।१७३ ॥

आविर्भूते मयि स्वं को धीरोऽपि धरितुं क्षमः ।
मयाक्रान्तो भवत्येव विद्वानपि विचेतनः ॥ ७।१७४ ॥

नेत्रोष्ठभ्रमणं हस्तविक्षेपं गात्रधूननम् ।
प्रलापांश्च विदधाति सन्निपातीव मद्वशः ॥ ७।१७५ ॥

बहवो बलवन्तोऽपि मदादेशवशंवदाः ।
नरकेषु निगोदेषु वसन्ति श्वोरगादिषु ॥ ७।१७६ ॥

क्षारचण्डत्वदुर्वाक्यशापसंतापविप्लवाः ।
कलिस्तामसभावश्च ममामी नित्यपाक्षिकाः ॥ ७।१७७ ॥

परिव्राट्कुरुटिमहाकुरुटिब्रह्मसूनवः ।
शिशुपालनभःसेनाद्याश्च मद्भक्तसेवकाः ॥ ७।१७८ ॥

अथावददहङ्कारस्त्रिलोकस्याप्यहं क्षमः ।
सर्वविद्याफलं हर्तुं कर्तुं सद्बुद्ध्ययोग्यताम् ॥ ७।१७९ ॥

गुरून्न मन्यते वृद्धान् हसत्युज्झति धीनिधीन् ।
स्तब्धो निरङ्कुशो भ्राम्यत्युन्मत्त इव मद्वशः ॥ ७।१८० ॥

जेतापि सार्वभौमस्य रुद्धो बाहुबली मया ।
वर्षमूर्ध्वं स्थितो मृष्यन् क्षुत्तृट्शीतातपापदः ॥ ७।१८१ ॥

आहोपुरुषिकास्पर्द्धास्वशक्त्युक्त्यन्यतर्जनाः ।
स्तम्भदुर्विनयौद्धत्याद्याश्च मे नित्यसेवकाः ॥ ७।१८२ ॥

दुर्योधनदशग्रीवचमरप्रतिविष्णवः ।
एवंविधाः परोलक्षा मम सेवकसेवकाः ॥ ७।१८३ ॥

दम्भोऽवददहं देव ! मृदुवाक् क्रूरकर्मकृत् ।
न पुनः प्राणिति प्राणी दृष्टो दुष्टाहिवन्मया ॥ ७।१८४ ॥

अभ्युत्थानासनदानप्रणामाञ्जलियोजनाः ।
जनाश्चाटुवचांसि स्वीकार्यन्ते दासवन्मया ॥ ७।१८५ ॥

छलप्रवेशविश्वासघातद्रोहधनाग्रहाः ।
गूढाचारमृषालापाद्या मे संततसेवकाः ॥ ७।१८६ ॥

महाबलः पीठमहापीठावङ्गारमर्दकः ।
आषाढभूतिरित्याद्या बाह्या मे पक्षपातिनः ॥ ७।१८७ ॥

लोभो बभाण बिभ्राणः पटुतां सकले बले ।
एकोऽपि विवशीकर्तुं प्रभुस्त्रिभुवनीमहम् ॥ ७।१८८ ॥

सर्वे शृण्वन्तु देवाद्या भुजमुत्तभ्य वच्म्यहम् ।
स कश्चिदस्ति किं क्वापि यो नायातो वशे मम ॥ ७।१८९ ॥

शैलारोहं स्थलाम्भोधिक्रमणं भूमिदारणम् ।
बिलप्रवेशं प्रेतौकोवासं मन्त्रादिसाधनम् ॥ ७।१९० ॥

पाशुपाल्यं कृषिं क्षुत्तृट्शीतातपनिषेवणम् ।
अपि दुष्करमादिष्टो मयाङ्गीकुरुते न किम् ॥ ७।१९१ ॥

महारम्भममत्वेच्छामूर्च्छासंक्लेशसंचयाः ।
कार्पण्यसाहसिक्याद्याश्चान्तराः सेवका मम ॥ ७।१९२ ॥

तिलकः कुचिकर्णश्च केशरी नन्दभूभुजः ।
सुभूमलोभनन्द्याद्या बाह्या अपि सहस्रशः ॥ ७।१९३ ॥

प्रमादो वाचमादत्त मम लोकोत्तरं तरः ।
जनमुच्चपदारूढं पातयेऽधः क्षणादहम् ॥ ७।१९४ ॥

श्रुतकेवलिनः शान्तमोहा ये च चतुर्विदः ।
तान्निगोदावटे कालमनन्तं वासयाम्यहम् ॥ ७।१९५ ॥

मदादिष्टे जले खेलत्यसंभाव्य निमज्जनम् ।
प्रेङ्खति द्रुषु भूपातादङ्गभङ्गमचिन्तयन् ॥ ७।१९६ ॥

अक्षैर्दीव्यत्यमन्वानो महत्त्वभ्रंशमन्वहम् ।
विकथाः कुरुते लोकद्वयबाधामनामृशन् ॥ ७।१९७ ॥

वैरं च वर्द्धयत्येतत् क्लेशायैवेत्यसंविदन् ।
जागरं पादपीडां वापश्यन्नृत्यादि पश्यति ॥ ७।१९८ ॥

मद्यं पिबति वैवस्त्र्यं वमनं चाविचारयन् ।
कामे गृध्यति यक्ष्मादिरोगोदयमवेदयन् ॥ ७।१९९ ॥

योधयत्यङ्गिनो नित्यं वित्तव्ययमतर्कयन् ।
पापर्द्धिं यात्यमन्वानश्चातपभ्रमणश्रमम् ॥ ७।२०० ॥

व्यसनालस्यसंवेशविषयोच्चावचोक्तयः ।
अन्येऽप्येवंविधा नैके ममाभ्यन्तरसेवकाः ॥ ७।२०१ ॥

मङ्गुशेलकसोदासकण्डरीकमरीचयः ।
अमी अनुचरा बाह्यपार्षदा मम हर्षदाः ॥ ७।२०२ ॥

एवं सर्वेषु वीरेषु निगदत्सु निजं बलम् ।
मोहः प्रक्षरितसिंह इव सोर्जं जगर्ज सः ॥ ७।२०३ ॥

सदा सत्यामृषासत्यभाषाभेदा अनेकशः ।
रिपुहृत्क्षोभकारीणि नेदुर्वाद्यानि संभ्रमात् ॥ ७।२०४ ॥

अपध्यानशुभध्यानभिदोर्मोहविवेकयोः ।
वीराश्चकर्षुरस्त्राण्यनुपयोगविधानतः ॥ ७।२०५ ॥

रथनेमिर्मया भग्नो नलो नीलः कृतो मया ।
क्षपकर्षिर्मया क्षुण्णः शशो विशसितो मया ॥ ७२०६ ॥

मयाभिभूतः संभूतो बद्धो बाहुबली मया ।
मया महाबलो म्लानः केशरी क्लेशितो मया ॥ ७२०७ ॥

एवं भटैर्भुजास्फोटपूर्वं मोहचमूचरैः ।
इतरेतरमारेभे स्वस्वविक्रमवर्णनम् ॥ ७२०८ ॥

अहं शिवकुमाराख्यमहं तार्क्ष्यध्वजानुजम् ।
चैलातेयमहमहं नयसारधनादिकान् ॥ ७२०९ ॥

अहं नागमहं मेघमाकर्षं भावशात्रवात् ।
तथाहमतिमुक्तर्षिमहं च कपिलं द्विजम् ॥ ७२१० ॥

एवं सैन्ये विवेकस्याप्यवक्तं स्वस्वविक्रमम् ।
व्याचक्षाणाः समुद्भूतं शौर्यं शूरा अदीदृशन् ॥ ७२११ ॥

अथासंविन्निशानाशे प्रकाशे तत्त्वभास्वति ।
सर्वे ते समनह्यन्त वैरिवारविदारणे ॥ ७२१२ ॥

तावद्बोधमहायोधः स्फुरत्क्रोधो विरोधिषु ।
मोहसेनाचरान् कांश्चिद्दर्शंदर्शमकुट्टयत् ॥ ७२१३ ॥

सामायिकादिषट्कर्म्मकर्म्मठेन पुरोधसा ।
जग्रसे भूयसी मोहसेना भेकीव भोगिना ॥ ७२१४ ॥

अथ तैः क्षपकश्रेणिरिति क्षेत्रं रणोचितम् ।
व्यधीयत प्रयत्नेनापास्तक्लेशद्रुमाङ्कुरम् ॥ ७२१५ ॥

प्रसत्तिमर्चतीं शुभ्रामध्यास्योत्तस्थिवानथ ।
आत्तसर्वंसहत्वास्त्रः शमः समरकर्मणे ॥ ७२१६ ॥

अपूर्वकरणं प्राप्य क्रोधस्तेनाशु हक्कितः ।
रे मूढ नश्य कस्य त्वं बलाज्जीवितुमिच्छसि ॥ ७२१७ ॥

सोऽपि रूपैश्चतुर्भिः स्वं तस्याशु समदीदृशत् ।
ते हि विद्यातपःसिद्धिं विनापि बहुरूपिणः ॥ ७।२१८ ॥

प्रागनन्तानुबन्धीति प्रत्याख्यानावृतिः परम् ।
अप्रत्याख्यानकं तस्मात्ततः संज्वलनं परम् ॥ ७।२१९ ॥

क्रोधस्तं प्रत्यभाषिष्ट शान्तात्मन् ! शम ! वक्षि किम् ।
मया विश्वं पराभूतं दीप्तेन दहनात्मना ॥ ७।२२० ॥

शृणु शम ! मम वीर्यं ये महावीर्यभाजस्तपसि रसिकचित्ता योगिनस्त्यक्तसङ्गाः
अपहृतसुकृतस्वास्ते मया नित्यनृत्यन्मरकनरककूपे वासिता वर्षकोटीः

ग्रस्ताः सिंहेन दष्टा विषमविषभृता वन्यदावेन दग्धा,
विद्धा व्याधेन रुद्धा रुधिरभवभुजा केचन स्वर्गमापुः ।
किं कोऽपि क्वापि कोषादधिगतनिधनः स्वर्गतो वा गमी वा,
तन्मामेतैर्वराकैः सदृशमुपदिशन् ह्रेपयत्येव सूरिः ॥ ७।२२२ ॥

त्वां प्रति प्रहरन्तः प्राक् त्रपन्तेऽमी भुजा मम ।
प्राक्त्वं प्रहर येनैते स्वमाविष्कुर्व्वते बलम् ॥ ७।२२३ ॥

इत्युच्चैर्वदतोऽस्यासौ सहसाद्यां तनूमहन् ।
वीरा वैरिविनाशे हि कालक्षेपं न कुर्व्वते ॥ ७।२२४ ॥

एवं मार्दववीरोऽपि भद्रभावहयाश्रितः ।
अधिमानमधाविष्ट प्राञ्जलत्वायुधं दधन् ॥ ७।२२५ ॥

चातूरूप्यजुषस्तस्य सोऽप्याद्यं रूपमच्छिनत् ।
अयं ह्यन्येषु मृदुलोऽरितु क्रकचकर्कशः ॥ ७।२२६ ॥

अथो आर्जवसंतोषभटौ नैराश्यशस्त्रिणौ ।
आरोहतां हरी ऐकरूप्याकिञ्चन्यनामकौ ॥ ७।२२७ ॥

तावभिन्तां कृतचतूरूपयोर्दम्भलोभयोः ।
आद्यां तनूं रणमुखे रिपुच्छेदो हि मङ्गलम् ॥ ७।२२८ ॥

स्याद्वादसिन्धुरारूढो दधदास्तिक्यमायुधम् ।
सम्यग्दृष्टिरथामात्यो मिथ्यादृष्टिमभीयिवान् ॥ ७।२२९ ॥

रे रे तव कति ब्रूमोऽपराधान्विश्वविश्रुतान् ।
मदस्त्रधाराधौतस्य तेषां तेऽस्तु मृजाधुना ॥ ७।२३० ॥

इत्यसौ तर्जितस्तेन वितेने पञ्चरूपताम् ।
साभिग्रहेतराशङ्कानाभोगाभिनिवेशतः ॥ ७।२३१ ॥

जघानैकेन घातेन समं सर्वाणि तानि सः ।
दोष्मान् बिभेति नारिभ्यो दारुभ्य इव पावकः ॥ ७।२३२ ॥

मिश्रो मिथ्यादृशा युञ्जन् क्षायोपशमिकोऽपि च ।
तद्द्रव्यभूरतस्तेन रणे तावपि पातितौ ॥ ७।२३३ ॥

तदा शमादिभिर्वीरैरनिवार्यपराक्रमैः ।
निहते मध्यमे द्वे द्वे रूपे क्रोधादिविद्विषाम् ॥ ७।२३४ ॥

अथ मन्मथमालोक्य सन्नह्यन्तं युयुत्सया ।
वीरो भवविरागस्तमभ्यधाविष्ट निष्ठुरः ॥ ७।२३५ ॥

अनित्यभावभल्लीकं संन्यासद्विरदासनम् ।
तमायातं स्मरः स्मेरः कोपकम्प्रौष्ठमभ्यधात् ॥ ७।२३६ ॥

हंहो समागच्छसि तुच्छबुद्धे ! न वेत्सि किं मां विषमास्त्रवीरम् ।
अमी मम प्राणभिदे परेषां बाणाः सपक्षोरगसख्यभाजः ॥ ७।२३७ ॥

रामा नाम्ना मामका येऽत्र योधाः काङ्क्षाभिख्या मार्गणा य तदीयाः ।
भिन्दन्त्येते हृध्रुवं वज्रपाणेः प्राणेनान्तर्वज्रसन्नाहभाजः ॥ ७।२३८ ॥

यां पलायनकलां जययाने तन्वताधिगमितस्तव तातः ।
प्राग्मया किमु न स प्रददौ तेऽद्यापि तां शिशुतया तदिहागाः ७।२३९

धिग् दैवं यद्भवानद्याभिषेणयति मामपि ।
इत्यहङ्कृतवाचा कं नाकम्पयदनन्यजः ॥ ७।२४० ॥

अथो वीरागवीरस्य त्रासाय सुमसायकः ।
बभूव सहसा पुंस्त्रीक्लीबवेदैस्त्रिरूपभाक् ॥ ७।२४१ ॥

दृष्ट्वापि रूपबाहुल्यं न तस्य त्रस्यति स्म सः ।
दृष्टेऽप्यग्निकणाधिक्ये शङ्कते किं घनाघनः ॥ ७।२४२ ॥

बिभीषयसि मां मूढ ! नानारूपैरिति ब्रुवन् ।
द्वे रूपे सोऽन्तिमे तस्य युगपन्निष्कृपोऽवधीत् ॥ ७।२४३ ॥

तस्य संवेगनिर्वेदौ दधावतुरथानुजौ ।
अन्यत्वचिन्ताकुन्ताढ्यावौदासीन्यद्विपासनौ ॥ ७।२४४ ॥

हास्यरत्यरतित्रासजुगुप्साशोकसंयुतौ ।
रागद्वेषौ रणे ताभ्यां कृतौ सद्यो दिशां बली ॥ ७।२४५ ॥

पुनर्भवविरागोऽसौ जातरागोऽरिकुट्टने ।
मदनस्यादिमं रूपमवधीद्व्याधवन्मृगम् ॥ ७।२४६ ॥

वीक्षमाणा रणक्षेत्रं शमाद्या ददृशुः पुरः ।
क्रोधादीनेकरूपांस्तानेकशाखांस्तरूनिव ॥ ७।२४७ ॥

तदा तदन्त्यं ते रूपं तेषां निन्युः परासुताम् ।
वैरी वह्निरिवाल्पोऽपि न विश्वस्यो महात्मनाम् ॥ ७।२४८ ॥

संतोषो दुर्मरं ज्ञात्वा लोभं भङ्क्त्वा व्यधात्त्रिधा ।
भागद्वयं निहत्यान्त्यं भागं चक्रे च कोटिधा ॥ ७।२४९ ॥

कालभेदेन सर्व्वांस्तान् स भङ्क्त्वा भागमन्तिमम् ।
कृत्वा खण्डानसङ्ख्येयानवधीन्नवधी रणे ॥ ७।२५० ॥

तदोत्साहादिभिर्योधैर्युद्धभूमौ भ्रमंभ्रमम् ।
नीता निष्ठां यथा दृष्टाः प्रमादाद्या अरातयः ॥ ७।२५१ ॥

विवेकानीकवर्त्तिन्यो भामिन्योऽप्यनुवल्लभम् ।
युध्यमाना भटैर्दृष्टा योषिद्वेषा भटा इव ॥ ७।२५२ ॥

स्त्रियो मोहचमूचर्यो मृतेषु स्वस्वभर्तृषु ।
अब्जिन्य इव शुष्केषु सरःस्वनुविपेदिरे ॥ ७२५३ ॥

मोहसत्का विवेकीयैरश्वैरश्वा गजैर्गजाः ।
रथै रथाः पत्तिभिश्च पत्तयो निन्यिरे क्षयम् ॥ ७२५४ ॥

तस्य नित्यानुगः कोशस्तै रयेण व्यलुट्यत ।
परप्राणहृतां द्रव्यमोषणे खलु का कृपा ॥ ७२५५ ॥

चिरं परिचयान्मोहे महास्नेहं वहन्नपि ।
मनोमन्त्री विवेकस्योदयिनोऽदर्शयत्स्वताम् ॥ ७२५६ ॥

अथ स्वशिबिरे वीक्ष्य विप्लवं वैरिनिर्मितम् ।
कोपोऽदीपिष्ट मोहस्य लब्धेन्धन इवानलः ॥ ७२५७ ॥

स दध्यौ दुःखदग्धात्मा ही विवेकस्य सैनिकैः ।
अभक्षि सर्वं दुर्भिक्षायातैरिव बलं मम ॥ ७२५८ ॥

पश्यामि यदि तत्तं प्राग् दैवमेव निहन्म्यहम् ।
इयन्तं मे परीवारं यः संयोज्य व्ययोजयत् ॥ ७२५९ ॥

मृदुः शीतोऽलसो बाल्ये विवेको वीक्षितो मया ।
सैन्यं तत्सेवकैस्तुच्छीक्रियते मेऽद्य धिग्विधिम् ॥ ७२६० ॥

ज्ञात्वेममीदृशं वीरा मम तस्थुरवज्ञया ।
सज्जाः स्युर्यदि तन्नैते जीयेरन्नपि जिष्णुना ॥ ७२६१ ॥

पलाय्य कोऽपि यन्नागान्मद्भृत्यैः सुष्ठु तत्कृतम् ।
जयो वा युधि मृत्युर्वा शूराणां हि द्वयी गतिः ॥ ७२६२ ॥

न जातु युध्यमानोऽहं परसाहाय्यमर्थये ।
तमांसि नाशयत्यंशुरितरस्य बलेन किम् ॥ ७२६३ ॥

रणक्षेत्रमथो नेत्ररक्तताव्यक्तमत्सरः ।
कुर्वन्नानायुधोल्लासैः सहस्रार्जुनविभ्रमम् ॥ ७२६४ ॥

मोहः पट्टद्विपारोहप्ररोहद्विक्रमद्रुमः ।
युद्धश्रद्धानिरुद्धान्यव्यापारः समवातरत् ॥ ७२६५ ॥

रे रे नश्यत पण्डिता मम दृशं मुञ्चध्वमाध्यात्मिका,
योधा यात दिगन्तरं कुरुत रे सज्जौ क्रमौ मान्त्रिकाः ।
एष द्वेषिभयङ्करो भुजमदं स्वाहाभुजां भूभुजां,
भञ्जन्नञ्जनपुञ्जरोचिरुदितो मोहः प्रहर्तुं स्वयम् ॥ ७२६६ ॥

एवं लपन् क्रूरदृष्ट्या भाययन् भुवनत्रयम् ।
रोमहर्षी महर्षीणामपि क्षोभाय सोऽभवत् ॥ ७२६७ ॥

दूरे नरा अभून्नाम नामरेष्वपि कोऽपि यः ।
चकम्पे दत्तझम्पेऽस्मिन् युधि नाश्वत्थपत्रवत् ॥ ७२६८ ॥

अथारूढः समुत्तुङ्गं सत्सङ्गममतङ्गजम् ।
अनर्त्तिर्नर्तयन् शुक्लध्यानभेदायुधावलीम् ॥ ७२६९ ॥

पत्न्या नवोढयोन्निद्रीक्रियमाणः पदे पदे ।
विवेक एकवीरस्तमभ्यगादाजिकौतुकी ॥ ७२७० ॥

मोहस्तं स्माह पीनोऽसि विवेक ! व्रज तद्द्रुतम् ।
पश्चादपि हि गन्तासि तदा गन्तुं न शक्ष्यसि ॥ ७२७१ ॥

बालिशा वालसा वा ये तेषां स्थौल्यं न दुर्घटम् ।
सहन्ते ह्यधिकां पीडां स्थूला वैरिवशङ्गताः ॥ ७२७२ ॥

इष्टश्चेद्वपुषः पोषस्तव तत्किमिहागमः ।
नेहाहारा हि लभ्यन्ते प्रहारा एव केवलम् ॥ ७२७३ ॥

मा स्म माद्यः प्रमादाद्यं यत्त्वमारममारयः ।
यावदव्यङ्गगात्रोऽहं तावत्किं रे त्वया जितम् ॥ ७२७४ ॥

मयि जीवति सर्वेऽमी घटिष्यन्ते भटाः पुनः ।
क्षितिजः साक्षतः कन्दः किं दली न भवेत्पुनः ॥ ७२७५ ॥

अनङ्गो मृदुपुष्पास्त्रोऽबलामात्रपरिच्छदः ।
जगज्जिगाय यः कामस्तस्य जानीहि मां गुरुम् ॥ ७।२७६ ॥

नाघाते परिघो गदा न कदने चक्रं न संचूर्णने,
वज्रं नैव विदारणे न च धनुर्ध्वंसे न खड्गाः क्षते ।
सत्यं वच्मि न कृत्रिमं ध्रुवमिदं मोहस्य युद्धाजिरं,
प्राप्तस्य प्रभवन्ति न प्रमथने व्यालानलाद्या अपि ॥ ७।२७७ ॥

वज्री वज्रबली बलो हलबली चक्री च चक्राद्बली,
क्षत्रः शस्त्रबली द्विपो रदबली सर्पश्च दंष्ट्राबली ।
लिङ्गी शापबली कटूदितबली विप्रो धनी रैबली,
मोहस्याहवभागमागतवतः सर्वो न किञ्चिद्बली ॥ ७।२७८ ॥

नानासंग्रामसंमर्दात् क्वाहं कर्कशविग्रहः ।
अदृष्टसमरायासः क्व त्वं मृदुलपुद्गलः ॥ ७।२७९ ॥

मया पुरा पराभूता भूयांसस्तव सेवकाः ।
तैरुक्तैर्दूयसे यद्वा परं किं मे प्रयोजनम् ॥ ७।२८० ॥

त्वदेकधीरादिमचक्रिसूनुर्बद्धो बलाज्जीवति नायके ते ।
असद्भवेषु भ्रमितो मरीचिवीरो मया सागरकोटिकोटिम् ॥ ७।२८१ ॥

यः कण्डरीकस्त्वदनीकपूरपुरस्सरः सोऽपि ममानुगेन ।
जिह्वेन्द्रियेण प्रसभं निबध्य क्षिप्तः क्षणात्सप्तमनारकान्धौ॥ ७।२८२ ॥

महाबलो बाहुबली तवास्तां भक्तौ नृपौ यौ मम सैनिकाभ्याम् ।
तयोर्वधूवेषमकार्यतैको वर्षं परः स्तम्भित एव तस्थौ ॥ ७।२८३ ॥

ये सत्यकिश्रेणिकभूपमुख्यास्त्वन्मन्त्रिगृह्याः प्रथिताः पृथिव्याम् ।
ते मामकीनाविरतिस्त्रियैव निरुध्य नीता नरके निवासम्॥ ७।२८४ ॥

मम स्पर्द्धां यत्त्वं वहसि हसितास्तेन कृतिनः,
करे धत्से शस्त्रं दधति न घृणां तेन सुभटाः ।

व्रजाद्यापि प्राणांस्त्यजसि किमकाण्डे न हि मया,
कुबुद्धे ! युद्धेच्छुर्निजपरिजनं पश्यसि पुनः ॥ ७।२८५ ॥

इत्युक्तस्तेन साक्षेपं विवेकः प्रत्यवोचत ।
बाढं ब्रवीषि किं मोह ! चिरं दृष्टोऽसि शैशवे ॥ ७।२८६ ॥

ये स्वं प्रशंसन्ति भृशं न भान्ति पृथक्कृतद्रव्यनिधानवत्ते ।
कार्यं न सिध्यत्यमितप्रलापैश्चौर्यं हि चौरैरिव कासवद्भिः॥ ७।२८७ ॥

वर्षासु नभ्राडिव दभ्रगर्जिः करोति कार्यं मृदुवागनूनः ।
रटन्ति तारं किल ते मृदङ्गनिःस्वानवद्ये खलु मध्यशून्याः ॥ ७।२८८ ॥

यदि वासन्नपातस्य जाता यद्वेदना तव ।
कुरुते कुरुतं किं न पक्कं पत्रं पतत्तरोः ॥ ७।२८९ ॥

हिनस्तीन्दुस्तमः शीतः शीतं भिन्तेऽम्बु भूभृतः ।
शीतो नैःस्व्यं मणिर्हन्ति शीतं प्लोषत्यगार्न् हिमम् ॥ ७।२९० ॥

तन्मां शीतलमामृश्य विश्वसीर्मतिमूढ ! मा ।
सर्वेभ्यो विषमो वह्निरुद्भूतः शीतलाद्वनात् ॥ ७।२९१ ॥

हितं वच्मि युधो याहि यदि जीवितकाम्यसि ।
नेहाप्यन्तेऽमृताहाराः प्रहारा एव केवलम् ॥ ७।२९२ ॥

गजा गता धनं ध्वस्तं भटा भग्ना हया हताः ।
धिग् धाष्ट्र्यं ते यदद्यापि वक्षि दुर्बलदोर्बलम् ॥ ७।२९३ ॥

यत्त्वं दिविष्ठान्मनुजानजैषीस्तत्रैकहेतुस्तदचेतनत्वम् ।
सचेतने क्वापि कदाचिदोजायितं त्वया चेत्तदहो प्रजल्प ७।२९४ ॥

सचेतनैः साधुभिरप्रमतैरनेकशस्त्वं युधि धर्षितोऽसि ।
उत्तिष्ठसे जाल्म ! तथापि योद्धुं तव श्ववृत्तेर्धिगपत्रपत्वम् ७।२९५ ॥

बद्धास्त्वया ये मदुपासकाः पुरा त्वत्तो मया ते निखिला विमोचिताः ।
नीता मया ये परिगृह्य तावका मुक्तिं गृहाणैकममीषु चेद्बली

त्वया वशापाशशतैर्निबद्धो गजाश्वयोधैः परिरक्षितोऽभूत् ।
यः सार्वभौमो भरतः क्षणं मां निध्याय सोऽविन्दत बन्धमोक्षम्

ये पाण्डवाः संयुगताण्डवेन घ्नन्तः स्वबन्धून् दयितास्तवासन् ।
विज्ञाततत्त्वास्त्वयि ते विरज्य प्रसाद्य मां वासमनाशमीयुः ७।२९८

स्त्रीब्रह्मतुग्धेनुवधेन येन लेभे तवानीकपुरस्सरत्वम् ।
स नारकाणामतिथीभविष्यन्मोक्षं मयानायि दृढप्रहारी ॥ ७।२९९ ॥

कन्याशिरच्छेदकृता कृतान्तक्रूरेण येनानुसृतस्त्वमेकः ।
स मां शमाब्धेर्मुनितश्चिलातीसूनुः समासाद्य दिवं जगाम॥ ७।३०० ॥

न शस्त्रं वास्त्रं च प्रभवति भवत्येतदुदितं,
न मिथ्यावाक् तथ्या वसति हृदये कस्य न पुनः ।
ब्रवीम्येतद्भ्रातः समदमदवष्टम्भजमलं,
बलं येषां तेषु त्वमसि तृणवन्नेत्यपि मृषा ॥ ७।३०१ ॥

तवानीके ये केचन वचनवर्त्मातिगबला-
स्त्वदग्रे मत्सैन्यैः समिति निखिलास्ते खलु हताः ।
स्वयं तत्त्वं त्वष्टत्वगिव विटपी शुष्यसि रया-
च्चिरं तिष्ठत्यम्भः परिशटितपालौ सरसि न ॥ ७।३०२ ॥

त्वां जर्जरं जरानिघ्नं निघ्नतोऽपि न मे यशः ।
आर्द्रद्रुमं दहन् वह्निर्वीरो नीरसदारु न ॥ ७।३०३ ॥

इति तद्वचसा क्रुद्धो वृद्धोऽपि तरुणायितः ।
निजां शस्त्रावलीं तस्मिन्मोहोऽवर्षत्प्रयत्नतः ॥ ७।३०४ ॥

भेत्तुकामा तमानञ्च कुण्ठतां निशितापि सा ।
दृढसारगुणे लोहशूची शूचीमुखे यथा ॥ ७।३०५ ॥

बाहूबाहवि वीरौ तावयुध्येतामथो मिथः ।
किमद्य भवितेत्यन्तः सारेकं वीक्षितौ सुरैः ॥ ७।३०६ ॥

गौरश्यामतनू तुङ्गौ समेतौ तौ विरेजतुः ।
भुवं कम्पयितुं प्राप्तौ हिमाञ्जनगिरी इव ॥ ७।३०७ ॥

मल्लो मल्लमिव म्लानिमापन्नं पापयोगतः ।
आक्रम्य चरणेनोच्चैर्विवेकस्तमपातयत् ॥ ७।३०८ ॥

सदा कृतजगद्द्रोह ! दुःखसंदोहदायक ! ।
विषमोऽहं विनष्टोऽसि रे रे मोह ! मया धृतः ॥ ७।३०९ ॥

यः कोऽपि त्रायते कम्पदेह ! संप्रति तं स्मर ।
न याज्ञिक इव छागं त्वां जीवन्तमहं सहे ॥ ७।३१० ॥

सुतो वा सोदरो वास्तु सगोत्रोऽस्तु सखास्तु वा ।
दुष्कर्म्मा वध्य एवेति रीतिः सर्वमहीभुजाम् ॥ ७।३११ ॥

जननीयं जनकोऽयमेताः सन्निहिताः सुताः ।
सर्वाः पश्यन्ति फुल्लाक्ष्यस्त्वां मृत्योः कोऽपि नावति ॥ ७।३१२ ॥

अहं तव वधे साक्षिमात्रमेवास्मि केवलम् ।
विपक्त्रिमाणि पापानि मृत्युदायीनि ते पुनः ॥ ७।३१३ ॥

इत्युदित्वा निरुन्धानस्तज्जा मुष्ट्यादिताडनाः ।
विवेकः पर्शुनेव द्रुं ब्रह्मास्त्रेण जघान तम् ॥ ७।३१४ ॥

भृत्या मोहस्य ये ज्ञानदर्शनावरणादयः ।
ते तद्दुःखात्तदा क्षीणास्तं मोचयितुमक्षमाः ॥ ७।३१५ ॥

माया निध्याय पुत्रस्येष्टस्य तां तादृशीं दशाम् ।
व्रततिर्लग्नवल्मीवोर्ध्वशोषमशुषत्क्षणात् ॥ ७।३१६ ॥

जडता मृतमालोक्य प्राणेभ्योऽपि प्रियं प्रियम् ।
तरौ छिन्ने तदाधारा वल्लीव न्यषतद्भुवि ॥ ७।३१७ ॥

सर्वा अपि सुता मोहं पश्यन्त्यः सहसा मृतम् ।
तात तातेति जल्पन्त्यः शीर्णा दीपदशा इव ॥ ७।३१८ ॥

मोहे महारिपौ मृत्युमापिते त्रिदशेश्वराः ।
विवेकस्य शिरस्युच्चैः पुष्पवृष्टिं वितेनिरे ॥ ७।३१९ ॥

जय जय निरुपममहिममनोहर ! हरगिरिशिखर ! श्वेतयशोभर ! ।
भरतैरवतविदेहमहाजनजनक ! विचक्षण ! विहितसभाजन ! ७।३२०

जननीसमवत्सल ! जन्तुगणे गणनातिगमोहतमस्तरणे ! ।
रणधीर ! विवेक ! विपत्तिघनं घनवल्लभ ! पालय विश्वजनम् ७।३२१

जननावधिमधुरिमगरिमाधारं धाराधरसमदानबलम्,
दुर्द्धरकरदिनकरनिकरालोकं लोकंपृणवरवचनकलम् ।
कलिकालकरालव्यालविशृङ्खलखलकवलितसज्जनशरणम्,
भो भव्या भूपं भजत विवेकं भवभवपरिभवभयहरणम्॥ ७।३२२ ॥

यमुनाजलकज्जलकोकिलकायच्छायमपाकृतसुगतिपथम्,
नवतत्त्वालोकनतेजस्तनुते तावन्मोहतमो वितथम् ।
यावज्जिनशासनमुदयमहीधरमधिगम्योदयमाप्य नवम्,
न विरोचन इव सुविचारु विचारज्योतिरुदस्यसि वश्यशिवम् ७।३२३

शेषःकिं स हि किल जिह्मगतिःकिं रविरयमपि निशि नष्टमहाः,
किमु हिमरुचिरेष कलङ्कितकायः किं मणिरयमपधीरहहा ।
किमु सुरगुरुरेष द्वेषी कवये किमु नृपतिः स हि नरकमना,
इत्यूहापोहं त्वयि निध्याते विदधति विविधं विबुधजनाः॥ ७।३२४ ॥

खरकर्म्मनिलीना हीनाचारा विगतविचारा दलितदयाः,
ये परपरिवादपराभवपीडनपेषपुरस्सरपापमयाः ।
बलवन्तं सन्तं शोभावन्तं वीक्ष्य भवन्तं मुक्तिफला
वधिविविधविभूतिसभाजनभाजनभावं भेजुरमी सकलाः ७।३२५ ॥

रतिपतिरिह महिमाहानिमवापन्मानोऽनश्यदपास्य मदम्,
लेभे च स लोभः क्षोभं दम्भः समजनि कोपः कम्पपदम् ।

अज्ञानं मानम्लानिमविन्दत निन्दामूहे मोहबलं त्वयि,
युध्यति वीरविवेक ! स को यः प्रथयति युधि निजबाहुबलम् ७।३२६

सूरिराज निर्व्याज विनयनतचरणसरोरुह सकलसमीहितविभ-
वदाननिर्जरभूमीरुह अवितथदृक्पथमथन मारसंतमसदिवाकर
सुरकिंनरनरनिकरगीतगुणमणिरत्नाकर करुणानिवेशपेशलहृदय
जिनपतिसेवालब्धवर वीरावतंस जगदनिशमव नृप विवेक विघ्नौघहर

एवं छन्दोभिरुद्गीतं बन्दिना सूनुविक्रमम् ।
शृण्वती जननी जातरोमाञ्चेत्यवदत्तदा ॥ ७।३२८ ॥

चिरं जीव मम प्रीतिवल्लिविश्राममण्डप ! ।
विवेक ! वत्स ! वात्सल्यवार्द्धे ! विख्यातविक्रम ! ॥ ७।३२९ ॥

बलि बलवतोर्बाह्वोर्न्युञ्छनं नेत्रयोस्तव ।
पौनःपुन्येन कुर्वेऽहं विक्रमस्यावतारणम् ॥ ७।३३० ॥

भव्या इव गता मेऽद्य सिद्धिं वत्स ! मनोरथाः ।
मन्ये मुक्तिरिवेदानीं स्वं विश्वोपरिवर्त्तिनम् ॥ ७।३३१ ॥

अधृष्यास्म्यहमेकेन त्वया सिंहीव सूनुना ।
बह्वपत्याभिरप्यन्यरामाभिः सरमायितम् ॥ ७।३३२ ॥

त्वयि दत्ता रहःशिक्षा अशेषाः फेलुरद्य मे ।
जय जीव चिरं राज्यं कुरुष्वेत्याशिषोऽपि च ॥ ७।३३३ ॥

नीतं कुलमिदं जात ! त्वयैकेन सनाथताम् ।
दीप्तेन नायकेनेव ध्वजिनीसार्थवाहवत् ॥ ७।३३४ ॥

इति मातुर्गिरः शृण्वन् पश्यन्नायो धनावनीम् ।
मोहवर्ग्यमवैक्षिष्ट जीवन्तं तातमेव सः ॥ ७।३३५ ॥

दृष्ट्वा तमप्यतिक्षामं सोऽवादीदुल्लसत्कृपः ।
मया मोहे हते तात त्वयैवं किमु खिद्यते ॥ ७।३३६ ॥

एष निःशेषविद्वेषिमुख्यः क्लेशकरोंऽगिनाम् ।
एष त्रिभुवनस्यापि पापाभ्यासकलागुरुः ॥ ७।३३७ ॥

जन्तुं हन्ति विमन्तुमन्तक इवालीकं वचो जल्पति,
स्तैन्ये रज्यति संस्तुते परवधूः पैशून्यमालम्बते ।
मित्रे द्रुह्यति नाथमुज्झति पलं चाश्नाति मद्यं पिब-
त्यन्यायं कुरुते खलेषु रमते मोहस्य वश्यो जनः ॥ ७।३३८ ॥

सर्वो जन्तुरनन्तशोऽपि नरके नानाविधावेदनाः,
क्षुत्तृड्वीवधबन्धमारविपदां पूरं पशुत्वे पुनः ।
वैरव्याधिवियोगबन्धनधनभ्रंसान् भवे मानवे,
देवत्वेऽभिभवाभियोगमरणान्याप्नोति मोहोदये ॥ ७।३३९ ॥

भवतादीदृशास्यास्य मृत्युः प्रत्युत ते मुदे ।
कस्य कालज्वरो देहाद्दूरीभूतो न रोचते ॥ ७।३४० ॥

हन्यमाने मयामुष्मिन् मोदन्ते स्मामिरा नराः ।
न संतुष्यति को धीमांश्छिद्यमाने विषद्रुमे ॥ ७।३४१ ॥

धिगयं दुर्नयः पुत्रप्रेम्णा संवर्धितस्त्वया ।
वयं चौरा इवापास्ता दूरे गौरगुणा अपि ॥ ७।३४२ ॥

निवृत्तिस्तव पत्नीयं विवेकोऽहं सुतस्तव ।
इमे शमाद्यास्ते पौत्रा अथैषु स्नेहमुद्वह ॥ ७।३४३ ॥

तादवस्थ्ये कुटुम्बस्य तात ! का न्यूनता तव ।
गताऽहो त्रापुषी भूषा हैमी सा तु समागता ॥ ७।३४४ ॥

चापलं सर्वथा मुञ्च देवमञ्च निरञ्जनम् ।
तात ! प्रीतिविषादाभ्यां बाधां मा धा मनागपि ॥ ७।३४५ ॥

तेनेति बोधितोऽपि स्वामायतिं मन्त्र्यचिन्तयत् ।
मतिरुल्लसति प्रायो मन्त्रिणां दीर्घदृश्वरी ॥ ७।३४६ ॥

विवेको वक्ति तत्सत्यमायतौ सुन्दरं परम् ।
मोहस्नेहः कथं संक्रामत्यस्मिन् सहसा नवे ॥ ७।३४७ ॥

यदसौ शैशवे मात्रा समं निर्वासितो मया ।
तदस्य खाट्करोत्येव हृदये गूढशल्यवत् ॥ ७।३४८ ॥

अस्य माताऽनिशं भोगदुर्विधा विधये मया ।
सापि मन्ये ममागांसि सदामुं स्मारयिष्यति ॥ ७।३४९ ॥

ये द्वे अस्य प्रिये ते कां मयि भक्तिं विधास्यतः ।
वात्यां तृण्या इव श्वश्रूमेव वध्वोऽनुयन्ति यत् ॥ ७।३५० ॥

पुत्राः पौत्रा विरागाद्या येऽस्य सन्ति सहस्रशः ।
तेऽपि मां पितृवैरीति मंस्यन्ते वेश्मसर्पवत् ॥ ७।३५१ ॥

पश्याम्यस्य परीवारे तं न कञ्चन मानुषम् ।
यः कटाक्षितकुन्तानां न मां लक्षीकरिष्यति ॥ ७।३५२ ॥

विराध्यामुं पुनर्वासविधिर्यदमुना समम् ।
सिंहमाकुश्य तत्तस्य गुहायां स्थितिकल्पना ॥ ७।३५३ ॥

किं चात्माभ्यधिकस्यास्य सहसा दुर्दशामिमाम् ।
साक्षाद्वीक्ष्य मनोऽद्यापि हहा जीवितुमिच्छति ॥ ७।३५४ ॥

गताः पुत्रा गताः पौत्रा गताः पुत्र्यो गताः स्नुषाः ।
समर्थे प्रस्थिते सार्थे स्थास्याम्येष कियच्चिरम् ॥ ७।३५५ ॥

इत्यन्तर्गूढमालोच्य स विवेकमभाषत ।
श्रृणु वत्स ! तवास्त्येवं वात्सल्यं मय्यकृत्रिमम् ॥ ७।३५६ ॥

परं परिचितो मोहो दुरावारोऽपि मे चिरम् ।
पुरो विपद्यमानेऽस्मिन् जात ! युक्तं न जीवितुम् ॥ ७।३५७ ॥

जीवति त्वयि जीवामि मृतं तु त्वामनुम्रिये ।
इत्यस्मै वाग्मयाऽदायि पुरा सत्यापयामि ताम् ॥ ७।३५८ ॥

पाथेयवद्भवद्दत्तममुञ्चन्ननुशासनम् ।
अबाधः साधयाम्यग्निप्रवेशं यदि मन्यसे ॥ ७।३५९ ॥

भविता नूनमस्तेऽस्मिन् लाभो मे न पुनः स्थिते ।
इति निश्चित्य तस्योक्तं विवेको बह्वमन्यत ॥ ७।३६० ॥

द्वादशेऽथ गुणस्थाने भावतीर्थमये शुचौ ।
कुण्डवत्क्षायिकं भावं विवेकः पर्यमीमृजत् ॥ ७।३६१ ॥

ततोऽन्तरायप्रचलानिद्राप्रभृतिकर्मभिः ।
सुहूतैर्दारुभिः शुक्लध्यानानलमजिज्वलत् ॥ ७।३६२ ॥

विवेके सपरीवारे जाते साक्षिणि स क्षणात् ।
मनोमन्त्री प्रविश्यात्र निर्वीर्यो भस्मतां ययौ ॥ ७।३६३ ॥

अस्मिन्नवसरे लब्धावकाशा सा महासती ।
चेतना मुख्यरूपेण पतिं हंसमुपासरत् ॥ ७।३६४ ॥

ऊचे च विनयप्रह्वा जिह्वाग्रलुठितामृता ।
अदृष्टचरमेतन्मे रूपं नाथ ! निभालय ॥ ७।३६५ ॥

न मनोमोहयोः पार्श्वस्थयो रूपमिदं मया ।
आविष्क्रियेत सद्रत्नमिव स्तेनकिरातयोः ॥ ७।३६६ ॥

स्वं बद्धं विद्धि मा धीमंस्तव बन्धा विलिल्यिरे ।
यैर्बद्धोऽसि दुरात्मानस्तेऽपि सर्वे क्षयं गताः ॥ ७।३६७ ॥

निरभ्र इव मार्तण्डो राहुमुक्त इवोडुपः ।
उत्सृष्टावरणो दीप इव हेमेव निर्मलम् ॥ ७।३६८ ॥

माणिक्यमिव निष्पङ्कं निर्द्धूम इव पावकः ।
अपास्तरिपुसंसर्गस्त्वं भृशं दीप्यसेऽधुना ॥ ७।३६९ ॥

सूक्ष्मं मनोऽबला माया दुर्बलं त्वां बबन्धतुः ।
तवाद्य बलमुल्लासमासदद्विश्वमोचकम् ॥ ७।३७० ॥

येऽवैक्ष्यन्त त्वया क्षीणाः कोशाः प्राग्विवशात्मना ।
तेऽद्य पूर्णा निरीक्ष्यन्ते वीर्याह्लादादयः पुनः ॥ ७।३७१ ॥

पुरा त्वं वाहितो म्लेच्छैर्भारं दारूदकादिकम् ।
सांप्रतं सेव्यसे सर्वैरमरैः किंकरैरिव ॥ ७।३७२ ॥

आवयोः कः पृथग्भावः शश्वदेकस्वभावयोः ।
केऽपि स्थूलदशो भेदमेव नेच्छन्ति नौ जनाः ॥ ७।३७३ ॥

मायावशंवदत्वेन तव कालुष्यशङ्किनी ।
अपि सत्यसतीवाऽहं सन्निधावेव तस्थुषी ॥ ७।३७४ ॥

वीतमाय ममागस्त्वं तत्क्षमस्व क्षमानिधे ! ।
अतः परं भजिष्यामि त्वामेकाग्रमनाः सना ॥ ७।३७५ ॥

इदं हेममयं रत्नखचितं रचितं सुरैः ।
कमलं समलंकृत्य नाथ ! न्यायं प्रकाशय ॥ ७।३७६ ॥

इति पत्न्या गिरा त्यक्तबन्धनः प्राप्तपाटवः ।
भूपतिः स्वं स्वरूपस्थं पश्यन्नानन्दभूरभूत् ॥ ७।३७७ ॥

अविनाभावि संपर्के जाते चेतनया समम् ।
देवास्तस्य शिरस्युच्चैः पुष्पवर्षं वितेनिरे ॥ ७।३७८ ॥

कृत्वा जयजयारावं चेलोत्क्षेपं विधाय च ।
अवीवदन्नमी व्योम्नि दुन्दुभीस्तौर्यिका इव ॥ ७।३७९ ॥

वज्रकन्दे मणीनाले सौवर्णछदशालिनि ।
विमले कमले दिव्ये हंसवन्निषसाद सः ॥ ७।३८० ॥

सेवाहेवाकिनो देवा विष्वक् तं परिवव्रिरे ।
तदास्येन्दुप्रभालोभचकोरायितलोचनाः ॥ ७।३८१ ॥

उपासांचक्रिरे तं च मानवा अपि धीधनाः ।
एतस्मात्किमु गङ्गापि पैतृकीति प्रजल्पिनः ॥ ७।३८२ ॥

चिरात्संघटितां पत्नीमवियोज्य सदस्यपि ।
तेषां नैयायिकं मार्गं हितेच्छुर्निर्दिदेश सः ॥ ७।३८३ ॥

शरीरिणोऽत्र बध्यन्ते मुच्यन्ते कर्मवैरिभिः ।
यथा यथातथं सर्वं तत्प्रादुःकुरुते स्म सः ॥ ७।३८४ ॥

यत्र यत्र स शुश्राव क्लेशं कर्मारिनिर्मितम् ।
कामचारस्तत्र तत्र व्यचरत्तज्जिघांसया ॥ ७।३८५ ॥

विवेक एकतानोऽपि पश्यन्नैवोपलब्धवान् ।
वस्तुतः कामपि व्यक्तिं तस्य स्वस्याधिपस्य च ॥ ७।३८६ ॥

ग्रामाध्यक्षो मया प्रोचे यः कथानायकस्तव ।
हंसोऽहं सोऽस्मि संप्रत्यारूढधर्मरुचिध्वनिः ॥ ७।३८७ ॥

मायया मोहितो बद्धो मनसा दुर्धियेरितः ।
उपेक्षितश्च सद्बुद्ध्या विवेकेन विनाकृतः ॥ ७।३८८ ॥

नानारूपाणि कुर्वाणो नानानामधरश्चिरम् ।
नानाभवानहं भ्राम्यन्नानादुःखानि सोढवान् ॥ ७।३८९ ॥

दूरीभूतमहासंपन्निरस्तज्ञानडम्बरः ।
प्राभवात्पतितः स्थाने स्थाने प्रापं पराभवान् ॥ ७।३९० ॥

काले बलं समासाद्य परमेष्ठिप्रसादतः ।
युधि जघ्ने विवेकेन स्वयं मोहमहीपतिः ॥ ७।३९१ ॥

मोहे मृते विलीनासु मायादिवनितासु च ।
प्रबोध्य मां प्रभूचक्रे मुख्यरूपेण चेतना ॥ ७।३९२ ॥

चेतनचरितं स्मारं स्मारं विस्मयते मनः ।
कृतानेकव्यलीकेऽपि प्रेम या नामुचन्मयि ॥ ७।३९३ ॥

भास्वद्भूषणभक्तभोगभवनाभोगादिभर्माशया,
भक्ता भर्तरि या भवन्ति भुवि ता वामा भुजिष्योपमाः ।

या दुःस्थे मयि नामुचद्धितधियं मुक्तच्छलां वत्सलां,
तां सूर्योपलनिर्मलां प्रणयिनीमेकां स्तुमश्चेतनाम् ॥ ७।३९४ ॥

ग्रामाध्यक्षस्ततो वक्ष्यत्याप्तमुख्य ! निशम्यताम् ।
यदिदं स्वं त्वयाऽवादि वृत्तं तत्सर्वसन्निभम् ॥ ७।३९५ ॥

सर्वेऽप्यनुभवन्त्येतद्वृत्तं न त्वभिजानते ।
व्यामोहमदिरापानलुप्तसंवित्तयो जनाः ॥ ७।३९६ ॥

यद्वाऽलं चिन्तया तेषां येषां त्वमसि दूरतः ।
तमसा किमु बाध्येऽहं त्वयि सन्निहिते रवौ ॥ ७।३९७ ॥

तन्मां विविधजन्मान्धकूपतः स्वमिवोद्धर ।
आत्मवत्सर्वभूतानि पश्येदिति सतां स्थितिः ॥ ७।३९८ ॥

ततः संततसंवेगशालिनं निश्चलाग्रहम् ।
स मुनिग्रामणीर्ग्रामाधिपं तं दीक्षयिष्यति ॥ ७।३९९ ॥

गुरुणा सह सोऽमायी स्वाध्यायध्वनितं विना ।
मौनी मौनीश्वरीं मुद्रामादृत्य विहरिष्यति ॥ ७।४०० ॥

बद्धं कर्म तपोनिघ्नन् संयमेनाभजन्नवम् ।
काले स केवली कर्ममुक्तो मुक्तिं गमिष्यति ॥ ७।४०१ ॥

चेतनाऽवसरं ज्ञात्वा गते काले कियत्यपि ।
अनापदं पदं नेतुं नाथं विज्ञापयिष्यति ॥ ७।४०२ ॥

अनन्तदर्शनज्ञान ! सर्वलोकसुखाकर ! ।
स्थानं यदधिशेषे त्वं तत्स्वरूपं विचिन्तय ॥ ७।४०३ ॥

नवद्वारगलच्चेलरसजम्बालपिच्छिलम् ।
विततान्त्रशिरास्नायुस्मारितान्त्यजमन्दिरम् ॥ ७।४०४ ॥

उच्चावचकचस्तोमरोमबीभत्सदर्शनम् ।
द्रष्टुमप्यक्षमं मांसवशामेदोऽस्थिलोहितैः ॥ ७।४०५ ॥

विण्मूत्रमलदुर्गन्धं लालानिष्ठ्यूतनिन्दितम् ।
कृतनाशि सतां वासोचितं नेदं पुरं तव ॥ ७१४०६ ॥

मणिमुक्ताफलस्वर्णरौप्याद्यं नात्र किञ्चन ।
किन्तून्मीलति रक्ताद्यमेव यत्रेदमीक्ष्यते ॥ ७१४०७ ॥

अन्नं पानं घृतं घोलः सिता दुग्धं फलं दलम् ।
विनश्यत्यत्र संक्रान्तं सर्वं बीजमिवोखरे ॥ ७१४०८ ॥

शय्यादुकूलताम्बूलपुष्पगन्धविलेपनम् ।
सक्तमेतेन मेतेन कुल्यवद्दूष्यते खलु ॥ ७१४०९ ॥

निवेश्यतेऽस्य कोष्ठेषु नीरमन्नमनारतम् ।
स्वास्थ्यं तदपि नायाति रङ्काधिकविचेष्टितम् ॥ ७१४१० ॥

विधीयन्तेऽस्य संस्कारा बुद्धैर्नित्यं नवा नवाः ।
तथाप्यशुचितां वर्चोवेश्मवद्विजहाति न ॥ ७१४११ ॥

शिलोपलगिरिग्रावतटीकर्करधूलिभिः ।
अस्य संभाव्यते भूमिभेदैर्भङ्गभयं बुधैः ॥ ७१४१२ ॥

सरः स्रोतः सरित्कूपह्रदाम्बुध्यतिवृष्टिभिः ।
भूयोभिरम्भसां भेदैर्भवत्येवास्य विप्लवः ॥ ७१४१३ ॥

वह्निविद्युद्दवालातकुकूलाद्या दहन्त्यदः ।
महावातोर्ध्ववाताद्या वायवोऽपि हरन्ति वा ॥ ७१४१४ ॥

विषं विषफलं शङ्कुयन्त्रमुद्गरयष्टयः ।
रज्जुपाशातिवल्भाश्चेत्येतद्घ्नन्ति वनस्पतिः ॥ ७१४१५ ॥

द्वीन्द्रियैः शुक्तिशम्बूकजलौकःकृमिकीकसैः ।
त्र्यक्षैः पीलकमंत्कोटघृतेलीकीटमत्कुणैः ॥ ७१४१६ ॥

पतङ्गभ्रमरीदंशवृश्चिकैश्चतुरिन्द्रियैः ।
अस्य निःस्वामिकस्येव विपदः स्युः पदे पदे ॥ ७१४१७ ॥

गजाश्वमहिषव्याघ्रवृकशूकरवानरैः ।
खरषण्डश्वभल्लूकैरिदं देव ! कदर्थ्यते ॥ ७।४१८ ॥

वारिगैर्मकरग्राहनक्रपाठीनकर्कटैः ।
भिलिङ्गुश्येनगृद्धाद्यैः खचरैरपि खेद्यते ॥ ७।४१९ ॥

नकुलोन्दिरमार्जारगोधेरकृकलासकैः ।
उरगैश्च कृतं विघ्नं शङ्कन्तेऽस्य विपश्चितः ॥ ७।४२० ॥

ग्रहणीग्रन्थिगम्भीरगुल्मकुष्ठज्वरादयः ।
त्वयि सत्यपि मुष्णन्ति द्रागेतत् व्याधितस्कराः ॥ ७।४२१ ॥

चक्रवज्रधनुःखड्गक्षुरिकाकुन्ततोमराः ।
नाशायास्यैव दैवेन केन शस्त्रगणाः कृताः ॥ ७।४२२ ॥

भूतप्रेतपिशाचाद्यैर्देवैरेतज्जिघांस्यते ।
म्लेच्छमुद्गलमातङ्गप्रमुखैर्मानुषैरपि ॥ ७।४२३ ॥

मनसा वचसा रूक्षेणामरस्य मुनेरपि ।
दुष्टदृष्ट्यापि केषांचिदेतदूर्ध्वं विशुष्यति ॥ ७।४२४ ॥

अत्यन्तस्नेहतोऽत्यन्तरागादत्यन्तकोपतः ।
अत्यन्तभयतोऽकस्माद्भग्नमेतन्निरीक्ष्यते ॥ ७।४२५ ॥

अत्याहारादनाहारादतिपानादपानतः ।
अत्यायासादनायासादिदं देव ! विशीर्यते ॥ ७।४२६ ॥

ईदृशे मलपङ्काढ्ये निःसारे नाशधर्मिणि ।
सन्तः शोचन्ति वासं ते रोरमूर्ध्नि मणेरिव ॥ ७।४२७ ॥

शुद्ध ! शुद्धिविनाभूते निर्मलात्मन्मलीमसे ।
चिद्रूप ! जडिमागारे निर्विनाश ! विनाशिनि ॥ ७।४२८ ॥

अनन्तवीर्य ! निर्वीर्ये भूतेभ्यो भिन्न ! भौतिके ।
दाक्षिण्यपाशबद्धोऽत्र कियत्त्वमवतिष्ठसे ॥ ७।४२९ ॥

पुरा पुराणि भूयांस्यपीदृशानि त्वमग्रहीः ।
आसन्नशिववासैतन्नेतः किं तव दुस्त्यजम् ॥ ७४३० ॥

येन प्राहरिकेणेव रुंद्धोऽभूस्त्वमियच्चिरम् ।
सांप्रतं तद्गतप्रायमायुःकर्म विचिन्त्यताम् ॥ ७४३१ ॥

पत्न्येति प्रेरितः पृथ्वीपतिः परिहरन् पुरम् ।
प्रेप्सुः परं पदं प्रायरथमारोक्ष्यति क्षणात् ॥ ७४३२ ॥

तल्लाभविघ्नभूतं स वतंसः सर्वधीमताम् ।
चूर्णीकृत्याभितः क्षेप्ता मनः प्राग् भस्मपुञ्जितम् ॥ ७४३३ ॥

अतः कलकलः कोऽपि मा भूत्प्रचलतो मम ।
इति रोत्स्यत्यनुत्सेकः स वाग्योगं शनैः शनैः ॥ ७४३४ ॥

शिरासृक्कम्पने यातो मा भूदशकुनं मम ।
इत्यसौ कायिकीश्चेष्टाः समस्ता वारयिष्यति ॥ ७४३५ ॥

पञ्चह्रस्वाक्षरोच्चारमानं कालं स भोक्ष्यति ।
उत्पित्सुरिव लोकाग्रं प्रतिस्थैर्यं गिरीशितुः ॥ ७४३६ ॥

कालस्यास्यान्त्यसमयद्वयेन प्राग् हतोध्धृतान् ।
स हन्ता प्रकृतीः पञ्चाशीतिं मोहचमूचरान् ॥ ७४३७ ॥

आस्योदरादिरन्ध्राणां भावेनेतस्ततः स्थितान् ।
पिण्डीकर्त्ता प्रदेशान् स्वान् स प्रस्थानस्थितिं विदन् ॥ ७४३८ ॥

यन्त्रमुक्तेषुवन्नीरनिर्लेपीभूततुम्बवत् ।
चेतनासहितः सोऽथ धाविष्यत्यूर्ध्वया दिशा ॥ ७४३९ ॥

अचिन्त्यशक्तिः समयेनैकेन ऋजुनाध्वना ।
सहसा स महावेगः परमं पदमाप्स्यति ॥ ७४४० ॥

न गर्भगुप्तिसंवासो न च प्रसववेदना ।
न शैशवं रजःक्रीडा नाप्यध्यापकताडनाः ॥ ७४४१ ॥

कषायविषयोद्भूता न यौवनविडम्बनाः ।
मानम्लानिधनध्वंसकुटुम्बकलिमिश्रिताः ॥ ७।४४२ ॥

न वियोगानलज्वालाजनितः शोकसंज्वरः ।
न व्यापारपरिभ्रंशभवः परपराभवः ॥ ७।४४३ ॥

धनाशायो नयो नैव राजसेवादयः क्षमाः ।
व्यवसाया न सापाया न जलस्थलसंक्रमाः ॥ ७।४४४ ॥

न बाललालाविण्मुत्रसंसर्गे सौख्यकल्पना ।
न योषिच्चरणाघातो नापि तच्चाटुकारिता ॥ ७।४४५ ॥

न व्याधिविहिता बाधा न भूषादिभवं भयम् ।
न दंशमशकप्रायक्षुद्रजन्तुकदर्थनाः ॥ ७।४४६ ॥

न शीतहेतुराकम्पः संतापो नातपोद्भवः ।
नातिवृष्टेरवृष्टेश्च विप्लवः पवनादपि ॥ ७।४४७ ॥

अभिभूतिर्न भूतेभ्यो न भीः स्वपरचक्रभूः ।
न क्षुद्रयन्त्रमन्त्रादिकृता कायनियन्त्रणा ॥ ७।४४८ ॥

न च वैयसनः क्लेशो न प्रवेशोऽपरद्रुहाम् ।
न शाकिन्यादिरावेशोऽभिनिवेशो न वैरिणाम् ॥ ७।४४९ ॥

न धिक्क्रियाऽधमर्णेभ्यो नोच्छृङ्खलखलोक्तयः ।
न दारिद्र्यं न दुर्भिक्षं न चिन्ता वृत्तिहेतवे ॥ ७।४५० ॥

न लास्यहास्यगीतेन्द्रजालादिकुतुकार्थना ।
न ज्ञानविस्मृतिभ्रान्तिमतिव्यामोहसंशयाः ॥ ७।४५१ ॥

न जराराक्षसी रूपसर्वस्वग्रासलालसा ।
न व्रातीनाशकीनाशकृतवीनाशशङ्कनम् ॥ ७।४५२ ॥

न गर्वग्रहिलश्रीमदुष्मतप्तास्यवीक्षणम् ।
न तद्दास्यस्पृहा नापि तेषामाक्रोशमर्षणम् ॥ ७।४५३ ॥

नाशनाया पिपासा वा नार्त्तयो न बिभीषिकाः ।
यत्र तत्र शिवस्थाने स ध्रुवं वासमेष्यति ॥ ७।४५४ ॥

अनन्तदर्शनज्ञानवीर्यानन्दसुधाशितः ।
स सुखायिष्यतेऽनन्तं कालं तत्राकुतोभयः ॥ ७।४५५ ॥

नित्यमम्लानसद्ज्ञानदर्शनज्योतिराश्रयः ।
स राजेति निजं नाम नेता सार्थकतां तदा ॥ ७।४५६ ॥

पृथिव्या आगतत्वेन पार्थिवः स प्रकीर्तितः ।
प्रजापालोऽपि निर्मुक्तनिखिलारम्भसंभवः ॥ ७।४५७ ॥

मौलिना ध्रियते मौलिरिव त्रिभुवनेन सः ।
अतो मतो मतिमतामेष त्रिभुवनप्रभुः ॥ ७।४५८ ॥

सर्वोपप्लवमुक्तत्वादेष एव सदाशिवः ।
विष्णुश्च येन वेवेष्टि लोकालोकं चिदात्मना ॥ ७।४५९ ॥

स्वयंभूतो न केनापि जनितो जन्मवर्जितः ।
भगवानयमेवेति स्वयंभूरज इत्यपि ॥ ७।४६० ॥

कर्म्मबद्धात्मसूत्कर्षात्परमात्मा स उच्यते ।
परमज्ञानयोगाच्च परमब्रह्मनामभाक् ॥ ७।४६१ ॥

कथंचिल्लक्ष्यते न ज्ञैरप्यलक्ष्यस्ततः स्मृतः ।
एको द्रव्यधियानन्त्यात्पर्यायाणामनेककः ॥ ७।४६२ ॥

विनाभूतः सत्त्वरजस्तमोभिस्तेन निर्गुणः ।
ज्ञानादिगुणयोगेन गीयते स महागुणः ॥ ७।४६३ ॥

अव्यक्तो व्योमकल्पत्वाद् व्यक्तस्तद्गुणवर्णनात् ।
भावः शिवस्य पर्यायैरभावस्तु भवस्य तैः ॥ ७।४६४ ॥

तत्र स ज्ञानदृष्टिभ्यां चेष्टावान् सकलस्ततः ।
आश्रित्य वाग्वपुश्चेष्टा निष्कलोऽप्येष कीर्त्यते ॥ ७।४६५ ॥

कर्म्मोपक्रमयोरात्मदेहयोर्द्रव्यभावयोः ।
ज्ञानचारित्रयोर्भोगयोगयोः श्रीगिरोरपि ॥ ७।४६६ ॥

एकैकं वस्त्ववष्टभ्य कुर्युः के केऽत्र नो कलिम् ।
अयं तत्र परित्यक्तद्वन्द्वस्तेन सदा सुखी ॥ ७।४६७ ॥

यद्यत्संसारिभिर्जीवैः सुखाय परिकल्पितम् ।
तन्मेने तेन दुःखाय ततो विश्वविलक्षणः ॥ ७।४६८ ॥

तन्नास्ति भूभुजि न चक्रिंणि नापि देवे, नेन्द्रे कषायविषयाकुलचित्तवृत्तौ
यत्तत्र नित्यसुखमस्ति निरस्तशङ्कासंकल्पशल्यधृतिसम्मिलितस्य तस्य

वेत्ति ज्ञानादनुभवति च स्वात्मना तस्य सौख्यं,
वक्तुं शक्तो न भवति पुनः सर्ववेद्यप्यनन्तम् ।
यस्माद्वाणी क्रमपरिणमद्वर्णसंघातरूपा,
तस्याप्यायुः स्पृशति न परं पूर्वकोटेर्विभागम् ॥ ७।४७० ॥

कथं सुखं तस्य नयन्ति वाक्पथं, बुधाः सुधातोऽभ्यधिकं विकर्मणः ।
अनन्तभागाधिकभोगभाजिनो, न यस्य देवा लवसप्तमा अपि ७।४७१

नृपेणानीतोन्तःपुरमटवितः कोऽपि शबरः,
कृतस्तद्ज्ञैर्नानाविषयसुखभङ्गीषु निपुणः ।
पुनः प्राप्तोऽटव्यां निजसुखमसत्यामुपमितौ,
पुरः स्वानां जानन्नपि कथमहो तत्कथयति ॥ ७।४७२ ॥

एवं भवस्थाङ्गिषु भुक्तवत्सु, संक्लेशसाध्यानि सदा सुखानि ।
कयोपमित्या स सुखं शिवस्य, श्रोतुः पथं प्रापयति प्रतीतेः ७।४७३

इष्टान्नपानवसनाभरणाङ्गरागस्त्रीभिः सुखं स्फुरति यत् किल कृत्रिमं तत् ।
आत्मस्वरूपमनिमित्तमनन्यहार्यं, तस्यास्ति यत्सुखमकृत्रिमंतदेव

यतःस्मृतः स्याज्जगतां स योगक्षेमाय तज्जल्पत लोकनाथम् ।
देवाधिदेवं च यदन्यदेवान्, करोत्यधः प्राप्य परं पदं सः ७।४७५

नातः परं ध्येयमिहास्ति किञ्चिन्नातः परं ज्ञेयमपि प्रसिद्धम् ।
नातः परं दैवतमस्ति किञ्चिन्नातः परं तीर्थमपि प्रतीमः ७।४७६

नवं नवं तीर्थमिदं वदन्तो, मुग्धाशयास्ते भुवने भ्रमन्ति ।
येषां न विज्ञातमिदं स्वरूपं, सर्वापि भूरात्मविदां हि तीर्थम् ७।४७७

ध्मातो यथा मृत्कनकत्वमेति, पिचुः पटुत्वं परिकर्मितो वा ।
सुसंस्कृतः सिद्धरसाभिधां च, सूतस्तथात्मा परमात्मभावम् ७।४७८

मिथो मदाध्यातमनांसि तावद्द्रुह्यन्ति सर्वाण्यपि दर्शनानि ।
यावन्न विज्ञातमदः स्वरूपं, दृष्टात्मतत्त्वानि तु सोदरन्ति॥ ७।४७९ ॥

विद्याऽनवद्या सहितामुना या, शेषा अविद्या भवचारपद्याः ।
विचित्रशास्त्रान्धतमिस्रमूढा, अध्यात्मवन्ध्याः कुगतौ पतन्ति ॥ ७।४८० ॥

गेयाश्च कैरप्यपरैर्विगेयाः सर्वेऽपि भावा भुवनप्रसिद्धाः ।
अस्य स्वरूपं पुनराप्तलक्ष्यं, दूष्यं न केनापि सचेतनेन ॥ ७।४८१ ॥

कृपीशसेवाव्यवसायपाशुपाल्याम्बुधिक्ष्माक्रमणाद्युपायाः ।
सर्वेऽपि संदिग्धफला नराणां, स्वल्पापि सेवास्य पुनर्न मोघा

कल्पद्रुमस्वर्मणिकामधेनु, सच्छङ्खमुख्या ददते कदापि ।
किञ्चित्क्वचित्कस्यचिदिष्टवस्तु, न सर्वदोऽस्मादपरः प्रतीतः ७।४८३

तन्वन्ति चाटूनि सृजन्ति दास्यं धनाशया तद्धनिनामधीराः ।
यद्येकमेकाग्रममुं भजन्ते न दुर्लभं तत्त्रिजगत्प्रभुत्वम् ॥ ७।४८४ ॥

अयं महामङ्गलमेष मन्त्रो, महोत्सवोऽयं सुकृताङ्गमेषः ।
अयं हि चिन्तामणिरेष रक्षौषधं नृणां बन्धुरबन्धुरेषः ॥ ७।४८५ ॥

नीरूपं विश्वरूपं सकलमकलनं व्यक्तमव्यक्तमेकं,
चानेकं पुण्यपापप्रकृतिमतिगतं योगिलक्ष्यं ह्यलक्ष्यम् ।
भावाभावस्वभावं सगुणमपगुणं नायकं नायकानां,
ध्येयानां ध्येयमेकं प्रणमत परमात्मानमिष्टार्थसिद्ध्यै ॥ ७।४८६ ॥

## ॥ ग्रन्थकृत्प्रशस्तिः ॥

सूरिष्वार्यचरित्रभृच्चरणसन्नैर्मल्यदासीकृत-
स्वर्गिश्रेणिरिहार्यरक्षित इति ख्यातोऽभवत् सूरिराट् ।
यस्मादेव प्रसिद्धिमाप जगति प्रध्वस्तदुर्दर्शन-
ध्वान्तादञ्चलगच्छ इत्यखिलसंस्तुत्यर्षिवृन्दैः श्रितः ॥ १ ॥

तत्पट्टक्रमतो बभूवुरमलप्रज्ञाः प्रमादद्विष-
ध्वंसोद्बद्धकटीतटाः करटिसद्यानाः कलाव्रत्प्रियाः ।
कान्ताकान्तकटाक्षकाण्डविसराक्षोभ्या महेन्द्रप्रभा
भिख्याःसूरिवरा महीन्द्रविनुताङ्घ्रिद्वन्द्वजम्बालजाः ॥ २ ॥

तेषां विनेयैर्विनयप्रधानैः शास्त्रार्थहेम्नः कषपट्टकल्पैः ।
सन्दर्भितः श्रीजयशेखराख्यैः सूरिप्रवर्यैः प्रवरार्थसारः ॥ ३ ॥

प्रबोधचिन्तामणिनामधेयः प्रक्लृप्तसद्युक्तितरङ्गगम्यः ।
ग्रन्थः सुपन्था ह्यपवर्गपुर्याः प्रपठ्यमानो वरबोधिदः स्तात् ॥ ४ ॥

यमरसभुवनमिताब्दे (१४६२) स्तम्भनकाधीशभूषिते नगरे ।
श्रीजयशेखरसूरिः प्रबोधचिन्तामणिमकार्षीत् ॥ ५ ॥

# शास्त्रसन्देशमालाविंशतिभागमध्ये ग्रथितानां ग्रन्थानामकारादिक्रमः

(अङ्कैर्भागा विज्ञेयाः)


### अ

अट्ठारसंसहसशीलंगाइरहा ( ५ )
अध्यात्मकल्पद्रुमः ( ९ )
अध्यात्मबिन्दुः ( १८ )
अध्यात्मसारः ( ४ )
अध्यात्मोपनिषत् ( ४ )
अनुमानमातृका ( १६ )
अनेकान्तव्यवस्थाप्रकरणस्य मङ्गलप्रशस्ती ( ५ )
अन्नायउंछकुलयं ( ७ )
अन्ययोगव्यवच्छेदद्वात्रिंशिका ( १६ )
अन्योक्तिशतकम् ( ६ )
अन्तिमाऽऽराधना ( १४ )
अप्पविसोहिकुलयं ( ७ )
अभव्यकुलकम् ( ७ )
अष्टकानि ( ३ )

### आ

आउरपच्चक्खाणं-१ ( १५ )
आउरपच्चक्खाणं-२ ( १५ )
आख्यानकमणिकोशः ( ८ )
आचारोपदेशः ( ११ )
आत्मतत्त्वचिन्ताभावनाचूलिका ( ९ )
आत्मनिन्दाष्टकम् ( १४ )
आत्मप्रबोधः ( १७ )
आत्मबोधकुलकम् ( ७ )
आत्महितकुलकम् ( ७ )
आत्मानुशासनकुलकम् ( ७ )
आत्मानुशासनम् ( १४ )
आत्मानुशास्तिसंज्ञिका पञ्चविंशतिका ( १४ )
आत्मावबोधकुलकम् ( ७ )
आध्यात्मिकमतपरीक्षा ( ५ )
आभाणशतकम् ( ६ )
आराधकविराधकचतुर्भङ्गी ( ४ )
आराधना ( १४ )
आराहणा ( १४ )
आराहणाकुलयं ( ७ )
आराहणापडागा-१ ( १४ )
आराहणापडागा-२ ( १४ )
आराहणापणगं ( १४ )
आराहणापयरणं ( १४ )
आलोयणाकुलयं ( ७ )
आर्षभीयचरितमहाकाव्यम् ( ५ )

### ई

इन्द्रियपराजयशतकम् ( ६ )
ईर्यापथिकीषट्त्रिंशिका ( १६ )
ईर्यापथिकीमिथ्यादुष्कृतकुलकम् ( ७ )

### उ

उत्पादादिसिद्धिः ( १६ )
उत्सूत्रपदोद्घाटनकुलकम् ( ७ )
उपदेशकल्पवल्लिः ( ११ )

उपदेशकुलकम्-१ ( ७ )
उपदेशकुलकम्-२ ( ७ )
उपदेशचिन्तामणिः ( १० )
उपदेशपदग्रन्थः ( १ )
उपदेशप्रदीपः ( १२ )
उपदेशरत्नकोशः ( ८ )
उपदेशरत्नाकरः ( ८ )
उपदेश( धर्म )रसायनरासः ( ८ )
उपदेशरहस्यम् ( ४ )
उपदेशशतकम् ( ६ )
उपदेशसप्ततिका ( ८ )
उपदेशसप्ततिः ( ११ )
उपदेशसारः ( ११ )
उपदेशामृताकुलकम् ( ७ )
उपधानविधिः-१ ( १० )
उपधानविधिः-२ ( १० )
उवएसचउक्ककुलयं-१ ( ७ )
उवएसचउक्ककुलयं-२ ( ७ )
उवएसमाला ( ८ )

### ऋ

ऋषभशतकम् ( ६ )
ऋषिमण्डलस्तवः ( १२ )

### ए

एकविंशतिर्द्वात्रिंशिकाः ( १६ )
ऐन्द्रस्तुतयः ( ५ )

### औ

औष्ट्रिकमतोत्सूत्रोद्‌घाटनकुलकम् ( ७ )

### अं

अंगुलसत्तरी ( १३ )

### क

कथाकोषः ( १२ )
कथानककोशः ( १२ )
कर्पूरप्रकरः ( १२ )
कर्मप्रकृतिः ( १३ )
कर्मविपाककुलकम् ( ७ )
कर्मविपाकाख्यः प्रथमः प्राचीनकर्मग्रन्थः ( १३ )
कर्मस्तवाख्यः द्वितीयः प्राचीनकर्मग्रन्थः ( १३ )
कम्मबत्तीसी ( १३ )
कविकल्पद्रुमः ( १८ )
कस्तूरीप्रकरः ( १२ )
कायस्थितिस्तोत्रम् ( १३ )
कालसप्ततिका ( १३ )
कालस्वरूपकुलकम् ( ७ )
कुमारविहारशतकम् ( ६ )
कूपदृष्टान्तविशदीकरणम् ( ५ )
कृष्णराजीविमानविचारः ( १३ )
केवलिभुक्तिप्रकरणम् ( १६ )

### क्ष

क्षमाकुलकम् ( ७ )
क्षान्तिकुलकम् ( ७ )
क्षुल्लकभवावलिः ( १३ )

### ख

खामणाकुलयं ( १ ) ( ७ )
खामणाकुलयं ( २ ) ( ७ )

## ग

गणधरसार्धशतकम् ( ६ )
गाङ्गेयभङ्गप्रकरणम्-१ ( १५ )
गाङ्गेयभङ्गप्रकरणम्-२ ( १५ )
गुणस्थानक्रमारोहः ( १३ )
गुणानुरागकुलकम् ( ७ )
गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाकुलकम् ( ७ )
गुरुतत्त्वप्रदीपः ( १६ )
गुरुतत्त्वविनिश्चयः ( ५ )
गुरुदर्शनहर्षकुलकम् ( ७ )
गुरुविरहविलापः ( १४ )
गोडीपार्श्वस्तवनम् ( ५ )
गौतमकुलकम् ( ७ )

## घ

घनगणितसंग्रहगाथाः ( १८ )

## च

चउसरणपइन्नयं ( १५ )
चतुर्गतिजीवक्षपणकानि ( १४ )
चतुर्दशजीवस्थानेषु जघन्योत्कृष्टपदे ( १३ )
चरणकरणमूलोत्तरगुण ( १८ )
चारित्रमनोरथमाला ( ८ )
चित्तशुद्धिफलम् ( १८ )
चेइयवंदणमहाभासं ( १० )
चंदावेज्झयं पइण्णयं ( १५ )

## ज

जघन्योत्कृष्टपद एककालं गुणस्थानकेषु ( १३ )
जल्पकल्पलता ( १६ )
जिनप्रतिमास्तोत्रम् ( १ )
जिनबिम्बप्रतिष्ठाविधिः ( १० )
जिनशतकम्-१ ( ६ )
जिनशतकम्-२ ( ६ )
जीवजोणिभावणाकुलयं ( ७ )
जीवदयाप्रकरणं ( ८ )
जीवसमासः ( १३ )
जीवादिगणितसंग्रहगाथाः ( १८ )
जीवानुशासनम् ( १४ )
जीवानुशास्तिकुलकम् ( ७ )
जीवाभिगमसंग्रहणी ( १५ )
जैनतत्त्वसारः ( १६ )
जैनस्याद्वादमुक्तावली ( १६ )
जोइसकरंडगं पइण्णयं ( १५ )

## ज्ञ

ज्ञाताधर्मकथोपनयगाथाः ( १५ )
ज्ञानप्रकाशकुलकम् ( ७ )
ज्ञानसारः ( ४ )
ज्ञानार्णवः ( ५ )

## त

तत्त्वतरङ्गिणी ( १६ )
तत्त्वबोधतरङ्गिणी ( १२ )
तत्त्वामृतम् ( ९ )
तपःकुलकम् ( ७ )
तित्थोगालिपइन्नयं ( १५ )
त्रिशतत्रिषष्टिपाखण्डस्वरूपस्तोत्रम् ( १५ )
त्रिषष्टीयदेशनासंग्रहः ( ११ )

## द

दशश्रावककुलकम् ( ७ )

दर्शननियमाकुलकम् ( ७ )
दानकुलकम् ( ७ )
दानविधिः ( १० )
दानषट्त्रिंशिका ( ९ )
दानादिप्रकरणम् ( १२ )
दानोपदेशमाला ( ८ )
दीवसागरपन्नत्ति ( १५ )
दृष्टान्तशतकम्-१ ( ६ )
दृष्टान्तशतकम्-२ ( ६ )
देवेन्द्रनरकेन्द्रप्रकरणम् ( १३ )
देशनाशतकम् ( ६ )
देहकुलकम् ( ७ )
देहस्थितिस्तवः ( १३ )
दंसणसुद्धिपयरणं ( १० )
द्वात्रिंशद्द्वात्रिंशिकाः ( ४ )
द्वादश-कुलकम् ( ७ )
द्वादशव्रतस्वरूपम् ( १० )
द्वादशाङ्गीपदप्रमाणकुलकम् ( ७ )

ध

धनुःपृष्ठबाहासंग्रहगाथाः ( १८ )
धर्मपरीक्षा ( ५ )
धर्मबिन्दुः ( ३ )
धर्मरत्नप्रकरणम् ( १० )
धर्मरत्नकरण्डकः ( ११ )
धर्मविधिः ( ८ )
धर्मशिक्षा ( ९ )
धर्मसंग्रहणिः ( १ )
धर्मसंग्रहः ( ११ )
धर्माचार्यबहुमानकुलकम् ( ७ )
धर्मोद्यमकुलकम् ( ७ )
धर्मोपदेशः ( ९ )
धर्मोपदेशमाला ( ८ )
धम्मारिहगुणोवएसकुलयं ( ७ )
धर्म्मोपदेशकुलकम् ( ७ )
धम्मोवएसकुलयं ( ७ )
धूर्ताख्यानम् ( ३ )
धूमावली ( ३ )
ध्यानदीपिका ( १८ )
ध्यानशतकम् ( ६ )

न

नन्दीश्वरस्तवः ( १३ )
नमस्कारस्तवः ( १८ )
नयकर्णिका ( १६ )
नयोपदेशः ( ५ )
नरभवदिट्ठंतोवणयमाला ( १२ )
नवकारफलकुलकम् ( ७ )
नवतत्त्वभाष्यम् ( १३ )
नवतत्त्वम् ( १३ )
नवतत्त्वसंवेदनम् ( १३ )
नवपदप्रकरणम् ( १० )
नानाचित्तप्रकरणम् ( ३ )
नारीशीलरक्षाकुलकम् ( ७ )
निगोदषट्त्रिंशिका ( १५ )
नूतनाचार्याय हितशिक्षा ( ९ )
नंदणरायरिसिस्स अन्तिमाऽऽराधना ( १४ )
न्यायखण्डखाद्याऽपरनामा महावीरस्तवः ( ५ )
न्यायावतारः ( १६ )
न्यायावतारसूत्रवार्तिकम् ( १६ )

## प

पज्जंताराहणा ( १४ )
पंचवत्थुगं ( २ )
पञ्चनिर्ग्रन्थी ( १५ )
पञ्चलिङ्गीप्रकरणम् ( १५ )
पञ्चसङ्ग्रहः ( १३ )
पञ्चसंयतप्रकरणम् ( १५ )
पञ्चाशकानि ( १ )
पट्टावलीविसुद्धी ( १६ )
पडिलेहणाविचारकुलकम् ( ७ )
पदार्थस्थापनासंग्रह ( १७ )
पद्मानन्दशतकम् ( ६ )
परमज्योतिःपञ्चविंशतिका ( ५ )
परमाणुखण्डषट्त्रिंशिका ( १५ )
परमात्मपञ्चविंशतिका ( ५ )
परमानन्दपञ्चविंशतिः ( ९ )
पर्यन्ताराधनाकुलकम् ( ७ )
पर्युषणादशशतकम् ( १६ )
पव्वज्जाविहाणकुलयं ( ७ )
पिण्डविशुद्धिः ( १० )
पुण्डरीकतीर्थपतीस्तोत्रम् ( ५ )
पुण्यकुलकम् ( ७ )
पुद्गलपरावर्तस्तवनम् ( १३ )
पुद्गलषट्त्रिंशिका ( १५ )
पुष्पमाला ( ८ )
पूजाविधिः ( ११ )
पोसहविही ( १० )
पौषधषट्त्रिंशिका ( १६ )
प्रज्ञापनोपाङ्गतृतीयपदसंग्रहणी ( १५ )
प्रतरप्रमाणसंग्रहगाथाः ( १८ )
प्रतिमाशतकम् ( ४ )
प्रतिसमयजागृतिकुलकम् ( ७ )
प्रत्याख्यानस्वरूपम् ( १० )
प्रबोधचिन्तामणिः ( ९ )
प्रभाते जीवानुशासनम् ( १४ )
प्रमाणनयतत्त्वालोकालङ्कारः ( १६ )
प्रमाणप्रकाशः ( १६ )
प्रमाणमीमांसा ( १६ )
प्रमादपरिहारकुलकम् ( ७ )
प्रवचनपरीक्षा ( १६ )
प्रवचनसारोद्धारः ( १७ )
प्रव्रज्याविधानकुलकम् ( ७ )
प्रशमरतिः ( ९ )
प्रश्नद्वात्रिंशिका ( १६ )
प्रश्नशतकम् ( ६ )
प्रश्नोत्तररत्नमाला ( १२ )
प्राकृतसंवेगामृतपद्धतिः ( १४ )
प्रातःकालिकजिनस्तुतिः ( ९ )

## ब

बन्धस्वामित्वाख्यः तृतीयः प्राचीनकर्मग्रन्थः ( १३ )
बन्धषट्त्रिंशिका ( १५ )
बन्धहेतुप्रकरणम् ( १३ )
बन्धहेतूदयभङ्गप्रकरणसमाप्तिगते द्वे प्रकरणे ( ५ )
बन्धोदयसत्ता ( १३ )
बृहद्वन्दनकभाष्यम् ( १० )

## भ

भवभावना ( ८ )
भावकुलकम् ( ७ )
भावनाशतकम् ( ६ )
भावप्रकरणम् ( १३ )
भाषारहस्यम् ( ५ )
भोजनपूर्वचिन्तागाथाः ( ८ )

म

मंगलकुलयं ( ७ )
मण्डलप्रकरणम् ( १८ )
मदादिविपाककुलकम् ( ७ )
मनुष्यभवदुर्लभता ( ९ )
मनोनिग्रहभावनाकुलकम् ( ७ )
महासतीकुलकम् ( ७ )
मार्गपरिशुद्धिः ( ५ )
मार्ग्गणासु बंधहेतूदयत्रिभङ्गी ( १३ )
मिच्छादुक्कडवोसिरणविहिकुलयं ( ७ )
मिथ्यात्वकुलकम् ( ७ )
मिथ्यात्वमथनकुलकम् ( ७ )
मिथ्यात्वविचारकुलकम् ( ७ )
मिथ्यात्वस्थानविवरणकुलकम् ( ७ )
मुखवस्त्रिकास्थापनकुलकम् ( ७ )
मूलशुद्धिः ( १० )
मृत्युमहोत्सवः ( १४ )
मोक्षोपदेशपञ्चाशकम् ( ९ )

य

यतिदिनकृत्यम् ( ११ )
यतिदिनचर्या ( १० )
यतिलक्षणसमुच्चयः ( ४ )
यतिशिक्षापञ्चाशिका ( ८ )
यात्रास्तवः ( ११ )
युक्त्यनुशासनम् ( १६ )
युक्तिप्रकाशः ( १६ )
युक्तिप्रबोधः ( १६ )
युगपद्बन्धहेतुप्रकरणम् ( १३ )
योगदृष्टिसमुच्चयः ( ३ )
योगप्रदीपः ( १२ )
योगबिन्दुः ( ३ )
योगशतकम् ( ३ )
योगशास्त्रम् ( १८ )
योगानुष्ठानकुलकम् ( ७ )
योनिस्तवः ( १३ )

र

रत्नत्रयकुलकम् ( ७ )
रत्नसञ्चयः ( १७ )

ल

लघुप्रवचनसारोद्धारः ( १७ )
लघ्वल्पबहुत्वप्रकरणम् ( १३ )
लोकतत्त्वनिर्णयः ( ३ )
लोकनालिकाद्वात्रिंशिका ( १३ )

व

वाक्यप्रकाशः ( १८ )
वाणारस्यां कृतं श्रीपार्श्वनाथजिनस्तोत्रम् ( ५ )
विचारपञ्चाशिका ( १३ )
विचारसप्ततिका ( १७ )
विचारसारः ( १७ )
विजयप्रभसूरिक्षामणकविज्ञप्तिः ( ५ )

विजयप्रभसूरिस्वाध्यायः ( ५ )
विजयोल्लासमहाकाव्यम् ( ५ )
विद्वद्गोष्ठी ( १२ )
विभक्तिविचारः ( १५ )
विरतिफलकुलकम् ( ७ )
विविधतपोदिनाङ्ककुलकम् ( ७ )
विवेककुलकम् ( ७ )
विवेकमञ्जरी ( ८ )
विशेष-णवतिः ( १५ )
विंशतिर्विंशिकाः ( ३ )
विषयविरक्तिकुलकम् ( ७ )
वीरस्तवः ( १५ )
वैराग्यकल्पलता ( १९+२० )
वैराग्यरसायनम् ( ८ )
वैराग्यशतकम् ( ६ )
व्यवहारकुलकम् ( ७ )
व्याख्यानविधिशतकम् ( ६ )

## श

शङ्खेश्वरपार्श्वजिनस्तोत्रम्-१ ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-२ ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम्-३ ( ५ )
शमीनपार्श्वस्तोत्रम् ( ५ )
शास्त्रवार्तासमुच्चयः ( ३ )
शीलकुलकम् ( ७ )
शीलोपदेशमाला ( ८ )
शोकनिवारणकुलकम् ( ७ )

## श्र

श्राद्धदिनकृत्यम् ( १० )
श्राद्धविधिः ( १० )
श्रावकधर्मकृत्यम् ( ११ )
श्रावकधर्मविधिः ( ३ )
श्रावकप्रज्ञप्तिः ( १० )
श्रावकव्रतभङ्गप्रकरणम् ( १८ )
श्रीकातन्त्रविभ्रमसूत्रम् ( १८ )
श्रीमद्गीता-तत्त्वगीता ( १८ )
श्रुतास्वादः ( ८ )
श्रृङ्गारवैराग्यतरङ्गिणी ( १२ )

## ष

षट्स्थानकम् ( १३ )
षडशीतिनामा चतुर्थः प्राचीनकर्मग्रन्थः ( १३ )
षड्दर्शनपरिक्रमः ( १६ )
षड्दर्शनसमुच्चयः-१ ( २ )
षड्दर्शनसमुच्चयः-२ ( १६ )
षड्द्रव्यसङ्ग्रहः ( १३ )
षड्विधाऽन्तिमाऽऽराधना ( १४ )
षष्ठिशतकम् ( ६ )
षोडशकप्रकरणम् ( ३ )

## स

संग्रहशतकम् ( ६ )
संज्ञाकुलकम् ( ७ )
संज्ञाधिकारः ( १८ )
संबोधप्रकरणम् ( २ )
संविज्ञसाधुयोग्यनियमकुलकम् ( ७ )
संवेगकुलयं ( ७ )

संवेगद्रुमकन्दली ( ९ )
संवेगमंजरीकुलयं ( ७ )
संवेगरंगमाला ( १४ )
संवेगामृतम् ( १८ )
सङ्घस्वरूपकुलकम् ( ७ )
सज्जनचित्तवल्लभः ( ९ )
सन्देहदोलावली ( १६ )
सभापञ्चकप्रकरणम् ( १८ )
सप्ततिकाभाष्यम् ( १३ )
समताशतक ( ६ )
समवसरणप्रकरणम् ( १३ )
समवसरणस्तोत्रम् ( १३ )
समाधिशतक ( ६ )
समाधिशतकम् ( ६ )
समाधिसाम्यद्वात्रिंशिका ( ४ )
सम्मतिसूत्रम् ( १६ )
सम्मत्तकुलयं-१ ( ७ )
सम्मत्तुप्पायविही कुलकम् ( ७ )
सम्यक्त्वकुलकम्-२ ( ७ )
सम्यक्त्वकुलकम्-३ ( ७ )
सम्यक्त्वपरीक्षा ( १६ )
सम्यक्त्वसप्ततिः ( १० )
सम्यक्त्वस्वरूपकुलकम् ( ७ )
सर्वज्ञशतकम् ( ६ )
सर्वज्ञसिद्धिः ( २ )
सर्वतीर्थमहर्षिकुलकम् ( ७ )
सर्वश्रीजिनसाधारणस्तवनम् ( २ )
सार्धमिकवात्सल्यकुलकम् ( ७ )
सामाचारी ( ४ )
सामान्यगुणोपदेशकुलकम् ( ७ )
साम्यशतकम् ( ६ )
सारावलीपइण्णयं ( १५ )
सिद्धदण्डिकास्तवः ( १३ )
सिद्धपञ्चाशिका ( १३ )
सिद्धप्राभृतम् ( १३ )
सिद्धसहस्त्रनामकोशः ( ५ )
सिद्धान्तसारोद्धारः ( १८ )
सुक्ष्मार्थविचारसारोद्धारः ( १५ )
सुभाषिताष्टकानि ( १२ )
सुमिणसित्तरी ( ८ )
सूक्तरत्नावली-१ ( १२ )
सूक्तरत्नावली-२ ( १२ )
सूक्तिमुक्तावली ( १२ )
सूक्ष्मार्थसप्तति प्रकरणम् ( १८ )
सूत्रकृताङ्गाद्यचतुरध्ययनाऽनुक्रमगाथाः (१५)
स्तवपरिज्ञा ( १० )
स्त्रीनिर्वाणप्रकरणम् ( १६ )
स्त्रीवास्तविकताप्रकरणम् ( ८ )
स्याद्वादकलिका ( १६ )
स्याद्वादभाषा ( १६ )
स्याद्वादमुक्तावली ( १६ )

## ह

हिंसाफलाष्टकम् ( ३ )
हिओवएसमाला ( ८ )
हिङ्गुलप्रकरणम् ( १२ )
हृदयप्रदीपषट्त्रिंशिका ( ९ )

# ॥ शास्त्रसंदेशमाला ॥

१ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - १
२ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - २
३ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - ३
४ पू. उपा. श्रीयशोविजयगणिवराणां कृतयः - १
५ पू. उपा. श्रीयशोविजयगणिवराणां कृतयः - २
६ शतकसंदोहः
७ कुलयसंग्गहो
८ भावणासत्थणिअरो
९ भावनाशास्त्रनिकरः
१० आयारसत्थणिअरो
११ आचारशास्त्रनिकरः
१२ काव्योपदेश-ज्ञातोपदेशग्रन्थनिकरौ
१३ प्रारम्भिकाणि कार्मग्रन्थिकाणि लोकप्रकाशीयानि च प्रकरणानि
१४ अन्तिमाराधनाग्रन्थाः
१५ आगमिकानि प्रकरणानि तथा प्रकीर्णकानि
१६ दार्शनिक-चर्चा ग्रन्थनिकरौः
१७ विविधविषयसंकलनाग्रन्थाः
१८ ध्यानयोग-गणित-व्याकरणशास्त्रनिकराः
१९ वैराग्य कल्पलता - १
२० वैराग्य कल्पलता - २